MSS No. 13 Subject Religion

Name of MSS Lingapurāna (लिंगपुराण)

Author Not available

Period — — Folios 216 (2 to 218)

Script Sanskrit Source Prithipal Singh

Missing Folios 1, 92

A. no. 13.

संयोगेन विनाशे जगतां भयं शापः सत्याकृतो देवानां परो विस्तेच पावके शुक्रोत्सर्गश्च रुद्रस्य गांगेयोद्भवमेव च ग्रह
णादिषु काले शुभस्याप्यलिंगफलं तथा दक्षप्रदधीचिविवादश्च दधीच्योपेंद्रयोस्तथा उत्पत्तिं नंदिनाम्नात देवदेव
स्याधीमतः पतिव्रतायाश्चाख्याने पञ्चपाशाविचारणा प्रकृतिलक्षणं ज्ञानं निहास्यधिकता तथा वसिष्ठस्य त॥
योत्पत्तिर्वासिष्ठानां महात्मनां मुनीनां वंशविस्तारो राज्ञोशत्रोर्विनाशनं दौरात्म्यं कौशिकस्याथ स्वरभीवे
धनं तथा सुतशोको वसिष्ठस्य शुक्रं धत्या प्रलापनं स्नुषायाः प्रेक्षणं चैव गर्भस्थस्य वचस्तथा पराशरस्यावता
रो व्यासस्य च शुकस्य च विनाशं राक्षसानां च विहितं शक्रसूनुना देवता परमार्थे भुवि ज्ञानं तत्प्रसादतः पुराण
स्त्विनिष्कलस्य स्याज्ञया गुरोः भुवनानां प्रमाणं तु ग्रहाणां ज्योतिषां गतिः जीवत श्राद्ध विधानं च श्राद्धा
कारादेव मन्वप्रकीर्णानाह विधानं च तथाध्ययनलक्षणं पंचयज्ञप्रभावश्च पंचयज्ञविधिस्तथा रजस्वलानां
महदादिविशेषांतानां [illegible] मैथुनस्य विधिश्चैव प्रतिवर्णमनुक्रमात् भोज्याभोज्यविधानं च सर्वेषामेव वर्णिनां
विश्वजगत्प्रभुः तस्मिन्नंडे [illegible] राततू नरकाणां स्वरूपं च दंडकर्मानुरूपतः स्वर्गनारकिनां चिह्नं सांविक्रेज॥
प्रायोदशगुणेनैव वाह्यतस्तेजसे [illegible] तरा जगुरं तथा कल्पं पंचाक्षरस्याथ रुद्रमाहात्म्यमेव च वृत्रेंद्रयोर्महायु
तेन भस्माहृतः प्राकाशस्याहृतस्तत्प्रदः श्वेताख्यकालनाशनं देवदारुवने शंभोः प्रवेशः शंकरस्य च स्वदर्श
वरणान्याज्ञस्तस्यात्माकमलासनः वेधसाथो हि रुद्रस्तत्कथितं ब्रह्मणा तदा मधुनाकैटभेनैव प्रवाहत्यग

नाद्धरेः सर्वावर्तेषु विष्णोश्च जननं लीलयैव तु विष्णोः प्रसादाद्धि सो
तिर्यादवत्वं हरेः स्वयं भोजराजस्य दौत्यं मातुलस्याहरेर्विभोः वा
त नरस्य च तथोत्पत्तिः कपाले वै स्ववाहुकरात् भूभारनिग्रहार्थं तु रुद्र
मेः प्रसादाद्धि प्रवर्तनं देवासुरैः स्वरालब्धं भृगुशापश्च विष्णुना कृष्णत्वेऽ
त लब्धोहितायशापस्तु दुर्वाससस्याननाद्धरेः हृस्यंधकविनाशायशापः पिंडा
योत्पत्तिस्तोमरस्योद्भवस्तथा परकालोभतोन्योन्यं विवादं ब्रह्मविग्रहः लीलयावै
कुलस्य च संहृतिः परकामवले नैव गमनं स्वेच्छयैव तु ब्रह्मणश्चैव मानं तु मोहं ज्ञाने स विष्णु
र पुरंधकाग्निदग्धानां शक्रेशमत्सगत्रूपिणं मदनस्यादिदेवस्य ब्रह्मणश्चामरारिणां हालाहलस्य दैत्यस्य
कृतावज्ञापिनाकिना जालंधरवधश्चैव सुदर्शनसमुद्भवः विष्णोर्वरायुधावाप्तिस्तथा रुद्रविचेष्टितं तथा
यानि च रुद्रस्य चरितानि सहस्रशः हरेः पितामहस्याथ शक्रस्य च महात्मनः प्रभावो ब्रह्मणश्चैव शिव
लोकस्य वर्णनं भूमौ रुद्रस्य लोकं तु पाताले हाटकेश्वरं तपसां लक्षणं चैव द्विजानां वैभवं तथा आधिक्यं
शैवमूर्तीनां लिंगमूर्तीर्विशेषतः लैंगेस्मिन्नानुपूर्वेण विस्तरेण प्रकीर्त्यते एतान् ज्ञात्वा पुराणस्य संक्षेपं की
र्तयेन्नयः सर्वपापविनिर्मुक्तो ब्रह्मलोकं स गच्छति इति श्रीमत्पुराणे लैंगे परिपाटीवर्णनं द्वितीयोध्यायः २

लिंग॰ पु॰ ४

4

महतस्त्रिगुणात्तस्मादहंकारो रजोधिकः तेनैव चावृतः सम्यगहंकारस्तमोधिकः महतो भूततन्मात्रं सर्ग
कृद्वै बभूव ह अहंकाराच्छब्दमात्रं तस्मादाकाशमव्ययं सशब्दमावृणोत्पश्चादाकाशं शब्दकारणं तन्मा
त्रभूतसर्गोयं द्विजास्त्वेवं प्रकीर्तितः सशब्दमात्रस्त्वाकाशस्तस्माद्वायुर्महाभुजे तस्माच्च रूपमात्रं तु ततो
ग्निस्तु रसस्ततः रसादापः शुभास्ताभ्यो गंधमात्रा धरा ततः आवृणोद्धि तदाकाशं स्पर्शमात्रं द्विजोत्तमाः
आवृणोद्रूपमात्रं तु वायुर्वातिक्रियात्मकः आवृणोद्रसमात्रं तु देवः साक्षाद्विभावसुः स्मायां पंचगुणा
स्तस्मादेकोनो रससंभवः त्रिगुणो भगवान्वह्निर्द्विगुणः स्पर्शनात्मजः अहंकारस्ततो देवस्त्वेकमात्र
स्तु निष्कलः तन्मात्राद्भूतसर्गश्च विज्ञेयश्च परस्परं वैकारिकः सात्विको वै युगपत्संप्रवर्तते सर्गस्तथाप्यहं
कारादेवमत्र प्रकीर्तितः पंचबुद्धींद्रियाण्यत्र पंचकर्मेंद्रियाणि च शब्दादीनामवाप्त्यर्थं मनश्चैवोभयात्मकं
महदादिविशेषांता ह्यंडमुत्पादयंति च जलबुद्बुदवत्तस्मादवतीर्णः पितामहः स एव भगवान्विष्णोर्वि रुद्रो=
श्वजगत्प्रभुः तस्मिन्नंडे त्विमे लोका अंतर्विश्वमिदं जगत् अंडं दशगुणेनैव वारिणा प्रावृतं बहिः
आपो दशगुणेनैव बाह्यतस्तेजसावृताः तेजो दशगुणेनैव वायुना बाह्यतो वृतं वायुर्दशगुणेनैव बाह्य
तो नभसावृतः आकाशस्त्वावृतस्तद्वदहंकारेण शब्दजः महता शब्दहेतुर्वै प्रधानेनावृतः स्वयं सप्तांडा
वरणान्याहुस्तस्यात्मा कमलासनः कोटिकोट्ययुतान्यत्र अंडानि कथितानि तु तत्र तत्र चतुर्वक्त्रा ब्रह्मा

सूतउवाच अलिंगोलिंगमूलंतुअव्यक्तंलिंगमुच्यते अलिंगशिवइत्युक्तोलिंगंशैवमितिस्मृतं प्रधानंप्रकृतिश्चे
तियदाहुर्लिंगमुत्तमं गंधवर्णरसैर्हीनंशब्दस्पर्शादिवर्जितं अगुणंध्रुवमक्षय्यमलिंगंशिवलक्षणं गंधवर्ण
रसैर्युक्तंशब्दस्पर्शादिलक्षितं जगद्योनिंमहाभूतंस्थूलंसूक्ष्मंद्विजोत्तमाः विग्रहोजगतांलिंगमलिंगादभवत्स्व
यं सप्तधाचाष्टधाचैवतथैकादशधापुनः लिंगान्यलिंगस्यतथामाययाविततानितु तेभ्यःप्रधानदेवानांत्रय-
मासीच्छिवात्मकं एकस्मात्त्रिषुभूत्सृष्टिस्संमेकेनपरिरक्षिते एकेनचहृतंविश्वंव्याप्तंत्वेवंशिवेनतु अलिंगंचैव
लिंगंचलिंगालिंगानिमूर्तयः यथावत्कथितान्येवंतस्माद्ब्रह्ममयंजगत् अलिंगीभगवान्बीजीसएवपर
मेश्वरः बीजंयोनिश्चनिर्बीजान्निर्बीजोयोनिरुच्यते बीजयोनिप्रधानानामात्माख्यावर्ततेत्विह परमा-
त्मामुनिर्ब्रह्मानित्योबुद्धःस्वभावतः विशुद्धोयस्ततोरुद्रःपुराणेशिवउच्यते शिवोदृष्टाश्चप्रकृतिंशैवीस-
मभवद्द्विजाः सर्गादौसागुणैर्युक्ताऽपुराव्यक्तास्वभावतः वित्यरादिविशेषांतेविश्वंतस्याःसमुत्थितं विश्वधा
त्रीत्वजाख्याचशैवीचप्रकृतिःस्मृता तामजांलोहितांशुक्लांकृष्णामेकोऽजःप्रभुः जनित्रीमनुशेतेचजुषमा-
णःस्वरूपिणीं तामेवाजामयोन्यस्तुभुक्तभोगांजहातिच अजाजनित्रीजगतामजेनसमधिष्ठिता प्रादु-
र्बभूवसमहान्पुरुषाधिष्ठितस्यच अजातयाप्रधानस्यसर्गकालेगुणैस्त्रिभिः सिसृक्षयाचोद्यमानःप्रवि-
श्याव्यक्तमव्ययं व्यक्तसृष्टिंविकुरुतेचात्मनाधिष्ठितोमहान् महतस्तुतथावृत्तिःसंकल्पाध्यवसायिका ॥

लिंग॰ पु॰ ३

रात्र्यहनीमासःप्रविभागस्तयोःपुनः कृष्णपक्षस्त्वहस्तेषांशुक्लःस्वप्नायशर्वरी त्रिंशद्येमानुषामासाःपित्र्यो।
मासस्तुसस्मृतः शतानित्रीणिमासानांषष्ट्याचाप्यधिकानिवै पित्र्यःसंवत्सरोह्येषमानुषेणविभाव्यते।
मानुषेणैवमानेनवर्षाणांयच्छतंभवेत् पितॄणांत्रीणिवर्षाणिसंख्यातानीहतानिवै दशचैवाधिकामासाः
पितृसंख्येहसंज्ञिताः लौकिकेनैवमानेनअब्दोयोमानुषःस्मृतः एतद्दिव्यमहोरात्रमितिलिंगेत्रपठ्य
ते दिव्येरात्र्यहनीवर्षंप्रविभागस्तयोःपुनः अहस्तत्रोदगयनंरात्रिःस्याद्दक्षिणायने एतेरात्र्यहनीदि
मनुष्य
व्येप्रसंख्यातेविशेषतः त्रिंशद्यानिवर्षाणिदिव्योमासस्तुसस्मृतः मानुषंतुशतंविप्रादिव्यामासास्त्र
यस्तुते दशचैवतथाहानिदिव्योह्येषविधिःस्मृतः त्रीणिवर्षशतान्येवषष्टिवर्षयुतानितु दिव्यःसंव
त्सरोह्येषमानुषेणप्रकीर्तितः त्रीणिवर्षसहस्राणिमानुषाणिप्रमाणतः त्रिंशद्यानिवर्षाणिमतःस
प्तर्षिवत्सरः नवयानिसहस्राणिवर्षाणांमानुषस्यच अन्यानिनवतिश्चैवध्रौवःसंवत्सरस्तुसः षट्त्रिंश
त्तुसहस्राणिवर्षाणांमानुषाणितु अहानिनवतिश्चैवप्रोक्तमेतन्महर्षिभिः वर्षाणांतच्छतंज्ञेयंदिव्यो
ह्येषविधिःस्मृतः त्रीण्येवनियुतान्याहुर्वर्षाणांमानुषाणिच षष्टिश्चैवसहस्राणिसंख्यातानीहसंख्यया
दिव्यंवर्षसहस्रंतुप्राहुःसंख्याविदोजनाः दिव्येनैवप्रमाणेनयुगसंख्याप्रकल्पने पूर्वंकृतंयुगंनामतत
स्त्रेताविधीयते द्वापरश्चकलिश्चैवयुगान्येतानिसर्वतः अत्रसंवत्सरादृष्टामानुषाणांप्रमाणतः कृत

णोहरयोभवाः स्रष्टाप्रधानेनतदालब्ध्वाशंभोस्तुसन्निधिं लयंचैवतथान्योन्यमाद्यंतमितिकीर्तितं सर्गस्यप्र
तिसर्गस्यस्थितेःकर्त्तामहेश्वरः सर्गेचरजसाष्टकः सत्वस्थःपरिपालने प्रतिसर्गेतमोद्रिक्तः सएवविविधः
क्रमात् आदिकर्त्ताचभूतानांसंहर्त्तापरिपालकः तस्मान्महेश्वरोब्रह्माब्रह्मणोधिपतिःशिवः सदाशि
वोभवोविष्णुर्ब्रह्मासर्वात्मकोयतः एतदंडेयथालोकाइमेकर्त्तापितामहः प्राकृतःकथितोह्येषपुरुषा
धिष्ठितोमया सर्गश्चबुद्धिपूर्वश्चद्विजाःप्राथमिकःशुभः इतिश्रीमहापुराणेलैंगेप्राकृतःप्राथमिकः
सर्गस्तृतीयोध्यायः ३ सूतउवाच अथप्राथमिकस्येहयःकालस्तदहःस्मृतः सर्गस्यतादृशीरात्रिःप्रा
कृतस्यसमासतः दिवासृष्टिंहिकुरुतेरजन्यांप्रलयंविभुः औपचारिकमस्यैतदहोरात्रंनविद्यते दिवावि
कृतयःसर्वेविकाराविश्वदेवताः प्रजानांपतयःसर्वेतिष्ठंत्येमहर्षयः रात्रौसर्वेप्रलीयंतेनिशांतेसंभवं
तिच अहस्तुतस्यवैकल्पोरात्रिस्तादृग्विधास्मृता चतुर्युगसहस्रांतेमनवस्तुचतुर्दश चत्वारिचसहस्राणि
वत्सराणांकृतंद्विजाः तावच्छतीचैवसंध्यासंध्यांशश्चकृतस्यतु त्रिशतीद्विशतीसंध्यातथाचैकशतीक्रमा
त् अंशकःषट्शतंतस्मात्कृतसंध्यांशकेविना त्रिद्व्येकसाहस्रमतोविनासंध्यांशकेनतु त्रेताद्वापरति
ष्याणांकृतस्यकथयामिवः निमेषपंचदशकाःकाष्ठास्वस्थस्यसुव्रताः मर्त्यस्यचाक्ष्णोस्तस्याश्चततस्त्रिं
शतिकाःकलाः कलात्रिंशतिकोविप्रामुहूर्तइतिकल्पितः मुहूर्तपंचदशकारजनीत्वाहशोत्वहः पित्र्ये

लिंग॰ पू॰ ६

त्यमेवंतत्कल्पयेत् कल्पानांवैसहस्रंतुवर्षमेकमजस्यतु वर्षाणामष्टसाहस्रंब्राह्मंवैब्रह्मणोयुगं सवनंयुग
साहस्रंसर्वदेवोद्भवस्यतु सवनानांसहस्रंतुत्रिगुणंत्रिविधंतथा ब्रह्मणस्तुयथाप्रोक्तः कालःकालात्मनःप्रभोः
भवोद्भवस्तपश्चैवभव्योरंभःक्रतुःपरः क्रतुर्वह्निर्हव्यवाहःसावित्रःशुद्धएवच उशिकःकुशिकश्चैवगांधारो
मुनिसत्तमाः ऋषभश्चतथाषड्जोमज्जालीयश्चमध्यमः वैराजोवैनिषादश्चमुख्योवैमेघवाहनः पंचमश्चि
त्रकश्चैवह्याकूतिर्ज्ञानएवच मनःसुदर्शोबृंहश्चतथावैश्वेतलोहितः रक्तश्चपीतवासाश्चह्यसितःसर्वरूपकः
एवंकल्पास्तुसंख्याताब्रह्मणोव्यक्तजन्मनः कोटिकोटिसहस्राणिकल्पानांमुनिसत्तमाः गतानितावच्छेषां
सग्रहर्क्षतानिवैपुरः पुरांतेवैविकाराणिविकारेयांतिनिश्चितं अविकारस्यदेवस्यशिवस्यैववशेनतु संहृ
तेवविकारेतुप्रधानेचात्मनिस्थिते साधर्म्येणावतिष्ठेतेप्रधानपुरुषावुभौ गुणानांचैववैषम्येविप्राःसृष्टि
रितिस्मृता साम्येलयोगुणानांतुतयोर्हेतुर्महेश्वरः लीलयादेवदेवेनसर्गास्त्वीदृग्विधाःकृताः असंख्याता
स्तुसंक्षेपात्प्रधानाद्यधितिष्ठता असंख्याताश्चकल्पाख्याअसंख्याताःपितामहाः हरयश्चाप्यसंख्याताएक
एवमहेश्वरः प्रधानादिप्रवृत्तानिलीलयाप्राकृतानितु गुणात्मिकानितद्वृत्तिस्तस्यदेवस्यवैत्रिधा अप्राकृत
स्यतस्यादिमध्यांतंनास्तिचात्मनः पितामहस्याप्यपरःपरार्धद्वयसंमतः दिवासृष्टंतुयत्सर्वंनश्यतेनिशिचा
स्यतत् भूर्भुवःस्वर्महस्तत्रनश्यतेचोर्ध्वतोनच रात्रौचैकार्णवेब्रह्मानष्टेस्थावरजंगमे सुष्वापांभसियत्तस्मान्ना

६

6

55

स्यैष्यस्यविप्रेंद्रादिव्यमानेनकीर्तितं सहस्राणांशतान्यासंख्यातर्दशचसंख्यया चत्वारिंशत्सहस्राणितथान्यानि
कृतेयुगे तथादशसहस्राणांवर्षाणांशतसंख्यया अशीतिश्चसहस्राणिकालस्त्रेतायुगस्यसः सप्तैवनियु
तान्याऊर्ध्ववर्षाणांमानुषाणिवै विंशतिश्चसहस्राणिकालःसद्वापरस्यतु तथाशतसहस्राणिवर्षाणांत्री
णिसंख्यया षष्टिश्चैवसहस्राणिकालःकलियुगस्यच एवंचातुर्युगःकालऋतेसंध्यांशकात्स्मृतः नि
युतान्येवषट्त्रिंशन्निरंशानितानिवै चत्वारिंशत्तथात्रीणिनियुतानीहसंख्यया विंशतिश्चसहस्राणिसं
ध्यांशश्चविभाव्यते एवंचतुर्युगाख्यानांसाधिकोह्येकसप्ततिः कृतत्रेतादियुक्तानांमनोरंतरमुच्यते मन्वं
तरस्यसंख्याचवर्षाग्रेणेहकीर्तिता त्रिंशत्कोट्यस्तुवर्षाणांमानुषेणद्विजोत्तमाः सप्तषष्टिस्तथान्यानिनि
युतान्यधिकानितु विंशतिस्तुसहस्राणिकालोयंसांध्यकंविना मन्वंतरस्यसंख्येषालैंगेस्मिन्कीर्तिताद्वि
जाः चतुर्युगस्यचतथावर्षसंख्याप्रकीर्तिता चतुर्युगसहस्रोवैकल्पश्चैवद्विजोत्तमाः निशांतेसृजतेलोकान्
नश्यंतेनिशिजंतवः तत्रवैमानिकानांतुअष्टाविंशतिकोटयः मन्वंतरेषुसंख्यानाःसांतरेषुयथातथा त्री
णिकोटिशतान्यासन्कोट्योद्विनवतिस्तथा कल्पेतीतेचवैविप्राःसहस्राणांतुसप्ततिः पुनस्तथाष्टसाहस्रं
सर्वत्रैवंसमासतः कल्पावसानिकांस्त्यक्त्वाप्रलयेसमुपस्थिते महर्लोकात्प्रयांत्येतेजनलोकंजनास्ततः को
टीनांद्वेसहस्रेतुअष्टौकोटिशतानिच त्रिषष्टिश्चतथाकोट्योनियुतानिचसप्ततिः कल्पार्द्धसंख्यादिव्यावैक॰

ऋभुंसनत्कुमारंचससर्जादौसनातनः तौचोर्ध्वरेतसौदिव्यौचाग्रजौब्रह्मवादिनौ कुमारौब्रह्मणस्तुल्यौसर्वज्ञौसर्व
भाविनौ वक्ष्येभार्याकुलंतेषांमुनीनामग्रजन्मनां शतरूपांतुवैराज्ञीविराजमसृजत्प्रभुः स्वायंभुवात्तुवैराज्ञीशत
रूपातुयोनिजा लेभेपुत्रद्वयंरम्यंतस्मात्कन्याद्वयंचसा उत्तानपादोह्यवरोधीमाञ्ज्येष्ठःप्रियव्रतः ज्येष्ठावरिष्ठा
त्वाकूतिःप्रसूतिश्चानुजास्मृता उपयेमेतदाकूतिंरुचिर्नामप्रजापतिः प्रसूतिंभगवान्दक्षोलोकधात्रींतयो
गिनीं दक्षिणासहितंयज्ञमाकूतिःसुषुवेतदा दक्षिणाजनयामासदिव्यान्द्वादशपुत्रकान् प्रसूतिःसुषुवेदक्षा
च्चतुर्विंशतिकन्यकाः श्रद्धांलक्ष्मींधृतिंतुष्टिंपुष्टिंमेधांक्रियांतथा बुद्धिंलज्जांवपुःशांतिंसिद्धिंकीर्तिंमहातपो
ख्यातिंसतींचसंभूतिंस्मृतिंप्रीतिंक्षमांतथा संनतिंचानसूयांचऊर्ज्जांस्वाहांसुरारणिं स्वधांचैवमहा
भागांप्रददौचयथाक्रमं श्रद्धाद्याश्चैवकान्यतास्त्रयोदशकुमारिकाः धर्मंप्रजापतिंजग्मुःपतिंपरमदुर्लभाः
उपयेमेभृगुर्धीमान्ख्यातिंतांभार्गवारणिं संभूतिंतुमरीचिस्तुस्मृतिंश्चैवांगिरामुनिः प्रीतिंपुलस्त्यःपुण्यात्मा
क्षमांतांपुलहोमुनिः क्रतुश्चसन्नतिंधीमानत्रिश्चाप्यनसूयिकां ऊर्ज्जांवसिष्ठोभगवान्वसिष्ठांवारिजेक्षणां॥
विभावसुस्तथास्वाहांस्वधांवैपितरस्तथा पुत्रीकृतासतीयासामानसीशिवसंभवा दक्षेणचजगद्धात्रीरुद्रमे
वाश्रितापतिं अर्द्धनारीश्वरंदृष्ट्वासर्गादौकनकांडजः विभजस्वेतिचाहादौयदाजातातदाप्रभुः तस्माच्चैवांशजाः
सर्वाःस्त्रियस्त्रिभुवनेतथाः एकादशविधारुद्रास्तस्यचांशोद्भवाःस्मृताः स्त्रीलिंगमखिलंसावैपुंल्लिंगंनीललो

कमलो:

रायणइतिस्मृतः सर्वस्यांतेववृद्धोवैदृष्ट्वाशून्यंचराचरं सृष्टुंतदामतिंचक्रेब्रह्माब्रह्मविदांवरः अंभसावाप्लुतां
क्ष्मोंतांसमादायसनातनः पूर्ववत्स्थापयामासतदर्थंरूपमास्थितः नदीनदसमुद्रांश्चपूर्ववच्चाकरोत्प्रभुः कृ
त्वाधरांप्रयत्नेननिम्नोन्नतविवर्जितां धरायांसोचिनोत्सर्वान्गिरीन्दग्धान्पुराग्निना भूराद्यांश्चतरोलोकान्क
ल्पयामासपूर्ववत् सृष्टिंचपूर्ववच्चक्रेतदासृष्टुंसनिर्मितिं इतिश्रीलैंगेमहापुराणेचतुर्थोध्यायः ४ सूतउ
यदासृष्टुंमतिंचक्रेमोहश्चासीन्महात्मनः विद्यांश्चापुद्धिपूर्वंतब्रह्मणोव्यक्तजन्मनः तमोमोहोमहामोह
स्तामिस्रश्चांधसंज्ञकः अविद्यापंचधाह्येषाप्रादुर्भूतास्वयंभुवः अविद्ययामुनेर्ब्रह्मः सर्गोमुख्यइतिस्मृतः
असाधकइतिस्मृत्वासर्गोमुख्यःप्रतिष्ठितः अन्यमन्यंततोन्यंवैनगामुख्योद्भवाःस्मृताः त्रिधाकंठामुनेस्त
स्यध्यायतोवैव्यवर्त्तत ऊर्ध्वस्रोतःपरस्तस्यसात्विकःसइतिस्मृतः अर्वाक्स्रोतोनुग्रहश्चतथाभूतादिकःपरः
ब्रह्मणोमहतस्त्वाद्योद्वितीयोभौतिकस्तथा सर्गस्तृतीयश्चैंद्रिकस्तुर्योवैमुख्यइष्यते तैर्यग्योन्यःपंचमोवै
षष्ठोवैदैवतःस्मृतः सप्तमोमानुषोविप्राश्चाष्टमोनुग्रहःस्मृतः नवमश्चैवकौमारःप्राकृतावैकृतास्त्विमे
पुरस्तादसृजद्देवःसनंदंसनकंतथा सनातनंमुनिश्रेष्ठानैष्कर्म्येणगताःपरं मरीचिभृग्वंगिरसंपुलस्त्यंपुल
हंक्रतुं दक्षमत्रिंवसिष्ठंचसोसृजद्योगविद्यया नवैतेब्रह्मणःपुत्राब्रह्मज्ञाब्राह्मणोत्तमाः ब्रह्मवादिनएवैते
ब्रह्मणःसदृशाःस्मृताः संकल्पश्चैवधर्मश्चह्यधर्मोधर्मसन्निधिः द्वादशैवप्रजास्त्वेताब्रह्मणोव्यक्तजन्मनः

लिं॰
पु॰
८

8

वः ऊर्ज्जा वसिष्ठाद्धैलेभे सुतान्सा सप्तवत्सला ज्यायसी पुंडरीकाक्षा हृष्टिष्ठा वरलोचना रजस्तद्धोत्रोर्ध्ववाहुः सवनश्चा
वनस्तथा सुतपाः शुक्र इत्येते मुनयः सप्त सप्तवः यस्त्वाभिमानी भगवान्भवात्मा पितामहो वह्निरसुः प्रजानां स्वा हा
वतस्मात्स्तु वै सुतानां त्रयं त्रयाणां जगतो हिताय इति श्रीलैंगे महापुराणे पंचमोऽध्यायः ५ सूत उवाच पाव
कः पवमानश्च शुचिरग्निश्च ते स्मृताः निर्मथ्यः पवमानस्तु वैद्युतः पावकः स्मृतः शुचिः सौरस्तु विज्ञेयः स्वा
हापुत्रास्त्रयस्त्वेते पुत्रः पौत्रैरिहासंख्याः संक्षेपः प्रोच्यते धुना विसृज्य सप्तकं चाद्यौ चत्वारिंशत्तथैव च इत्ये
ते वह्नयः प्रोक्ताः प्रणीयंते ध्वरेषु ये सर्वे तपस्विनस्त्वेते सर्वे व्रतव्रतास्तथा प्रजानां पतयः सर्वे सर्वे रुद्रात्मकाः
स्मृताः अयज्वानश्च यज्वानः पितरः प्रीतमानसाः अग्निष्वात्ताश्च यज्वानः शेषा वर्हिषदः स्मृताः मेनां तु मा
नसीं तेषां जनयामास वै स्वधा अग्निष्वात्तात्मजा मीना मानसी लोकविश्रुता असूत मेना मैनाकं क्रौंचं तस्यानु
जामुमां गंगां हैमवतीं जज्ञे भवांगाश्लेषपावनीं धारिणीं जनयामास मानसीं यज्ञयामिनी स्वधा सा मेरुराज
स्य पत्नी पद्मसमानना पितरो मृतपाः प्रोक्तास्तेषां वै वेह विस्तरः ऋषीणां च कुलं सर्वं सानुबंधं सविस्तरं वदा
मिश्च परस्ताध्याये संस्थितं वस्तदर्हतः दक्षायणी सती या ता पार्श्वे रुद्रस्य पार्वती पश्चाद्दक्षं विनिंद्यैषा पतिं लेभे भवं त
दा तां ध्यात्वासृजद्रुद्रांस्त्वनेकान्नीललोहितः आत्मनस्तु समान्सर्वान्सर्वलोकनमस्कृतान् याजिनो ह्यनिशा
र्दला ब्रह्माणं प्राह सन्नाणात् तैस्तु संछादितं सर्वं चतुर्दशविधं जगत् तान्दृष्ट्वा विविधान्रुद्रान्निर्मलान्नीललो

हितः ततोदृष्ट्वाभगवान्ब्रह्मादत्तमालोक्यसुव्रतां भजस्वधांशीजगतांममापिवनवाएवि पुत्राणोनरकान्नाशीदृः
खात्पुत्रीत्विहोक्तितः तस्मात्पुत्रीसतीनाम्नातवैषाचभविष्यति एवमुक्तस्तदादत्तोनियोगाद्ब्रह्मणोमुने त
थापुत्रींददौसात्वात्मतींरुद्रायसादरं धर्मस्यपत्न्यःश्रद्धाद्याःकीर्तितावैत्रयोदश तास्सुधर्मप्रजांवक्ष्येयथा
काममनुत्तमां कामोदर्थोत्थनियमःसंतोषोलोभएवच श्रुतश्चदंडःसमयोवोधश्चसमहाद्युतिः अप्रमाद
श्चविनयोव्यवसायोद्विजोत्तमाः क्षेमंशुभंयशश्चैवधर्मपुत्राश्चतास्सवै धर्मस्यविक्रियायास्तुदंडःसमयए
वच अप्रमादस्तथावोधोवृद्धेर्धर्मस्यतौसुतौ तस्मात्पंचदशैवैतेतास्सुधर्मात्मजास्त्विह भृगुपत्नीचसुषुवे
ख्यातिर्विष्णुप्रियांश्रियं धातारंचविधातारंमेरोर्जामातरावुभौ संभूतिर्नामयापत्नीमरीचेःसुषुवेसुतौ पौर्ण
मासंचमारीचंततःकन्याचतुष्टयं सृष्टिर्नैपुष्टावदेवृष्टिःकृषिश्चापचितिस्तथा क्षमाचसुषुवेपुत्रोपुत्रींचपुल
हात्मुभौ कर्दमंचवरीयांसंसहिष्णुंमुनिसत्तमाः तथाकनकपीतांसपीवरींपृथिवींसमां प्रीत्यांपुलस्त्यस्तथा
जनयामाससैवसुतान् दत्तोर्णदेववाजंचपुत्रीवान्यांहृस्वष्टनी पुत्राणांषष्टिसाहस्रंसंततिःसुषुवेशुभा क्रतोश्च
भार्यातेसर्वैवालखिल्याइतिस्मृताः सिनीवालींकुहूंचैवराकामनुमतीमपि स्मृतिश्चसुषुवेपत्नीमुनेश्चांगि
रसस्तथा लब्धानुभावमग्निंचकीर्तिमंतंचसुव्रताः अत्रेर्भार्यानुसूयाचसुषुवेषट्प्रजाश्शुभा तास्वेकाकन्य
कानाम्नाश्रुतिःसासुतुपंचकं सत्यनेत्रोमुनिर्भव्योमूर्तिरापःशनैश्चरः सोमश्चवैश्रुतिःषष्टीपंचात्रेयाश्चसून

लिंग. पु. ८

नमहात्मते कर्मणा कर्मणा वापि ध्यानेनकोन्तहृल्लेहिनः इति लैंगे महापुराणे रुद्रस्तोत्रो षष्ठोऽध्यायः ६ सूत उवाच रहस्यं
वः प्रवक्ष्यामि भवस्यामिततेजसः प्रभावं शंकरस्याद्यं संक्षेपात्सर्वदर्शिनः योगिनः सर्वसत्वज्ञाः परं वैराग्यमाश्रिताः
प्राणायामैः स्वनिष्ठाश्च समाधानैः सहृत्वारिणः कारुण्यादिगुणोपेताः कृत्वापि विविधानि वै कर्माणि नरकं स्वर्गं न ग
छंत्येव कर्मणा प्रसादाज्जायते ज्ञानं ज्ञानाद्योगः प्रवर्तते योगेन जायते मुक्तिः प्रसादादखिलं ततः ऋषय ऊचुः प्र
सादाद्यदि वै ज्ञानं स्वरूपं वक्तुमर्हसि दिव्यं माहेश्वरं चैव योगं योगविदां वर कथं करोति भगवान्चिंतया सहितः शिवः
प्रसादं योगमार्गेण कस्मिन्काले नृणां विभुः सूत उवाच देवानां च ऋषीणां च पितृणां सन्निधौ पुरा शैलादिना तु क
थितं श्रृणुत ब्रह्मसूनवे व्यासावताराणि यथा द्वापरांते तु सुव्रताः योगाचार्यावताराणि तथा तिष्ये तु शूलिनः तत्र
तत्र विभोः शिष्याश्चत्वारः समभाजनाः सशिष्या वह्नवस्तेषां प्रसीदत्येवमीश्वरः एवं क्रमागतं ज्ञानं मुखाद्देव नृणां
विभो। वैश्यांते ब्राह्मणाद्यं च हृणया वाच्यमूपतः ऋषय ऊचुः द्वापरे द्वापरे व्यासाः के ते किं चांतरेषु वै कल्पेषु कस्मि
न्कल्पे को वक्तुमर्हसि चाव्रतान् रोमहर्षण उवाच श्रृणुत कल्पे वाराहे हि द्विजा वैवस्वतांतरे व्यासांश्च सांप्रतं रुद्रांस्तथा
सर्वांतरेषु ते वेदानां तु पुराणानां तथा ज्ञानप्रदर्शनात् यथाक्रमं प्रवक्ष्यामि सर्वावर्तेषु सांप्रतं ऋतुः सत्यो भार्गव
श्चांगिराः सविता द्विजाः मृत्युः शतक्रतुर्धीमान्वसिष्ठो मुनिपुंगवः सारस्वतस्त्रिधामा च सुव्रतो मुनिपुंगवाः शुभ
तेजाः स्वधर्मश्च नारायण इति स्मृतः तरक्षुश्चारुणिर्धीमांस्तथा चैव कृतंजयः ऋतंजयो भरद्वाजो गौतमः कविस

हिताय जरामरणनिर्मुक्तान् प्राह रुद्रान्पितामहः । नमोस्तु वो महादेवास्त्रिनेत्रा नीललोहिताः । सर्वज्ञाः सर्वगा दीर्घा ह्र-
स्वा वामनकाः शुभाः । हरिकेशा महादंष्ट्रा नित्या बुद्धाश्च निर्मलाः । निर्द्वन्द्वा वीतरागाश्च विश्वात्मानो भवात्मजाः । एवं स्तु-
त्वा तदा रुद्रान् रुद्रमाह भवं शिवं । प्रदक्षिणीकृत्य तदा भगवान्कमलोद्भवः । नमोस्तु ते महादेव प्रजानार्हसि शंकर मृ-
त्युहीना विभो स्रष्टुं मृत्युयुक्ताः सृज प्रभो । ततस्तमाह भगवान्नहि मे तादृशी स्थितिः । स त्वं सृज यथाकामं मृत्युयुक्ताः
प्रजाः प्रभो । लब्ध्वानुज्ञां ससर्जाथ शंकराच्चतुराननः । जरामरणसंयुक्तं जगदेतच्चराचरं । शंकरोपि तदा रुद्रैर्निवृत्ता-
त्मा ह्यधिष्ठितः । स्थाणुत्वं तस्य वै विप्राः शंकरस्य महात्मनः । निष्कलस्यात्मनः शंभोः स्वेच्छाधृतशरीरिणः । शं रुद्रः
सर्वभूतानां करोति घृणया यतः । शंकरश्चाश्रयत्वेन तदात्मा योगविघ्रतः । वैराग्यात् शंविरक्तस्य विरक्तिर्यत्न उच्यते
प्रणोक्त विषयत्यागः संसारभयतः क्रमात् । वैराग्याज्जायते पुंसो विरागो दर्शनांतरे । विरक्तो वैगुण्यात्यागो विज्ञानस्यावि-
चारतः । तस्य चास्य च सर्वं यं प्रसादात्परमेष्ठिनः । धर्मो ज्ञानं च वैराग्यमैश्वर्यं शंकराद्द्विज । स एव शंकरः साक्षात्पिनाकी नी-
ललोहितः । ये शंकराश्रिताः सर्वे मुच्यंते ते न शंकरः । न गच्छंत्येव नरकं पापिष्ठा अपि दारुणं । आश्रिताः शंकरे यस्मा-
दाश्रयं तिव शाश्वतं [illegible] मायेनाश्चैव घोराया अष्टाविंशतिरेव तु । कोटयो नरकाणां तु पच्यंते ता सपापि-
नः । अनाश्रिताः शिवं रुद्रं शंकरं नीललोहितं । आश्रयं सर्वभूतानामनामयमजापतिं । पुरुषं परमात्मानं पुरुहूतं
पुरुष्टुतं । नमसा कालरुद्राख्यं रजसा कनकांडजं । सत्वेन सर्वगं विष्णुं निर्गुणत्वे महेश्वरं । के न गच्छंति नरकं नराके

निस्रष्टाद्वापरेद्वापरेत्विमे योगेश्वराणांचत्वारःशिष्याःप्रत्येकमव्ययाः श्वेतःश्वेतशिखश्चैवश्वेताश्वःश्वेतलोहितः दुंदु
भिःशतरूपश्चऋचीकःकेतुमांस्तथा विशोकश्चविकेशश्चविपाशःपाशनाशनः सुमुखोदुर्मुखश्चैवदुर्मदोदुरतिक्रमः
सनकःसनातनश्चैवप्रभुर्यश्चसनंदनः ऋतुःसनत्कुमारश्चसुधामाविरजास्तथा शंखपाद्वैनतश्चैवमेघःसारस्वतस्त
था सुवाहनोमुनिश्रेष्ठोमेघवाहोमहाद्युतिः कपिलश्चासुरिश्चैवतथापंचशिखोमुनिः वल्कश्चमहायोगीधर्मा
त्मानोमहौजसः पराशरश्चगर्गश्चभार्गवश्चांगिरास्तथा वलवंधुर्निरामित्रःकेतुशृंगस्तपोधनः लंबोदरश्चलंबश्च
लंबात्मालंबकेसरः सर्वज्ञःसमबुद्धिश्चसोम्यःसाम्यस्तथैवच सुधामाकाश्यपश्चैववसिष्ठोविरजास्तथा अत्रीरुद्रस्त
थाचैवश्रवणोथश्रविष्टकः काश्यपोह्युशनाचैवच्यवनोथबृहस्पतिः उतथ्योवामदेवश्चमहाकायोमहानिलः वा
चःश्रवाःसुधीकश्चसवाकःस्वयमीश्वरः हिरण्यनाभःकौशल्योलौगाक्षिःकुथुमिस्तथा सुमंतुर्ववरिर्धीमानकुवं
धःकुशकंधरः प्लक्षोदर्भायणिश्चैवकेतुमान्गोपनस्तथा भल्लावीमधुपिंगश्चश्वेतकेतुस्तथैवच ऋषिजोवृहदुक्थश्च
देवलःकविरेवच शालिहोत्रोग्निवेश्यश्चयुवनाश्वःशरद्वसुः छागलःकुंडकर्णश्चप्रवादश्चप्रवाहकः उलूकोविद्यु
तश्चैवमंडूकोह्याश्वलायनः अक्षपादःकुमारश्चउलूकोवत्सएवच कुशिकश्चैवगर्गश्चमित्रःकोरुषएवच शिष्यास्त्व
तेमहात्मानःसर्वावर्तेषुयोगिनां विमलाब्रह्मभूयिष्ठाज्ञानयोगपरायणाः एतेपाशुपताःशुद्धाभस्मोद्धूलितविग्रहाः
शिष्याःप्रशिष्यास्तेषांवैशतशोथसहस्रशः प्राप्यपाशुपतंयोगंरुद्रमूर्तिमयाःस्थिताः देवादयःपिशाचांताःपशवः

सत्तमः जातकर्णोहरिःसाक्षात्कृष्णद्वैपायनःप्रभुः व्यासास्त्वेतेवशृएवंतुकलौयोगीश्वरान्क्रमात् असंख्याताहिक
ल्पेषुविभोःसर्वांतरेषुच कलौरुद्रावताराणांव्यासानांकिलगौरवात् वैवस्वतेंतरेकल्पेवाराहेयेचतान्पुनः अवतारान्
प्रवक्ष्यामितथासर्वांतरेषुवै ऋषयऊचुः मन्वंतराणिवाराहेवक्तुमर्हसिसांप्रतं तथैववोर्द्धकल्पेषुसिद्धान्वैवस्वतेंतरे
रोमहर्षणउवाच मनुःस्वायंभुवश्चाद्यस्ततःस्वारोचिषोद्विजाः उत्तमस्तामसश्चैवरैवतश्चाक्षुषस्तथा वैवस्वतश्चसाव
र्णिर्धर्मसावर्णिकःपरः पिशंगश्चापिशंगाभःशवलोवर्णकस्तथा ककारांताश्चकाराद्यामनवःपरिकीर्तिताः श्वे
तःपांडुस्तथारक्तस्ताम्रःपीतश्चकापिलः कृष्णःश्यामस्तथाधूम्रःसुधूम्रश्चद्विजोत्तमाः अपिशंगःपिशंगश्चत्रिवर्णःश
वलस्तथा कर्कंधुरितिख्यातिंवर्णातोमनवःशुभाः नामतोवर्णतश्चैववर्णतःपुनरेवच स्वरात्मनःसमाख्याताश्चांत
रेशाःसमासतः वैवस्वतश्चकारस्तुमनुःकृष्णःसुरेश्वरः सप्तमस्तस्यवक्ष्यामियुगावर्त्तेषुयोगिनः समतीतेषुकल्पेषु
कां॰७२ तथाचानुगतेषुच वाराहेवांतरेतेयाःसमवांतवक्रमात् योगावताराश्चविभोःशिष्याणांसंततिंतथा संक्षेपात्सर्वका
ग॰२ लेषुतथावर्त्तेषुयोगिनां आद्येश्वतःकलौरुद्रःसुतारोमदनस्तथा सुहोत्रःकंकणश्चैवलोकाख्योमुनिसत्तमाः जैगी
षव्योमहातेजाभगवान्दधिवाहनः ऋषभश्चमुनिर्धीमानुग्रश्चात्रिस्सुपालकः गौतमश्चैवगोकर्णोमहावासाःशि
खंडभृक् जटामाल्यट्टहासश्चदारुकोलांगलीतथा महाकायोमुनिःशूलीडिंडीमुंडीश्वरःस्वयं सहिष्णुःसोमशर्मा
नकुलीशोथजगद्गुरुः वैवस्वतेंतरेसम्यक्प्रोक्ताहिपरमात्मनः योगाचार्यावतारायेसर्वावर्त्तेषुसुव्रताः व्यासास्त्वेवंतु

मनोवाक्कायकर्मणा ब्रह्मचर्यमितिश्रोक्तं यतीनां ब्रह्मचारिणां॥ इह वैखानसानां च विधुराणां विशेषतः सदाराणां
गृहस्थानां तथैव च वदामि वः स्वदारान्विधिवत्कृत्वा निवृत्तिश्चान्यतः सदा कर्मणा मनसा वाचा ब्रह्मचर्यमिति स्मृतं॥
मेध्यं स्वनारीं संभोगं गत्वा स्नानं समाचरेत् एवं गृहस्थो युक्तात्मा ब्रह्मचारी न संशयः॥ अहिंसाप्येवमेवैषां द्विजगुर्वग्निपू
जने विधिना या हृषी हिंसा सा त्वहिंसा इति स्मृता स्त्रियः सदा परित्याज्याः संगं चैव न कारयेत् कुणपेषु यथा चित्तं त
था कुर्याद्विचक्षणः विण्मूत्रोत्सर्गकाले षु बहिर्भूमौ यथा मतिः तथा कार्या रतौ चापि स्वदारेषु न चान्यतः अंगारस
दृशी नारी घृतकुंभसमः पुमान् तस्मान्नारीषु संसर्गं दूरतः परिवर्जयेत् भोगेन तृप्तिर्नैवास्ति विषयाणां विचारतः
तस्माद्विरागः कर्तव्यो मनसा कर्मणा गिरा न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय
एवाभिवर्द्धते तस्मात्त्यागः सदा कार्यं अमृतत्वाय योगिना अविरक्तो यतो मर्त्यो नानायोनिषु वर्तते त्यागेनैवामृत
त्वं हि इति वेदविदां वरः कर्मणा प्रजया नास्ति द्रव्येण मुनिसत्तमाः तस्माद्विरागः कर्तव्यो मनोवाक्कायकर्मभिः
ऋतौ रतिनिवृत्तिश्च ब्रह्मचर्यमिति स्मृतं यमाः संक्षेपतः प्रोक्ता नियमांश्च वदामि वः नियमः स्यादनीहा च शौचं
तुष्टिस्तपस्तथा जपः शिवप्रणिधानं पद्मकाद्यं तथासनं वाह्यमाभ्यंतरं प्रोक्तं शौचमाभ्यंतरं वरं वाह्यशौचेन सं
युक्तं सदैवाभ्यंतरं चरेत् स्नानं विधानतः सम्यक्पश्चादाभ्यंतरं चरेत् आदेहांतं मृदालिप्य तीर्थतोयेषु सर्वदा अ
वगाह्यापि मलिनो ह्यंतःशौचविवर्जितः शैवालाझषकामत्स्याः सत्वा मत्स्योपजीविनः सदावगाह्य सलिले वि

परिकीर्तिताः तेषांपतित्वात्सर्वेशोभवःपशुपतिःस्मृतः तेनप्रणीतोरुद्रेणपशूनांपतिनाद्विजाः योगःपाशुपतोज्ञेयः
परावरविभूतये इतिश्रीलैंगेपुराणेरुद्रावतारोनामशंकरोत्पत्तौचसप्तमोध्यायः ७ सूतउवाच संक्षेपतःप्रव
क्ष्यामियोगस्थानानिसांप्रतं कल्पितानिशिवेनैवहितायजगतांद्विजाः गलादधोवितस्त्यांयन्नाभेरुपरिचोत्तमे
योगस्थानमधोनाभेरावर्तंमध्यमंभ्रुवोः सर्वार्थज्ञानसंपत्तिरात्मनोयोगउच्यते एकाग्रताभवेच्चैवसर्वदातत्प्रसा
दतः प्रसादस्यस्वरूपंयत्स्वसंवेद्यंद्विजोत्तमाः वक्तुंनशक्यंपद्मैस्तैःक्रमशोजायतेनृणां योगशब्देननिर्वाणंमाहे
शंपदमुच्यते तस्यहेतुरृषेर्ज्ञानंज्ञानंतस्यप्रसादतः ज्ञानेननिर्दहेत्पापंनिरुध्यविषयान्सदा निरुद्धेंद्रियवृत्तेस्तु
योगसिद्धिर्भविष्यति योगोनिरोधोवृत्तेषुचित्तस्यद्विजसत्तमाः साधनान्यष्टधाचास्यकथितानीहसिद्धये यमस्तु
प्रथमःप्रोक्तोद्वितीयोनियमस्तथा तृतीयमासनंप्रोक्तंप्राणायामस्ततःपरं प्रत्याहारःपंचमोवैधारणाच
षष्ठउच्यते ध्यानंसप्तममित्युक्तंसमाधिस्त्वष्टमःस्मृतः तपस्युपरमश्चैवयमइत्यभिधीयते अहिंसाप्रथमोहेतु
र्यमस्ययमिनांवराः सत्यमस्तेयमपरंब्रह्मचर्यापरिग्रहौ नियमस्यापिवैमूलंयमएवनसंशयः आत्मवत्सर्वभू
तानांहितायैवप्रवर्तनं अहिंसैषासमाख्यातायाचात्मज्ञानसिद्धिदा दृष्टंश्रुतंचानुमितंस्वानुभूतंयथार्थतः क
थनंसत्यमित्युक्तंपरपीडाविवर्जितं नाश्लीलंकीर्तयेदेवंब्राह्मणानामितिश्रुतिः परदोषान्परिज्ञायनवदेदि
तिचापरं अनादानंपरस्वानामापद्यपिविचारतः मनसाकर्मणावाचातदस्तेयंसमासतः मैथुनस्याप्रवृत्तिर्हि

लिंग॰ पु॰ १२

मीरणः स्वस्योद्धारार्थस्तु योगिनां न्यायतः सेव्यमानस्तु स एवाभ्याशतां व्रजेत् स चैवं मृगराट् नागः शरभो वापि दुर्मदः
कालांतरवशाद्योगात् दम्यते परमादरात् सर्वपरिचयात्स्वास्थ्यं समत्वं वाधिगच्छति योगादभ्यस्यमानस्तु श्वसनस्थे स्वयमेव
हृज्जायते एवमभ्यस्यमानस्तु मुनेः प्राणो विनिर्दहेत् मनोवाक्कायजान्दोषान्कर्तुर्देहं च रक्षति संयुक्तस्य तथा सम्य
क्प्राणायामेन धीमतः दोषात्तस्माच्च नश्यंति निश्वासस्तेन जायते प्राणायामेन सिद्ध्यंति दिव्याः शांत्यादयः क्रमात्
शांतिः प्रशांतिर्दीप्तिश्च प्रसादश्च यथाक्रमं आदौ चतुष्टयस्येह प्रोक्ता शांतिरिह द्विजाः सहजागंतुकानां च पापा
नां शांतिरुच्यते प्रशांतिः संयमः सम्यक् तपसामिति संस्मृता प्रकाशो दीप्तिरित्युक्तः सर्वदा सर्वदा पुनः सर्वेंद्रियप्र
सादस्तु बुद्धेर्वै मरुतामपि प्रसाद इति संप्रोक्तः स्वांते त्विह चतुष्टये प्राणोपानः समानश्च उदानो व्यान एव च नागः कूर्म
र्मः कृकरो देवदत्तो धनंजयः एतेषां यः प्रसादस्तु मरुतामिति संस्मृतः प्रयाणं कुरुते यस्मात् वायुः प्राण इति स्मृतः
अपानयत्यपानस्तु आहारादीन्क्रमेण तु व्यानो व्यानयत्यंगं व्याधानादीनां प्रकोपनं उद्वेजयति मर्माणि उदानोयं प्रा म॰
कीर्तितः समानयति गात्राणि समानः पंच वायवः उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः कृकरः क्षवके चैव देव
दत्तो विजृंभणे धनंजयो महाघोषः सर्वगः स मृतेपि हि इति यो दश वायूनां प्राणायामेन सिद्ध्यति प्रसादोयस्तुरीयोतः
संतो विप्राश्चतुष्टये वितर्कस्तु महान्प्राज्ञा मनो ब्रह्मा चितिः स्मृतिः ख्यातिः संवित्ततः पश्चादीश्वरो मतिरेव च बुद्धेरेता
द्विजाः संज्ञा महतः परिकीर्तिताः अस्या बुद्धेः प्रसादस्तु प्राणायामेन सिद्ध्यति विवरो विवरीभावाहृद्धानां मुनिसत्त

स्वयमेव

धनंजयो महाघोषः सर्वगात्रे यतोहि सः ८

12

१२

शुद्धाःकिंहिजोत्तमाः तस्मादाभ्यंतरंशौचंसदाकार्यंविजानता आत्मज्ञानांभसिस्नात्वासकृदालिप्यभावतः सुवैराग्य
मृदाशुद्धःशौचमेवंप्रकीर्तितं शुद्धस्यसिद्धयोनैवयदशुद्धस्यसिद्धयः न्यायेनागतयावृत्त्यासंतुष्टोयस्तुसुव्रताः
संतोषस्तस्यसततमतीतार्थस्यचास्मृतिः चांद्रायणादीनिपुनस्तपांसिसुशुभानिच स्वाध्यायिनःसजपःप्रोक्तः। स्वाध्यायस्तुज पःप्रोक्तः
प्रणवस्यत्रिधामतः वाचिकस्त्वधमोमुख्यउपांशुश्चोत्तमोत्तमः मानसोविस्तरेणैवकल्पेपंचाक्षरेस्मृतः तथा
शिवप्रणिधानंमनोवाक्कायकर्मभिः शिवज्ञानेगुरौभक्तिरचलासुप्रतिष्ठिता निग्रहेह्यपहृत्याशुप्रसक्तानीं
द्रियाणिच विषयेषुसमासेनप्रत्याहारःप्रकीर्तितः चित्तस्यधारणाप्रोक्तास्थानबंधःसमासतः तस्यांतस्यांतु
ध्यानंसमाधिस्यविचारतः तत्रैकताततोध्यानंप्रत्ययांतरवर्जितं चिद्भासमर्थमात्रस्यदेहशून्यमितिस्थितिः स
माधिःसर्वदेहस्यप्राणायामइतिस्मृतः प्राणःस्वदेहजोवायुर्यमस्तस्यनिबंधनं त्रिधाहिजैर्यमःप्रोक्तोमंदोमध्यो
त्तमस्तथा प्राणापाननिरोधश्चप्राणायामइतिस्मृतः प्राणायामस्यमानंतुमात्राद्वादशकंस्मृतं नीचोद्वादशमा।
त्रस्तयतोद्वादशकःस्मृतः मध्यमस्तुद्विरुद्धातश्चतुर्विंशतिमात्रकः मुख्यस्तुयस्त्रिरुद्धातःषट्त्रिंशन्मात्रउच्यते प्र
स्वेदकंपनोत्थानजनकश्चयथाक्रमं आनंदोद्भवयोगार्थंनिद्राघूर्णिस्तथैवच नेत्रयोरेयकारःस्याद्रोमांचेहिज
कंपनं भ्रमणंस्वेदजाड्यांगसंधिमूर्छादयोपिच तदोत्तमोत्तमःप्रोक्तः प्राणायामस्तुशोभनः गर्भोगर्भइतिप्रोक्तः
सजपोविजपःक्रमात् इभोवाशरभोवापिदुराधर्षोथकेसरी गृहीतःसेव्यमानस्तुयथास्वस्थस्तुजायते तथास

लिंग० पु० १२

षणौरक्षंस्तथाप्रजननंपुनः किंचिदुन्नमितशिरादंतैर्दंतान्नसंस्पृशेत् संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलोकयन् तमः
प्रच्छाद्यरजसासत्वेनाच्छादयेद्रजः ततःसत्वस्थितोभूत्वाशिवध्यानंसमभ्यसेत् ॐकारवाच्यंपरमंशुद्धंदीपशिखाकृतिं
ध्यायेद्वैपुंडरीकस्यकर्णिकायांसमाहितः नाभेरधस्ताद्वाविद्वान्ध्यात्वाकमलमुत्तमं त्र्यंगुलेचाष्टपत्रंतथाग्रणा
षट्कमिदंपुरः त्रिकोणंचतथाग्नेयंसौम्यंसौरंस्वशक्तिभिः सौरंसौम्यंतथाग्नेयमथवानुक्रमेणतु आग्नेयंचतथा
13 सौरंसौम्यमेवविधानतः अग्नेरधःप्रकल्प्यैवधर्मादीनिचतुष्टयं गुणत्रयक्रमेणैवमंडलोपरिभावयेत् सत्वस्थं
चिंतयेद्रुद्रंस्वशक्त्यापरिमंडितं नाभौवाथगलेचापिभ्रूमध्येवायथाविधि ललाटफलिकायांवामूर्ध्निध्यानंसमा
द्विदले चरेत् द्विदलेषोडशारेवाद्वादशारेक्रमेणतु दशारेवाषडस्रेवाचतुरस्रेस्मरेच्छिवं कनकाभेतथांगारसन्निभेसुसि
तेपिवा द्वादशादित्यसंकाशेचंद्रबिंबसमेपिवा विद्युत्कोटिनिभेस्थानेचिंतयेत्परमेश्वरं अग्निवर्णेथवाविद्युद्व
लयाभेसमाहितः वज्रकोटिप्रभेस्थानेपद्मनागनिभेपिवा नीललोहितबिंबेवायोगीध्यानंसमभ्यसेत् महेश्वरं
हृदिध्यायन्नाभिमध्येसदाशिवं दिव्येथशाश्वतेस्थानेशिवध्यानंसमभ्यसेत् निर्मलंनिष्कलंब्रह्मप्रशांतंज्ञानरू
पिणं अलक्षणमनिर्देश्यमणोरल्पतरंशुभं निरालंबमतर्क्यंचविनाशोत्पत्तिवर्जितं कैवल्यंचैवनिर्वाणंनिःश्रेय
समनाश्रयं अमृतंचाक्षरंब्रह्मह्यपुनर्भवमद्भुतं महानंदंपरानंदंयोगानंदमनामयं हेयोपादेयरहितंसूक्ष्मात्सूक्ष्म
तरंशुभं स्वसंवेद्यमवेद्यंतच्छिवंज्ञानमयंपरं मनस्येवंमहादेवंहृत्पद्मेवाथचिंतयेत् अतींद्रियंमहाभावंपरंतत्त्वप

माः अग्रजः सर्वसत्वानां महान्यत्परिमाणतः यतं प्राणगृहां प्राज्ञा मनस्तं मनुते यतः बृंहणत्वाद्बृहत्वाच्च ब्रह्म ब्रह्मविदां
वराः सर्वकर्माणि भोगार्थं यच्चिनोति चितिः स्मृता स्मरते यच्चितिः सर्वं संविद्धे विंदते यतः ख्यायते त्विति यत्ख्यातिर्ज्ञा
नादिभिरनेकशः सर्वसत्वादियः सर्वं विजानाति यदीश्वरः मनुते मन्यते यस्मात् मतिर्मतिमतां वराः अवबोधयति यच्च
बुध्यते बुद्धिरुच्यते अस्याः बुद्धेः प्रसादस्तु प्राणायामेन सिध्यति दोषान्विनिर्दहेत्सर्वान् प्राणायामादसौ यमी पातकं धा
रणाभिस्तु प्रत्याहारेण निर्जयेत् विषयान्विषवत् ध्यात्वा ध्यानेनानीश्वरान्गुणान् समाधिना यतिः श्रेष्ठः प्रज्ञाबुद्धिं
विवर्द्धयेत् स्थानलब्धैव कुर्वीत योगाष्टांगानि वै क्रमात् बध्वासनानि विविधि योगसिध्यर्थमात्मवित् अदेशयोगस्य ^कालेऽप्रदेशे योगस्य
दर्शनं हि न विद्यते अग्न्यभ्याशे जले वापि शुष्कपर्णचये तथा जंतुव्याप्ते श्मशाने च जीर्णे गोष्ठे चतुष्पथे सशब्दे स
भये वापि चैत्यवल्मीकसंचये अशुभे दुर्जनाक्रांते मशकादिसमन्विते न चरेद्देहबाधायां दौर्मनस्यादिसंभवे सुगुप्ते
च शुभे रम्ये गुहायां पर्वतस्य च भवत्वेत्रगुप्ते च भवारामे वनेपि वा गृहेप्यस्तु शुभे देशे विजने जंतुवर्जिते अत्यंतनिर्म
ले सम्यक् सुधालिप्ते विचित्रिते दर्पणोदरसंकाशे कृष्णागुरुसुधूपिते नानापुष्पसमाकीर्णे वितानोपरिशोभि
ते फलपल्लवमूलाद्यैः कुशपुष्पोपशोभिते समासनस्थो योगांगान्यभ्यसेत्प्रभुवत्स्वयं प्रणिपत्य गुरुं पश्चाद्देवं देवी
विनायकं गौरीश्वरान् ऋषीन् शिष्यांश्च योगे युंजीत योगवित् आसने स्वस्तिके बध्वा पद्मं महासनं तथा समजानुरथो धीमा
नेकजानुरथापि वा समो मध्यैकासनो भूत्वा संहृत्य चरणावुभौ संवृतास्योर्द्धवक्षाश्चोष्ठौ विष्टभ्य चाग्रतः पार्ष्णिभ्यां

शि॰ =

[illegible] [illegible]

हृयंति

विषयेषुविविक्तेषुनंतोविषयलोलता
श्रेतरायाइतिख्यातायोगस्यैतेह्ययोगिनः५

लिंग· पू· ९

नः स्मृतं हृदात्वीकरणं कृत्वा योग्यायोग्यविवेकिनः ॥ प्रत्ययेनोत्साहयुक्तस्य विनश्यंति हि संशयाः ॥ विनष्टेषु तथा येषु हि॥
ज्ञांप योगिनः उपसर्गाः प्रवर्तंते सर्वे ते सिद्धिसूचकाः प्रतिभा प्रथमा सिद्धिर्द्वितीया श्रवणा स्मृता वार्ता तृतीया वि
प्रेंद्रास्तुरीया चेह दर्शना आस्वादः पंचमः प्रोक्तो वेदना षष्टिका स्मृता स्वल्पषट्सिद्धिसंत्यागे सिद्धयः सिद्धयोगिनः प्राति
भा प्रतिभावृत्तिः प्रतिभावञ्चितास्थितिः बुद्धिर्विवेचना वेद्यं बुध्यते बुद्धिरुच्यते सूक्ष्मे व्यवहिते तीते विप्रकृष्टे त्वनागते
सर्वत्र सर्वदा ज्ञानं प्रतिभानुक्रमेण तु श्रावणं सर्वशब्दानामप्रयत्नेन योगिनः ह्रस्वदीर्घप्लुतादीनां गुह्यानां श्रवणा
दपि स्पर्शनाधिगमो यस्तु योगिनामुपपादितः वार्ता तो दिव्यगंधानां तन्मात्रे बुद्धिसंविदः दर्शनाद्दिव्यरूपाणां दर्शनं
चाप्रयत्नतः संविद्दिव्यरसे स्वादो ह्यप्रयत्नतः विंदंति योगिनस्तस्मादाब्रह्मभुवनं हि जाः संत्याज्यं सर्वदा
सर्वमौपसर्गिकमात्मना पैशाचं पार्थिवं तावद्राक्षसानां पुरे हि जाः याक्षं तु तैजसं प्रोक्तं गांधर्वं श्वसनात्मकं ऐंद्रं व्यो
मात्मकं सर्वं सौम्यं चैव तु मानसं प्राजापत्यं त्वहंकारो ब्राह्म्यं बौद्धमनुत्तमं आद्ये चाष्टौ द्वितीये च तथा षोडश सिद्धयः
चतुर्विंशत्तृतीये तु द्वात्रिंशच्च चतुर्थके चत्वारिंशत्पंचमे तु भूतमात्रात्मकं स्मृतं गंधो रसस्तथा रूपं स्पर्शः शब्दस्तथैव
च चतुः षष्ठिगुणं ब्राह्म्यं गुणितं द्विजसत्तमाः औपसर्गिकमाब्रह्मभुवनेषु परित्यजेत् लोकेष्वालोक्य योगेन योगवि
त्परमं सुखं स्थूलता ह्रस्वता बाल्यं वार्द्धकं यौवनं तथा नानाजातिस्वरूपं च चतुर्भिर्देहधारणं पार्थिवांशं विना नित्यं
सुरभीगंधसंग्रहः एतदष्टगुणं प्रोक्तमैश्वर्यं पार्थिवं महत् जले निवसनं यद्वद्भूम्यामिव विनिर्गमः इच्छेच्छक्तः स्वयं

१४

कन्नि८=

णवरं सर्वोपाधिविनिर्मुक्तं ध्यानगम्यं विचारतः अद्वयं तमसश्चैव परस्तात्संस्थितं परं नाभौ सदाशिवं चापि सर्वदेवात्मकं
शुभं देहमध्ये शिवं देवं शुद्धज्ञानमयं विभुं कन्यसेनैव मार्गेण घोण्यस्तेनैव शंकरं कुंभके कन्यसेनापि मध्यमेनापि सु।
व्रताः उत्तमेनापि वै विद्वान् कुंभकेन समभ्यसेत् द्वात्रिंशद्रेचये द्विद्वान् हृदि नाभौ समाहितः रेचकं पूरकं त्यक्त्वा कुंभकं
वह्निजोतमाः साक्षात्समरसेनैव देहमध्ये स्मरेच्छिवं ध्यानेद्वादशकं यावत्समाधिरभिधीयते अथवा ज्ञानिनां विप्राः
संपर्कादेव जायते अयत्नाद्वा नयोस्तस्य संविराद्वाप्यचिरेद्विजाः योगांतरायास्तस्यैव जायंते युंजतः पुनः नश्यंते भ्या
सतस्तेपि प्रणिधानेन वै गुरोः इत्यादिमहापुराणे लैंगे पाशुपतयोगनिर्णये अष्टमोध्यायः ८ सूत उवाच आलस्यं प्रथमे
पश्चाद्व्याधिपीडा व जायते प्रमादः संशयस्थाने चित्तस्येहास्थितिः सदा अश्रद्धादर्शनं भ्रांतिर्दुःखं च त्रिविधं ततः
दौर्मनस्यमयोग्येषु विषयेषु च लोभिता दशधाभिप्रजायंते मुनेर्योगांतरायकाः आलस्यं चाप्रवृत्तिश्च गुरुत्वात्काय
ध्यान= चित्तयोः व्याधयो धातुवैषम्यात्कर्मजा योगजास्तथा प्रमादस्तु समाधेस्तु साधनानामभावनं इदं वेत्युभयं प्रोक्तं विज्ञा
नेस्थानसंशयः अनवस्थितचित्तत्वमप्रतिष्ठा हि योगिनः लब्धायामपि भूमौ तु चित्तस्य भवबंधनात् अश्रद्धा भावर
हिता वृत्तिर्वै साधनेषु च साध्ये चित्तस्य हि गुरौ ज्ञानाचारशिवादिषु विपर्ययज्ञानमिति भ्रांतिरेवास मुच्यते अनात्म।
ज्ञानविज्ञानमज्ञानान्मस्य सन्निधौ दुःखमाध्यात्मिकं प्रोक्तं तथा चैवाधिभौतिकं आधिदैविकमित्युक्तं त्रिविधं सहजं
पुनः इच्छाविघातात्संलोभस्ततमस्तु उदाहृतं दौर्मनस्यं निरोद्धव्यं वैराग्येण परेण तु तमसा रजसा वापि संस्पृष्टं दुर्म

उत्पद्यंते मुनिश्रेष्ठाः मुनेस्तस्य महात्मनः आभ्यासेनैव विज्ञानं
विशुद्धं चास्थिरं भवेत् तेजोरूपाणि सर्वाणि सर्वं पश्यति योग
तः देवबिंबान्यनेकानि विमानानि सहस्रशः पश्यति ब्रह्मवि
ष्णिंद्रयमाग्निवरुणादिकान् ग्रहनक्षत्रताराश्च भुवनानि च
सहस्रशः

वैराग्येणैव तत्याज्यं सिद्धयश्चोपसर्गिकाः औपसर्गिकमात्मस्थं भुवनेषु परित्यजेत् निरुद्धेनैत्यजेत्सर्वं प्रसीदति महेश्व
रः प्रसन्ने विमला मुक्तिर्वैराग्येण परेण वै अथवानुग्रहार्थं च लीलार्थं वा तदा मुनिः अनिरुद्धविचेष्टश्च यः सोप्येवं
हि सुखी भवेत् क्वचिद्भूमिं परित्यज्य आकाशे क्रीडते श्रिया उद्गिरेच्च क्वचिद्वेदान् सूक्ष्मानर्थान् समासतः क्वचिच्छ्रु
तेः स्वदर्थेन श्लोकबंधं करोति च क्वचिद्दंडकबंधं च कुर्याद्दिङ्गान् सहस्रशः मृगपक्षिसमूहस्य रुतज्ञानं च विंद
ति ब्रह्माद्यं स्थावरांतं च हस्तामलकवद्भवेत् बहुनात्र किमुक्तेन विज्ञानानि सहस्रशः पातालतलसंस्थाश्च स
माधिस्थः स पश्यति आत्मविद्यानिरोधेन स्वस्थेनाचंचलेन तु प्रसादात्तस्य देवस्य सत्पात्रस्थितेन तु ततो नित्यो
दितु रुद्रः पश्यते स्वात्मनीश्वरं तस्य प्रसादाद्धर्मस्य ऐश्वर्यं ज्ञानमेव च वैराग्यमपवर्गश्च नात्र कार्या विचारणा
९९ इत्यादिमहापुराणे लैंगे योगांतरायज्ञानगुणाख्यापनो नाम नवमोध्यायः ९ सूत उवाच सतां जितात्मनां साक्षाद् ऋ४
द्विजातीनां द्विजोत्तमाः धर्मज्ञानां च साधूनामाचार्याणां शिवात्मनां दयावतां द्विजश्रेष्ठास्तथा चैव तपस्विनां
तमात्मनां विरक्तानां संन्यासिनां च ज्ञानिनां दांतानां सत्यवादीनाममलानां च योगिनां श्रौतस्मार्ताविरुद्धा
नां प्रसीदति महेश्वरः सदिति ब्रह्मणः शब्दः सद्वृत्ता ये भवंत्युत सायुज्यं ब्रह्मणो यांति तेन संतः प्रवर्तते दशात्म
के ये विषये साधने चाष्टलक्षणे न क्रुध्यंति न हृष्यंति जितात्मानस्तु ते स्मृताः सामान्येषु च द्रव्येषु तथा वैशेषिके
षु च ब्रह्मक्षत्रविशो यस्माद्युक्तास्तस्माद्द्विजातयः वर्णाश्रमेषु युक्तस्य स्वर्गतो सुखचारिणः श्रौतस्मार्तस्य

...एंवितायहस्तेनजलपिसंस्थारणं

पातुंसमुद्रमपिनातुरः यथेच्छतिजगत्यस्मिंस्तत्रास्यजलदर्शनं यद्यत्तसमुदायेनभोक्तुमिच्छतिकामतः तन्मुद्रसान्वि
तेतस्यत्रयाणामिहधारणं अव्रणत्वंशरीरस्यपार्थिवेनसमन्वितं एतत्षोडशकंप्रोक्तमाप्यमैश्वर्यमुत्तमं देहाद्विविक्ति देहादग्निविनि
निर्माणंतत्तापभयवर्जितं लोकंदग्धुमपीच्छेतेशक्यंतस्यविधानतः जलमध्येकृतंवह्नेस्याप्यतस्याभिरक्षणं हस्तेन
वाग्निग्रहणंस्ततमात्रेणपावनं भस्मीभूतविनिर्माणंयथाश्वर्वतकामतः द्वाभ्यांरूपविनिष्पत्तिर्विनानेत्ररश्मि
रात्मनो वसुर्विंशात्मकेत्येतत्तैजसंमुनिपुंगवाः मनोगतित्वंभूतानामंतर्निवसनंतथा पर्वतादिमहाभारस्कंधे
नोद्वहनेपुनः लघुत्वंगौरवंत्वेवपाणिभ्यांवायुधारणं अंगुल्यग्रनिपातेनभूमेःसर्वत्रकल्पनं एकेनदेहनिष्पत्ति
र्वायवैश्वर्यंस्मृतंबुधैः छायाविहीननिष्पत्तिरिंद्रियाणामदर्शनं आकाशगमनंनित्यमिंद्रियार्थैःसमन्वयं दूरेच इंद्रियार्थैःसमन्वितं
शब्दग्रहणंसर्वशब्दावगाहनं तन्मात्रलिंगग्रहणंसर्वप्राणिनिदर्शनं सर्वभूतप्रसादश्चमृत्युकालजयस्तथा
संसारादर्शनंचैवमानसंगुणलक्षणं छेदनंताडनंबंधंसंसारपरिवर्तनं प्राजापत्यमिदंप्रोक्तमाहंकारिकमुत्तमं
अकारणाज्जगत्सृष्टिस्तथानुग्रहएवच प्रलयंसाधिकारंचलोकवृत्तिप्रवर्तनं एतावनन्यमित्युक्तंप्राधान्यंवैसर्वं
परं ब्रह्मणातद्गुणोशक्यंवेत्तुंमर्त्यैर्नशक्यते विद्यतेतत्परेशेवंविस्मनाचनगम्यते असंख्येयगुणंशुद्धंकोजानी
यात्क्षिवात्मकं अस्थानेसिद्धयस्त्वेताउपसर्गाःप्रकीर्तिताः निरोद्धव्याःप्रयत्नेनवैराग्येणपरेणतु नाशातिश
यतांज्ञात्वाविषयेषुभयेषुच असिद्धीर्यस्त्यजेत्सर्वंविशुद्धइतिकीर्तितः वैराग्यंपुरुषख्यातेगुणवैतृष्ण्यमुच्यते।

असिद्धयः=

अनुद्विग्नः

लिंग॰ पु॰ १८ मिथ्यासंप्रवर्ततेयामस्यतत्वलक्षणे अप्रदेश्योऽह्य निष्प्रेक्षतत्वेष्टनाभिनंदनं प्रीतितापविषादेभ्योविनिवृत्तिर्विरक्तता सं
न्यासः कर्मणांन्यासः कृतानामकृतैः सह कुशलाकुशलानांतत्प्रहाणंन्यासउच्यते अव्यक्ताद्येविशेषांतेविकारेस्मिन्नचे
तने चेतनाचेतनाव्यक्तिर्विज्ञानंज्ञानमुच्यते एवंज्ञानयुक्तस्यअज्ञायुक्तस्यशंकरः प्रसीदतिनसंदेहोनिगृह्यविविधान्
फलान् स्नानमध्ययनंहोमंध्यानंयज्ञस्तपःस्मृतं दानमध्यापनंसर्वंभवप्रीतिर्नसंशयः चांद्रायणसहस्रैश्चप्राजापत्य
शतैस्तथा मासोपवासैश्चान्यैश्चभक्त्यामुनिवरोत्तमाः अभक्तामानवाश्चास्मिन्लोकेगिरेगुहाशुपतंतिवात्मभो
16 गार्थंभक्तोभावेनमुच्यते भक्तानांदर्शनादेवनृणांस्वर्गादयोद्विजाः नदुर्लभानसंदेहोभक्तानांकिंपुनस्तथा ब्रह्म
विष्णुसुरेंद्राणांतथान्येषामितिस्थितिः भक्त्याएवमुनीनांचबलंसौभाग्यमेवच भवेन्नैवतथाप्रोक्तेसंस्पृश्यपुमांच
पाणिना देव्यैदेवेनमधुरंवाराणस्यांपुराद्विजाः अविमुक्तेसदासीनोरुद्रेणपरमासने रुद्राणीरुद्रमाहेदंलब्ध्वा
वाराणसीपुरीं श्रीदेव्युवाच केनत्वंवश्योमहादेवपूज्योवश्यस्त्वमीश्वर तपसाविद्ययावापियोगेनेहवदप्रभो (
सूतउवाच निशम्यवचनंतस्याःसंस्मृत्यालोक्यपार्वतीं आहबालेंदुतिलकःपूर्णेंदुवदनांहसन् स्मृत्वापूर्णमनया श्रुत्वा॰
पत्न्यागिरेर्गांकथितांपुरा चिरकालस्थितिंप्रेत्यगिरेदेव्यास्तथात्मनः देवत्वंब्रह्मपुरीरम्यानवयायत्पृष्टमर्हसि पुरापिता श्रीभगवानुवाच
महेनापिदृष्टःपूर्णपर्वताशुभे सद्योजातेतथारक्तेरक्तंवामेपितामहः पीतेतत्पुरुषंपीतमघोरंकृष्णमीश्वरं ईशानंवि
श्वरूपाख्यंविश्वरूपंतदाहमां ब्रह्मोवाच वामेशपुरुषाघोरसद्योजातमहेश्वर केनवश्योमहादेवमत्यंकुरुहृष्णंविभो ॥

धर्मस्यज्ञानादुर्मेत्तउच्यते विद्यायाः साधनात्साधुर्ब्रह्मचारीगुरोर्हितः क्रियाणांसाधनात्साधुर्गृहस्थः साधुरुच्यते सा
धनात्तपसोरण्ये साधुर्वैखानसः स्मृतः यतमानोयतिः साधुः स्मृतोयोगस्यसाधनात् विद्याक्रियातपोयोगसाधनात्
साधवः स्मृताः गृहस्थोब्रह्मचारीचवानप्रस्थोयतिस्तथा धर्माधर्मौविहप्रोक्तौशब्दावेतौक्रियात्मकौ कुशलाकुश
लैर्धर्मैर्धर्माधर्माविति स्मृतौ धारणार्थेधृतिंत्वेषधातुशब्दः प्रकीर्तितः अधारणोमहत्त्वेचअधर्मइतिकीर्तितः तत्रे
ष्टप्रापकोधर्मआचार्यैरुपदिश्यते हृष्टाश्चालोलुपाश्चैवआत्मवंतोह्यदांभिकाः सम्यग्विनीताऋजवस्तानाचार्या
न्प्रचक्ष्यते स्वयमाचरतेयस्मादाचारेस्थापयत्यपि आचिनोतिचशास्त्रार्थानाचार्यस्तेनचोच्यते विज्ञेयः श्रवणाच्छ्रौ
तः स्मरणात्स्मार्तउच्यते इज्यावेदात्मकंश्रौतंस्मार्तंवर्णाश्रमात्मकं दृष्टानुभूतमर्थंयः स्पष्टमेवाभिभाषते यथाभूत
प्रवादस्तुसत्यंलिंगेनपठ्यते ब्रह्मचर्यंतथामौनंनिराहारत्वमेवच अहिंसासर्वतः शांतिस्तपइत्यभिधीयते आत्म
वत्सर्वभूतेषुयोहितेष्वहितेषुच वर्ततेह्यसकृद्दृष्टिः कृत्स्नाह्येषादयास्मृता यद्यदिष्टतमंद्रव्यंन्यायेनैवाग
तान्क्रमात् तंतद्गुणवतेदद्यादेतद्दानलक्षणं त्रिविधंदानमाख्यातंज्येष्ठंमध्यंकनीयसं कारुण्यात्सर्वभूते
भ्यः संविभागस्तुमध्यमः श्रुतिस्मृतिभ्यांविहितोधर्मोवर्णाश्रमात्मकः शिष्टाचाराविरुद्धश्चसाधवः साधुस
मताः मायाकर्मफलत्यागीशिवात्मापरिकीर्तितः निवृत्तः सर्वसंगेभ्योयुक्तोयोगीप्रकीर्तितः असक्तोभयतो
यस्तुविषयेषुविचारतः अलब्धः संयमीप्रोक्तः प्रार्थितोपिसमंततः आत्मार्थेवापरार्थेचइंद्रियाणीहयस्यवै न

लिंग॰ पु॰ १२

17

णमधारयत् ध्यायतः पुत्रकामस्य ब्रह्मणः परमेष्ठिनः प्रादुर्भूतो महातेजाः कुमारो रक्तलोचनः रक्तमाल्यांबरधरो र
क्तभूषाप्रतापवान् स तं दृष्ट्वा महात्मानं कुमारं रक्तवाससं परं ध्यानं समाश्रित्य बुबुधे देवमीश्वरं स तं प्रणम्य भगवान्
ब्रह्मा परमयत्नतः वामदेवं ततो ब्रह्मा ब्रह्म वै समचिंतयत् तथा स्तुतो महादेवो ब्रह्मणा परमेश्वरः सुप्रीतहृदयः श
र्वैरिदमाह पितामहं ध्यायता पुत्रकामेन यस्मात्तेहं पितामह दृष्टः परमया भक्त्या स्तवनश्च ब्रह्मपूर्वकः तस्माद्ध्या
नबलं प्राप्य कल्पे कल्पे प्रयत्नतः वेत्स्यसे मां प्रसंख्यानं लोकधातारमीश्वरं ततस्तस्य महात्मानश्चत्वारः सकुमा
रकाः संबभूवुर्महात्मानो विशुद्धा रक्तवर्चसः विरजश्च विवाहुश्च विशोको विश्वभावनः ब्रह्मण्या ब्रह्मणस्तुल्या
वीरा अध्यवसायिनः शृणं तस्य महात्मानो ब्रह्म तद्वामदैविकं अनुग्रहार्थं लोकानां शिष्याणां हितकाम्यया ध
र्मोपदेशमखिलं कृत्वा ते ब्रह्मणः प्रियाः पुनरेव महादेवं प्रविष्टा रुद्रमव्ययं येपि चान्ये द्विजश्रेष्ठा युंजानो वाममी-
श्वरं प्रपश्यंति महादेवं तद्भक्तास्तत्परायणाः ते सर्वे पापनिर्मुक्ता विमला ब्रह्मचारिणः रुद्रसायुज्यमायांति पु
नरावृत्तिदुर्लभं इति महापुराणे लैंगे वामदेवोत्पत्तिर्द्वादशोध्यायः १२ सूत उवाच एकत्रिंशत्तमः कल्पः पीतवा
सा इति स्मृतः ब्रह्मा यत्र महाभागो पीतवासा बभूव ह ध्यायतः पुत्रकामस्य ब्रह्मणः परमेष्ठिनः प्रादुर्बभौ महातेजाः
कुमारः पीतवासधृक् पीतगंधानुलिप्तांगः पीतमाल्यधरो युवा हेमयज्ञोपवीती च पीतोष्णीषो महाभुजः तं दृष्ट्वा
ध्यानसंयुक्तो ब्रह्मा लोकमहेश्वरं मनसा लोकधातारं प्रपेदे शरणं प्रभुं ततो ध्यानगतस्तत्र ब्रह्मा माहेश्वरीं वरां वि

दृष्टवः शक्यस्त्वया देव्या वक्तुमर्हसि शंकर श्रीभगवानुवाच श्रवोवं श्रद्धयैवेति विवशेणा वारिसंभव शक्यो लिंगे त्वया दृष्टेश्वि
श्रो= स्नानाय समाधियो शक्यः पंचास्यरूपेण पविज्ञेः पंचभिर्द्विजैः तव भक्त्या यद्दृष्टोहं त्वया ऽज जगद्गुरोः भावं भावेन देवेन दृष्ट
वान्मोहृदीश्वरं तस्मात्तु श्रद्धया दृष्टः शक्यः शक्यो गिरेः सते शक्यो लिंगेन संदेहः सर्वदा श्रद्धया द्विजैः श्रद्धा धर्मः परः
सूक्ष्मः श्रद्धा ज्ञानं परं तपः श्रद्धा सर्गश्च मोक्षश्च दृश्योहं श्रद्धया सदा इत्यादिमहापुराणे लैंगे श्राचार्यसत्यादिनिर्णा।
योदशमोध्यायः १० ऋषय ऊचुः कथं वै दृष्टवान्ब्रह्मा सद्योजातं महेश्वरं वामदेवं महात्मानं पुरुषं पुरुषोत्तमं अ
घोरं च तथेशानं यथावद्वक्तुमर्हसि सूत उवाच एकोनविंशकः कल्पो विज्ञेयः श्वेतलोहितः तस्मिंस्तु परमं ध्यानं
ध्यायतो ब्रह्मणस्तदा उत्पन्नस्तु शिखायुक्तः कुमारः श्वेतलोहितः तं दृष्ट्वा पुरुषं श्रीमान्ब्रह्मा वै विश्वतोमुखः हृदि
कृत्वा महात्मानं ब्रह्मरूपिणमीश्वरं ध्यानयोगात्परं ज्ञात्वा ववंदे देवमीश्वरं सद्योजातं ततो ब्रह्मा ब्रह्म वै समचिंतय
त् ततो ऽस्य पार्श्वतः श्वेताः प्रादुर्भूता महात्मनः सुनंदो नंदनश्चैव विश्वानंदोपनंदनः शिष्यास्ते वै महात्मानो यैस्तद्ब्रह्म
उदाहृतं तस्याग्रे श्वेतवर्णाभः श्वेतो नाम महामुनिः विजज्ञे ऽथ महातेजास्तस्माज्जज्ञे हरस्त्वसौ तत्रैते मुनयः सर्वे स
द्योजातं महेश्वरं प्रपन्नाः परया भक्त्या गृणंतो ब्रह्म शाश्वतं तस्माद्विश्वेश्वरं देवं ये प्रपद्यंति वै द्विजाः प्राणायामपराभू
त्वा ब्रह्मतत्परमानसाः ते सर्वपापनिर्मुक्ता विमला ब्रह्मवर्चसः विष्णुलोकमतिक्रम्य रुद्रलोकं व्रजंति ते इति लिंगपु
राणे सद्योजातोत्पत्तिर्नामैकादशोध्यायः ११ ततस्त्रिंशत्तमः कल्पो रक्तो नाम प्रकीर्तितः ब्रह्मा यत्र महातेजा रक्तव।

अघतामानसं जह्यान्मुच्यते नात्र संशयः गुरुतल्परतो नित्यं मात्रगो वा नराधमः ब्रह्मघ्नस्त्वजपेदेवं मानसं वै पितामह संपर्कीस्यापि नीयापं तत्क्षमं परिभाषितं तथाप्ययुतमात्रेण
पातकादेव मुच्यते संसर्गीत्यानकीलत्वं जपेद्धा मानसं द्विजाः ब्रह्महत्याहरायानं हवर्षी लेयमेवच कृत्वाचरत्तस्तत्वं च पापकृद्वा हणोयदि तद्यागीय सार्थसंगरहागो मूत्रं कपिलं द्विजाः संयता
देवितिमंत्रेण गोमयं स्वच्छमाहरेत् तेजोसि शुक्रमित्याज्यं कापिलं संहरेद्बुधः आप्यायस्वेति च क्षीरं दधिक्राव्णोति चाहरेत् गव्यं दधि तथैवात्र कापिलं वै पितामह देवस्य त्वेति मंत्रेण स
क्रहे वै कुशोदकं एकस्थं हेमपात्रे वा ब्रह्मत्याहोरेण राजते ताम्रे वा अथ पात्रे वा पालाशे वा दले शुभे सकूर्चे सर्वरत्नाढ्ये दिव्यातद्वैव कांचने जपेल्लक्षमघोराख्यं हुत्वा वै वह्नौ तादिभिः चरुतेन च करणा
वैव समिद्भिश्च तिलैस्तथा यवैश्च व्रीहिभिश्चैव जुहुयादेकपंचकं पृथक् प्रत्येकं सहस्रं तु कृत्वा स्नात्वा तु ह्यनेन तु कृत्वा चाघोरेणा देवेशं स्नाप्य चाघोरेण वै द्विजाः अष्टोत्तरशतेनैव स्नाप्य पंचे

लिंग॰ पू॰ १८

18

षमहत्कल्पे सुपुत्रकामः प्रजाब्रह्माचिंतयामासदुःखितः तस्यचिंतयमानस्यपुत्रकामस्यवैप्रभोः कृष्णःसमभवद्वर्णो
ध्यायतःपरमेष्ठिनः अथापश्यन्महातेजाःप्रादुर्भूतंकुमारकं कृष्णवर्णमहावीर्यंदीप्यमानंस्वतेजसा कृष्णांबरो
ष्णीषधरंकृष्णयज्ञोपवीतिनं कृष्णमौलिसमायुक्तंकृष्णमाल्यानुलेपनं सतंदृष्ट्वामहात्मानमघोरंघोरविक्रमं ववंदे
देवदेवेशमद्भुतंकृष्णपिंगलं प्राणायामपरःश्रीमान्हृदिकृत्वामहेश्वरं मनसाध्यानसंयुक्तःप्रपन्नस्तुयतीश्वरम्
अघोरंततोब्रह्माब्रह्मरूपंव्यचिंतयत् तथावैध्यायमानस्यब्रह्मणःपरमेष्ठिनः प्रददौदर्शनंदेवोह्यघोरोघोरवि
क्रमः अथास्यपार्श्वतःकृष्णाःकृष्णवर्णानुलेपनाः चत्वारस्तुमहात्मानःसंबभूवुःकुमारकाः कृष्णाःकृष्णशिखा
श्चैवकृष्णास्याःकृष्णकंचुकाः ततोवर्षसहस्रंतुयोगंतत्पारमेश्वरं उपासित्वामहायोगंशिष्येभ्यःप्रददुःपुनः योग
नयोगसंपन्नाःप्रविश्यमनसाशिवं अमलंनिर्गुणंस्थानंसंक्रांताविश्वमीश्वरं एवमेतेनयोगेनयेपिचान्येमनीषि
णः चिंतयंतिमहादेवंगंतारोरुद्रमव्ययं इत्यादिलिंगेमहापुराणेअघोरोत्पत्तिर्नामचतुर्दशोऽध्यायः १४ सू
तउवाच ततस्तस्मिन्गतेकल्पेकृष्णवर्णेभयानके तद्भावदेवदेवेशंब्रह्माणंब्रह्मरूपिणं अनुगृह्यततस्त्वेशोब्र
ह्माणमवदद्धरः अघोरेणैवरूपेणसंहरामिनसंशयः ब्रह्महत्यादिकान्घोरांस्तथान्यानपिपातकान् हीनांश्चैव
महाभागतथैवविविधानपि उपपातकमप्येवंतथापापानिसुव्रत मानसानिसतीक्ष्णानिवाचिकानिपितामह का
यकानिसमग्राणितथाप्रासंगिकानिच बुद्धिपूर्वंकृतान्येवसहजागंतुकान्यपि मातृदेहोत्थितान्येवंपितृदेहेचया

शाद्धि शोधयेत अघोरा
शिषिनः स्त्वानः पिबेद्
दुग्धं पितामह ब्रह्म
ब्रह्मजपं कुर्यात् वे
स्व च यथाविधिः ए
वं कृत्वा कृते ब्रह्मविद्
ब्रह्महा भ्रूणहा तथा
वीरहा गुरुहा चैव
मित्रविश्वासघात
कः स्तेयी हवर्णस्ते
यी च गुरुतल्पर
तः सदा मद्यपा
वृषलीसक्तः पर
दाररतः सदा ब्र

स्वरूपांचददृशेमहेश्वरमुखोद्गतां चतुष्पादांचतुर्वक्त्रांचतुःशीर्षांचतुःस्तनीं चतुर्नेत्रांचतुःशृंगींचतुर्दंष्ट्रांचतुर्मुखीं द्वा
त्रिंशल्लोकसंयुक्तामीश्वरींसर्वतोमुखीं सतांदृष्ट्वामहातेजामहादेवीमहेश्वरीं पुनराहमहादेवःसर्वदेवनमस्कृतः
मतिःस्मृतिर्बुद्धिरितिगायमानःपुनःपुनः एह्येहीतिमहादेवीसातिष्ठत्प्रांजलिर्विभुः विश्वमावृत्ययोगेनजगत्स
र्वंवशीकुरु अथतामाहदेवेशोरुद्राणीत्वंभविष्यसि ब्राह्मणानांहितार्थायपरमार्थाभविष्यसि तथैतांपुत्रका
मस्यध्यायतःपरमेष्ठिनः प्रददौदेवदेवेशश्चतुष्पादांजगद्गुरुः ततस्तांध्यानयोगेनविदित्वापरमेश्वरीं ब्रह्मलोक
गुरुःसोथप्रतिपेदेमहेश्वरीं गायत्रींततोरौद्रींध्यात्वाब्रह्मास्वयंचितः इत्येतांवैदिकींप्राप्यरौद्रींगायत्रीमीरितां
जपित्वातमहादेवींब्रह्मालोकनमस्कृतां प्रपन्नस्तुमहादेवंध्यानयुक्तेनचेतसा ततस्तस्यमहादेवोदिव्ययोगवपु
र्धरः ऐश्वर्यंज्ञानसंपत्तिर्वैराग्यंचददौपुनः ततोस्यपार्श्वतोदिव्याःप्रादुर्भूताःकुमारिकाः पीतमाल्यांबरधराःपी
तस्रगनुलेपनाः पीतोष्णीषाःसुशिराःपीतास्याःपीतमूर्द्धजाः ततोवर्षसहस्रांतेउषित्वाविमलौजसः योगात्मा
नःस्वाध्यायाद्ब्राह्मणानांहितैषिणः धर्मयोगबलोपेतामुनीनांदीर्घसत्रिणां उपदिश्यमहायोगंप्रविष्टास्तेमहे
श्वरं एवमेतेनविधिनाप्रपन्नायेमहेश्वरं अन्येपिनियतात्मानोध्यानयुक्ताजितेंद्रियाः तेसर्वपापमुत्सृज्यविमला
ब्रह्मवर्चसः प्रविशंतिमहादेवंरुद्रंतेत्वपुनर्भवाः इत्यादिलैंगेगतत्कुरुषोत्पत्तोत्रयोदशोध्यायः १३ सूतउवाच
ततस्तस्मिन्गतेकल्पेपीतवर्णेस्वयंभुवः पुनरन्यःप्रवृत्तस्तुकल्पोनामासितस्तुसः एकार्णवेतदाहृत्तेहृतेवा

तु तस्मिन्महाकल्पे कृष्णवर्णे भयानके तुष्टावदेवदेवेशं ब्राह्मणं ब्रह्मरूपिणं अनुग्रहाय तलपो ब्रह्माणमवदद्धरः कृतं तेनैव रूपेण संहरामि न संशयः ब्रह्महत्यादिका
न् घोरान् तथान्यान् विपातकान् हीनांश्चैव महाभागान् तथैव विविधानपि उपपातकसंघांश्च तथा पापानि हूत्वतां मानसानि हसीदपानि वाचिकानि पिनामहे कायकानि
मिश्राणि तथा प्रासंगिकानि च बुद्धिपूर्वकृतान्येव सहजागंतुकानि च मातृदेहस्थितान्येवं पितृदेहे च पातकं संहरामि न संदेहः तथान्यो पातकानि च लब्ध्वा ... घोरे
ब्रह्महत्यां ते प्रभो तद्दर्थं वाचिके वत्स तद्दर्थं मानसे पुनः कर्तुं तं बुद्धिपूर्वकं ... वीरहा ... मासुलमि तुजे ... नाव्रसे
हतः गोघ्नश्चैव कृतघ्नश्च स्त्रीघ्नः पापरतो नरः ... जपित्वा चोरसंत्रं ... नाशय:

लिंग॰ पु॰ १९

19

धि एवं कृतघ्नोपि मुच्येद्ब्रह्मणा भ्रूणहा तथा वीरहा गुरुहा वापि मित्रविश्वासघातकः स्तेयी सुवर्णस्तेयी च गुरुतल्प
गतस्तथा मद्यपो वृषलीसक्तः परदारविधर्षकः ब्रह्मस्वहा तथा गोघ्नो मातृहा पितृहा तथा विंवप्राश्यावकश्चैव लि
गप्रध्वंसकस्तथा अन्यानि बहुपापानि मानसानि द्विजे यदि वाचिकानि तथान्यानि कायिकानि सहस्रशः कृत्वा विमु
च्यते सद्यो जन्मांतरशतैरपि एतद्रहस्यं कथितमघोरेश प्रसंगतः तस्माज्जपेद्द्विजो नित्यं सर्वपापविशुद्धये इत्यादि
लैंगे अघोरोत्पत्तिर्ब्रह्मकूर्चप्रभावः पंचदशोध्यायः १५ सूत उवाच अथान्यो ब्रह्मणः कल्पो वर्तते मुनिपुंगवाः वि
श्वरूप इति ख्यातो नामतः परमाद्भुतः विनिवृत्ते तु संहारे पुनः सृष्टे चराचरे ब्रह्मणः पुत्रकामस्य ध्यायतः परमेष्ठिनः
प्रादुर्भूता महानादा विश्वरूपा सरस्वती विश्वमाल्यांबरधरा विश्वयज्ञोपवीतिनी विश्वोष्णीषा विश्वगंधा विश्वमा
ता महोविका तथाविधस्तु भगवानीशानः परमेश्वरः शुद्धस्फटिकसंकाशः सर्वाभरणभूषितः अथ तं मनसा ध्या
त्वा युक्तात्मा वै पितामहः ववंदे देवमीशानं सर्वेशं सर्वगं प्रभुं ईशानाय नमस्तुभ्यं महादेव नमोस्तु ते नमोस्तु सर्ववि
द्यानामीशान परमेश्वर नमोस्तु सर्वभूतानामीशान परमेश्वर ब्रह्मणोधिपते तुभ्यं ब्रह्मणे ब्रह्मरूपिणे नमो ब्र
ह्माधिपतये शिवो मे स्तु सदाशिवः ओंकारमूर्ते देवेश सद्योजात नमो नमः प्रपद्ये त्वां प्रपन्नोस्मि सद्योजाताय वै न
मः भवोद्भव भवेशान मां भजस्व महाद्युते वामदेव नमस्तुभ्यं ज्येष्ठाय वरदाय च नमः नमो रुद्राय कालाय कलनाय न
मो नमः नमो विकरणायैव कलावर्णाय वर्णिने बलाय बलिनां नित्यं सदा विकरणाय ते बलप्रमथनायैव बलि

नके संहरामि न संदेहः सर्वपातकाद्विभो ॥ लक्षं जपित्वाघोरेशं ब्रह्महा मुच्यते प्रभो तदर्द्धं वाचिके वस्तु तदर्द्धं मानसे पुनः
वर्णगणत्रुटि सर्वं क्रोधाद्दृष्टगुणं स्मृतं वीरहा लक्षमात्रेण भ्रूणहा कृत्वा पिवा विभो मुच्यते नात्र संदेहस्तदर्द्धेन च वारु
णीं श्रुत्वा नाशी सहस्रेण ग्रजापी वतथा द्विजाः ग्रजुतापी सहस्रेण ग्रादाता च विशुध्यति ब्राह्मणस्वापहर्ता च स्व र्णस्ते
र्णी नराधमः नियुतं मानसे जप्त्वा मुच्यते नात्र संशयः गुरुतल्पगतो वापि मातृगो वा नराधमः ब्रह्महा तज्जपेद्देवं मा
नसं वा पितामह संपर्कात्पापिनां पापं तत्समं परिभाषितं तथाप्ययुतमात्रेण पातकादेः प्रमुच्यते संसर्गात्पातके नित्यं
जपेद्धै मानसे धिया अपामृस्य तदर्द्धं वै वाचिकं चाष्टधा जपः पातकादर्द्धमेव स्यादुपपातकिनां स्मृतं तदर्द्धं केवले
पापे नाभ्रकार्या विचारणा ब्रह्महत्या सुरापानं सुवर्णस्तेयमेव च गत्वा च गुरुतल्पं च पापकृद्ब्राह्मणो यदि रुद्रगा
यत्रियाशलं गोमूत्रं कापिलं द्विजैः गंधद्वारेति तस्यां वै गोमयं स्वस्थमाहरेत् तेजोसि शुक्रमित्याज्यं कापिलं सह
रेद्द्विजैः आप्यायस्वेति च क्षीरं दधिक्राव्णेति संहरेत् गवां दधि नवं सात्वा तत्कापिलं वै पितामह देवस्य त्वेति मनसा सं
ग्रहेत्कुशोदकं एकस्थं दोहपात्रे वा कृत्वा घोरेण राजते ताम्रे वा पद्मपत्रे वा पालाशे वा समंयतः सत्कूर्चं सर्वरत्नाढ्यं
तिलातव्येवकांचनं जपेल्लक्षमघोराख्यं कृत्वा चैव हुतादिभिः हुतेन चरुणा चैव समिद्भिश्च तिलैस्तथा यवैश्च व्रीहि
भिश्चैव प्रणवेश्च पृथक्पृथक् प्रत्येकं सप्तवारं तद्दत्वां तेवेद्गुतेन न तु कृत्वाघोरेण देवेशं स्नाप्याघोरेण वै द्विजाः श्रष्ट
द्रोणहुतेनैव स्नात्वा यस्त्वा द्विशुध्यति अहोरात्रोषितः स्नातः पिवेत्कूर्चं शिवाग्रतः ब्रह्मा ब्रह्मजपं कुर्यादाचम्य च यथावि

गायत्री

यामाकृष्णस्त्वविंतकाः अजामेकांलोहितशुक्लकृष्णां विश्वाप्रजांसृजमानांसरूपां अजोहंमांविद्धितांविश्वरूपांगां
लिंग॰ विश्वरूपांहिविद्या एवमुक्त्वामहादेवः ससर्जपरमेश्वरः ततोस्यपार्श्वतोदिव्याःशर्वरूपाःकुमारकाः जटीमुंडीशिखं
पु॰ डीचअर्धमुंडश्चयज्ञिरे ततस्तेनयथोक्तेनयोगेनस्तमहौजसः दिव्यवर्षसहस्रांतमुपास्यतुमहेश्वरं धर्मोपदेश
२० निचयंकृत्वायोगमयंदृढं शिष्यश्चनियतात्मानःप्रविष्टारुद्रमीश्वरं इत्यादिमहापुराणेलिंगेईशानकल्पोत्पत्ति
रीशानीसंभवश्चषोडशोध्यायः १६ सूतउवाच एवंसंक्षेपतःप्रोक्तःसद्यादीनांसमुद्भवः यःपठेच्छृणुयाद्वा
२० पिश्रावयेद्वाद्विजोत्तमान् सयातिब्रह्मसालोक्यंप्रसादात्परमेष्ठिनः ऋषयऊचुः कथंलिंगमभूल्लिंगेसमभ्यर्च्यो
वशंकरः किंलिंगंकस्तथालिंगीतन्नहृक्तुमिहार्हसि सूतउवाच एवंदेवाश्चमुनयःप्रणिपत्यपितामहं अपृच्छं
न्भगवंल्लिंगंकथमासीदितिस्वयं लिंगेमहेश्वरोदेवःसमभ्यर्च्यःकथंत्विति किंलिंगंकस्तथालिंगीसोप्याहचपि
पितामहोवाच तामहः प्रधानंलिंगमाख्यातंलिंगीचपरमेश्वरः रक्षार्थमंबुधौमह्यंविष्णोश्चासीत्सुरोत्तमाः वैमानिकेगतेसर्वे
जनलोकंमहर्षिभिः स्थितिकालेतदापूर्णेततःप्रत्याहृतेतथा चतुर्युगसहस्रांतेसत्यलोकेगतेसुराः विनाधि
पत्यंसमतांगतेतत्वचलत्तोवयं शुष्केचस्थावरेसर्वेप्रजानावृष्ट्याचसर्वतः पशवोमानवायक्षापिशाचाःपिशिताऽ
शनाः गंधर्वाद्याःक्रमेणैवनिर्दग्धाभानुभानुभिः एकार्णवेमहाघोरेतमोभूतेसमंततः सुष्वापांभसियोगात्मा
निर्मलोनिरुपप्लवः सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् सहस्रबाहुःसर्वज्ञःसर्वदेवोद्भवोद्भवः हिरण्य
गर्भोरजसातमसाशंकरःस्वयं सत्वेनपरमोविष्णुःसर्वात्मत्वेमहेश्वरः कालात्माकालनाभस्तुशुक्लःकृष्णस्तुनिर्गुणः
नारायणोमहाबाहुःसर्वात्मासदसन्मयः

मनोन्मनाय देवाय नमस्तुभ्यं महात्मने
वामदेवाय नमस्तुभ्यं महात्मने ज्येष्ठाय चैव श्रेष्ठाय रुद्राय वरदाय च

नेत्रब्रह्मरूपिणे सर्वभूतेश्वरेशाय भूतानां दमनाय च कालाय कालरुद्रेश च नमस्तुभ्यं महात्मने इति स्तवेन देवेशं ननाम
वृषभध्वजं यः पठेत्सकृद्देवेह ब्रह्मलोकं प्रपद्यते श्रावयेद्वा द्विजान् श्राद्धे सोपि याति परांगतिं एवं ध्यानगतं तं च प्र
णमंतं पुनः पुनः उवाच भगवानीशः प्रीतोहं ते किमिच्छसि ततस्तु प्रणतो भूत्वा वाग्विशुद्धं महेश्वरं उवाच भगवान्
रुद्रं प्रीते प्रीतेन चेतसा यदिदं विश्वरूपं ते विश्वरूपेयमीश्वरी एतद्वेदितुमिच्छामि यथावत्परमेश्वर कैषा भगवती
देवी चतुष्पादा चतुर्मुखी चतुःशृंगी चतुर्वक्त्रा चतुर्दंष्ट्रा चतुःस्तनी चतुर्हस्ता चतुर्नेत्रा विश्वरूपा कथं स्मृता किंना
मगोत्रा कोस्यात्मा किंवीर्यापि च कर्मतः तस्य तद्वचनं श्रुत्वा वामदेवो वृषध्वजः प्राह देवो वृषध्रुम्नो ब्रह्माणं पद्मसंभवं
रहस्यं सर्वमंत्राणां पावनं पुष्टिवर्द्धनं शृणुष्वैतत्परं गुह्यमादिसर्गे यथा तथा ये यो वर्तते कल्पो विश्वरूपस्तु सोस्म
तः ब्रह्मस्थानमिदं चापि त्वया प्राप्तं यथा विभो त्वत्तः परतरं देव विष्णुनाथ तत्पदं शुभं वैकुंठेन विशुद्धेन मम वामांगजे
न वै तदा प्रभृति कल्पश्च त्रयस्त्रिंशत्तमो ह्ययं शतं शतसहस्राणामतीता ये स्वयंभुवः पुरस्तात्तव देवेश तत्शृणुष्व
महाद्युते आनंदस्तु स विज्ञेयः आनंदत्वे व्यवस्थितः लांतव्यगोत्रस्तपसा मम पुत्रत्वमागमः त्वयि योगं च सांख्यं च तपो विद्या
विधिः क्रियाः ऋतं सत्यं दया ब्रह्म अहिंसा सन्मतिः क्षमाः ध्यानं ध्येयं दमः शांतिर्विद्याविद्या मतिः स्मृतिः कांतिः क्षां
तिस्तथा मेधा लज्जा तुष्टिः सरस्वती धृतिः पुष्टिः क्रियाश्चैव प्रसादश्च प्रतिष्ठिताः द्वात्रिंशत्रिर्गुणा ह्येषा द्वात्रिंशाक्षरसंज्ञ
या प्रकृतिर्विहिता ब्रह्मन् त्वत्प्रसूता महेश्वरी विष्णोर्भगवतश्चैव तथान्येषामपि प्रभो सैषा भगवती देवी त्वत्प्रसूतिः
प्रतिष्ठिता चतुर्मुखी जगद्योनिः प्रकृतिर्गौः प्रकीर्तिता गौरी माया च विद्या च कृष्णा हैमवतीति च प्रधानं प्रकृतिश्चैव

त्रि

प्रभास्वरं ज्वालामालासहस्राढ्यंकालानलशतोपमं क्षयवृद्धिविनिर्मुक्तमादिमध्यांतवर्जितं अनौपम्यमनिर्देश्य
मव्यक्तंविश्वसंभवं तस्यज्वालासहस्रेणमोहितोभगवान्हरिः मोहितंप्राहमामत्रपरीक्षावोग्निसंभवं अधोगमि
ष्यामितनस्तंभस्यांतमुपमश्रुतेः भवानूर्ध्वंप्रयत्नेनगंतुमर्हसिसत्वरं एवंव्याहृत्यविश्वात्मास्वरूपमकरोत्तदा वा
राहमयमप्येषहंसत्वेप्राप्तवान्स्वराः तदाप्रभृतिमामाहुर्हंसोहंसविराडिति हंसहंसेतियोब्रूयात्मांहंसोथभ
विष्यति सुश्वेतोह्यनिलात्तक्षविश्वतःपक्षसंयुतः मनोनिलजवोभूत्वागतोहंचोर्ध्वतःसुराः नारायणोपिवि
21 श्वात्मानीलांजनचयोपमं दशयोजनविस्तीर्णमायतंशतयोजनं मेरुपर्वतवर्ष्माणंगौरतीक्ष्णाग्रदंष्ट्रिणम् संकाशं
कालादित्यसमाभंचदीर्घघोणंमहास्वरं ह्रस्वपादंविचित्रांगंजैत्रंदृढमनौपमं वाराहमसितंरूपमास्थायगत
वानधः एवंवर्षसहस्रंतुत्वरन्विष्णुरधोगतः नापश्यदल्पमप्यस्यमूलंलिंगस्यसूकरः तावत्कालंगतोह्यूर्ध्वं
महमप्यरिसूदन सत्वरंसर्वयत्नेनतस्यांतंज्ञातुमिच्छया श्रांतोनदृष्ट्वातस्यांतमहंकालादधोगतः तथैवभग
वान्विष्णुःश्रांतःसंत्रस्तलोचनः सर्वदेवभवस्तूर्णमुत्थितःसमहावपुः समागतोमयासार्धंप्रणिपत्यभवंमुहुः
माययामोहितःशंभोस्तस्थौसंविग्नमानसः पृष्ठतःपार्श्वतश्चैवअग्रतःपरमेश्वरं प्रणिपत्यमयासार्धंसस्मारकि
मिदंत्विति तदासमभवत्तत्रसनादंशब्दलक्षणं ओमोमितिसुरश्रेष्ठाःसुव्यक्तंप्लुतलक्षणं किमिदंत्वितिसंचिंत्य
मयातिष्ठन्महास्वरे लिंगस्यदक्षिणेभागेतदापश्यत्सनातनं आद्यंवर्णमकारंचउकारंचोत्तरेततः मकारंमध्यत
श्चैवनादांतंतस्यओमिति सूर्यमंडलवद्दृष्ट्वावर्णमाद्यंतुदक्षिणे उत्तरेपावकप्रख्यमुकारंपुरुषर्षभाः शीतांशुमं

तथाभूतमहं दृष्ट्वा शयानं पंकजेक्षणं मायया मोहितस्तस्य तमवोचं सहर्षितः तस्य तद्वचनं श्रुत्वा श्रुतं सर्वं सवर्षभाः क
स्त्वं वदेति हस्तेन समुत्थाप्य सनातनं तदा हस्तप्रहारेण तीव्रेण सुदृढेन तु प्रबुद्धोत्थाय शयनात्समासीनः क्षणं वशी
ददर्श वनविक्लिन्ननीरजामललोचनः मामत्र संस्थितं भासा भासितो भगवान्हरिः आह चोत्थाय भगवान्हसन्मां मधु
रं सकृत् स्वागतं स्वागतं वत्स पितामह महाद्युते तस्य तद्वचनं श्रुत्वा स्मितपूर्वं सवर्षभाः रजसा बद्धवैरश्च तमवोचं
जनार्दनं भाषसे वत्स वत्सेति सर्वसंहारपालकं मामिहाल्पमिवं कृत्वा गुरुः शिष्यमिवानघ कर्तारं जगतां साक्षा
त्प्रकृतेश्च प्रवर्तकं सनातनमजं विष्णुं विरिंचिं विश्वसंभवं विश्वात्मानं विधातारं धातारं पंकजेक्षणं किमर्थं भाषसे
वरं= मोहात्त्वं वक्तुमर्हसि [illegible]र सोपि मामाह जगतां कर्ताहमिति लोकपः भर्ता कर्ता भवानंगादवतीर्णो ममाव्ययात्
विस्मृतोपि जगन्नाथं नारायणमनामयं पुरुषं परमात्मानं मामात्मानं जगताेशभं विष्णुमच्युतमात्मानं विश्वस्य प्र
भवोद्भवं तवापराधो नास्त्यत्र मममायाकृतं त्विदं शृणु महेश चतुर्वक्त्र सर्वदेवेश्वरोत्यहं कर्ता नेता च हर्ता च न म
त्तोस्ति परो विभुः अहमेव परं ब्रह्म परं तत्त्वं पितामह अहमेव परं ज्योतिः परमात्मा त्वहं विभुः यद्यद्दृष्टं श्रुतं सर्वं जगत्य
स्मिंश्चराचरं तत्तद्विद्धि चतुर्वक्त्र सर्वं तन्मम संभवं मया सृष्टं पुरा व्यक्तं चतुर्विंशतिकं स्वयं नित्यतो ह्यणवो बद्धाः
सृष्टाः क्रोधोद्भवादयः प्रसादाद्धि भवानेतान्यनेकानीह लीलया सृष्टा बुद्धिर्मया तस्मादहंकारस्त्रिधा मतः तन्मात्र
२० पंचकं तस्मान्मनोऽपींद्रियाणि च आकाशादीनि भूतानि भौतिकानि च लीलया आवयोश्चाभवद्युद्धं सुघोरं रोमह
र्षणं प्रलयार्णवमध्ये तु रजसा बद्धवैरयोः एतस्मिन्नंतरे लिंगमभवच्चावयोः पुरः विवादशमनार्थाय प्रबोधार्थं

सनस्थितः अकारस्तस्य मूर्द्धा नेललाटं दीर्घमुच्यते इकारं दक्षिणं नेत्रमीकारं वामलोचनं उकारं दक्षिणं श्रोत्रमूकारं
लिंग॰ पु॰ २२ वाममुच्यते ऋकारं दक्षिणं तस्य कपोलं परमेष्ठिनः वामं कपोले ॠकारं ऌ ॡ नासापुटे उभे एकारमोष्ठमूर्द्धं
तेऐकारमधरं विभोः ओकारं च तथौकारं दंतपंक्तिद्वयं क्रमात् अं अः तालुनी तस्य देवदेवस्य धीमतः कादिपंचा
क्षराण्येवं पंचहस्तानि दक्षिणे चादिपंचाक्षराण्येवं पंचहस्तानि वामतः टादिपंचाक्षरं पादौ तादिपंचाक्षरं तथा।
पकारमुदरं तस्य फकारं पार्श्वमुच्यते बकारं वामपार्श्वं तु भकारं स्कंधमस्य तु मकारं हृदयं शंभोर्महादेवस्य योगि
२२ नः यकारादिसकारांते विभोर्वै सप्त धातवः हकारमात्मरूपं वै क्षकारं क्रोध उच्यते तं दृष्ट्वा उमया सार्द्धं भगवंतं
महेश्वरं प्रणम्य भगवान्विष्णुः पुनश्चापश्यदूर्द्धतः ओंकारप्रभवं मंत्रं कलापंचकसंयुतं शुद्धस्फटिकसंका
शं शुभाष्टत्रिंशदक्षरं मेधाकरमभूद्भूयः सर्वकामार्थसाधकं गायत्रीप्रभवं मंत्रं हरितं वश्यकारणं चतुर्विंशति प्रणवं मात्राप्रद्वैतं
वर्णाढ्यं चतुष्कलमनुत्तमं अथर्वमसितं मंत्रं कलाष्टकमहापदं आभिचारिकमत्यर्थं त्रयस्त्रिंशच्छुभाक्षरं य वाच्यकारकं =
जुर्वेदसमुद्भूतं पंचत्रिंशच्छुभाक्षरं कलाष्टकसमायुक्तं सुश्वेतं शांतिकं तथा त्रयोदशकलायुक्तं वलाद्यैः सहलो
३ हितं सामोद्भवं जगत्याद्यं वृद्धिसंधानकारणं वर्णाः षडधिकाः षष्टिरस्य मंत्रवरस्य च पंचमंत्रं तथा लब्ध्वा जजा
प भगवान्हरिः अथ दृष्ट्वा कलावर्णमृग्यजुःसामरूपिणं ईशमीशानमुकुटं पुरुषास्यं पुरातनं अघोरहृदयं हृ
द्यं वामगुह्यं सदाशिवं सद्यःपादं महादेवं महायोगीन्द्रभूषणं विश्वतःपादवदनं विश्वतोक्षिकरं परं ब्रह्मणोऽधिपतिं
सर्गस्थितिसंहारकारणं तुष्टाव पुनरिष्टाभिर्वाग्भिर्वरदमीश्वरं इत्यादिमहापुराणे लैंगे ब्रह्माविष्णुप्रधानाय ब्रह्म।

उत्तरस्यंमकारंतस्यमध्यतः तस्योपरितदापश्यन्स्फटिकप्रभवंप्रभुं तुरीयातीतममलंनिष्कलंनिरुपद्रवं निर्द्वंद्वं।
केवलंशून्यंबाह्याभ्यंतरवर्जितं सबाह्याभ्यंतरेचैवसबाह्याभ्यंतरस्थितं आदिमध्यांतरहितमाद्येनस्यापिकारणं मात्रा आनंदस्यापि
स्तिस्त्रस्त्वर्धमात्रंनादाख्यंब्रह्मसंज्ञितं ऋग्यजुःसामवेदास्वैमात्रारूपेणमाधवः वेदशब्देभ्यएवेदंविश्वात्मान
मचिंतयत् तदाभवहृषिस्तत्र ऋषेःसारतमंशुभं तेनैवऋषिणाविष्णुर्ज्ञातवान्परमेश्वरं चिंतयारहितोरुद्रोवा
चोयंमनसासह अप्राप्यतन्निवर्तंतेवाच्यस्त्वेकाक्षरेणसः एकाक्षरेणयद्वाच्यममृतंपरमकारणं एकाक्षरादकारा। सत्यमानंदममृतं परंब्रह्मपरात्परं ५॥
ख्योतभगवान्कनकांडजः एकाक्षरान्मकाराख्योभगवान्नीललोहितः सर्वकर्ताह्यकाराख्योउकाराख्यस्तमोहि
तः मकाराख्यस्त्वयोनित्यमनुग्रहकरोभवः मकाराख्योविभुर्बीजीह्यकारोबीजउच्यते उकाराख्योहरिर्योनिः
प्रधानपुरुषेश्वरः बीजीबीजंचवैयोनिर्नादाख्यश्चमहेश्वरः बीजीविभज्यचात्मानंस्वेच्छयातुव्यवस्थितः अस्य
लिंगादभूद्बीजमकारंबीजिनःप्रभोः उकारयोनौनिःक्षिप्तमवर्द्धतसमंततः सौवर्णमभवच्चांडमवेद्यादितद
तरं अनेकाब्दंतथाचाप्सुदिव्यमंडंव्यवस्थितं ततोवर्षसहस्रांतेद्विधाकृतमजोद्भवं अंडमप्सुस्थितंसाक्षाद्।
व्याघातेनेश्वरेणतु तस्यांडस्यशुभंहैमंकपालंचोर्ध्वतःस्थितं जज्ञेयद्यौस्तदपरंपृथिवीपंचलक्षणा तस्मादंडोद्भवो
जज्ञेवकाराख्यश्चतुर्मुखः सस्रष्टासर्वलोकानांसएवविविधःप्रभुः एवमोमोमितिप्रोक्तमित्याहुर्यजुषांवराः य
जुषांवचनंश्रुत्वाऋचःसामानिसादरं एवमेवहरिर्ब्रह्मन्नूत्याज्ञःश्रुतयस्तदा ततोविज्ञायदेवेशंयथावत्स्तुतिसंभ
वैः मंत्रैर्महेश्वरंदेवंतुष्टावसुमहोदयं आवयोस्तुष्टिनाहृष्टोलिंगेतस्मिन्निरंजनः दिव्यशब्दमयंरूपमास्थायप्रह

आवयो स्तुतिसंतुष्टो =

लिंग॰ पु॰ २३

23

धायगंधिने गणाधिपतयेतुभ्यंब्रह्मगुत्यतमायते अनंतविश्वरूपायअनाद्याया ऽमलायच शाश्वतायवरिष्ठायवा
हगर्भाययोगिने संस्थितायांभसांमध्ये आवयोर्ब्रह्मवर्चसे गोप्त्रेहर्त्रेसदाभर्त्रेनिधनायेश्वरायच अचेतनायचिन्त्याय
चेतनायसहारिणे अरूपायसुरूपायअनंगायांगहारिणे भस्मदिग्धशरीरायभानुसोमाग्निहेतवे श्वेतायश्वेतवर्णा
यतुहिनाद्रिप्रियायत सुश्वेतायसुवक्त्रायनमःश्वेतशिखायच श्वेतास्यायमहास्यायनमस्तेश्वेतलोहिते सुतरायवशि
ष्ठायनमोडुंडुभिनेहर शतरूपायरूपायनमःकेतुमतेसदा सुकेशायविकेशायविशोकायकपर्दिने विपाशाय
सुपाशायनमस्तेपापनाशिने सुहोत्रायहविष्यायसुब्रह्मण्यायसूरिणे सुशिखायसुवक्त्रायदुर्मदायदमायच स
नत्कुमारोमारंगरमणायमहात्मने लोकाक्षिणेसुधामायनमोविरजसेसदा शंखपादायशंखायरजसेतमसेन
मः सुवाहायविवाहायविवादवरदायच नमःशिवायरुद्रायप्रधानायनमोनमः सारस्वतायमेघायमेघवाह
यतेनमः त्रिगुणायनमस्तुभ्यंचतुर्व्यूहायतेनमः संसारायनमस्तुभ्यंनमःसंसारहेतवे मोक्षायमोक्षभूतायमोक्ष
कर्त्रेनमोनमः शर्वायचनमस्तुभ्यंनमोनारायणायच नमोहिरण्यगर्भायआदिदेवायतेनमः आत्मनेऋषयेतुभ्यं
स्वामिनेविश्वेनमः नमोभगवतेतुभ्यंनागानांपतयेनमः ॐकारायनमस्तुभ्यंसर्वज्ञायनमोनमः नमःस्वर्गापव
र्गायप्रज्ञानांसृष्टिहेतवे महादेवायदेवानामीश्वरायनमोनमः सर्वायचनमस्तुभ्यंशर्वायशमनायच ब्रह्मणेचैव
भूतानांसेव्यज्ञायनमोनमः महात्मनेनमस्तुभ्यंप्रज्ञारूपायवैनमः विरामेतितेस्तुत्वाब्रह्मणासहितोहरिः इदंस्तो
त्रंपरंपुण्यंसर्वपापप्रणाशनं यःपठेच्छृणुयाद्वापिश्रावयेद्वाद्विजोत्तमान् सयातिब्रह्मणोलोकंसर्वपापरतोपिस

लिंगोत्पत्तिःसप्तदशोध्यायः १७ सूतउवाच ॐ एकाक्षरायरुद्रायअकारायात्मरूपिणे उंकारायादिदेवायविद्यारूपा
यवैनमः तृतीयायमकारायशिवायपरमात्मने नलायचजलाख्यायनमस्तेजलव्यापिने चिंतयेचिंत्यरूपायस्तुति
रूपायवैनमः ज्ञानायज्ञानगम्यायनमस्तेसंविदेसदा शिवतरायनमस्तुभ्यंनीलकंठायवैनमः अर्द्धनारीशरीरायअव्य
क्तायनमोनमः एकादशविभेदायस्थाणवेतेनमःसदा नमःसारायपात्रायभवायभयहारिणे नमस्कारायदेवाय
शंकरायेश्वरायच नमोंबिकाधिपतयेउमायाःपतयेनमः कपर्दिनेनमस्तुभ्यंनागांगाभरणायच वृषांतकायश
र्वायकर्त्रेहर्त्रेनमोनमः विरामेतिरामायरमानाथायतेविभो कपर्दिनेनमस्तुभ्यंनागांगाभरणायच नमोराजा
धिराजायराज्ञामधिपते[illegible]ने नमःशैलाधिपतयेपलाशाकृतिनेनमः नमःकेयूरकेशायगोपतेतेनमोनमः नमः
श्रीकंठनाथायनमोलकुंडपाणये भुवनेशायदेवायवेदशास्त्रेनमोनमः सारंगायनमस्तुभ्यंराजहंसायतेनमः
कनकांगदहारायविश्वगर्भायतेशिवे सूर्याग्निसोमवर्णाययजमानायतेनमः सर्पकुंडलमालायकटिसूत्रीकृ
ताहिने वेदगर्भायगर्भायविश्वगर्भायतेशिव अग्नयेरुद्ररूपायरुद्राणांपतयेनमः [illegible]कुंड[illegible]य शिवायशि
वमंत्रायसद्योजातायवेधसे वामायवामदेवायवरदायामृतायते अघोरायातिघोरायसद्योजातायरंहसे ईशाना
६१ यमशानायअतिवेगायवेगिने नमोनिधनपादायऊर्द्धलिंगायलिंगिने हेमलिंगायहेमायवारिलिंगायचांभसे
शिवायशिवलिंगायव्यापिनेव्योमव्यापिने वायवेवायुवेगायनमस्तेवायुरूपिणे तेजसेतेजसांहर्त्रेनमस्तेव्योमव्या
पिने पृथिव्यैचांतरिक्षायपृथिवीव्योमव्यापिने [illegible]ने शब्दायस्पर्शरूपायरसगं

लिंग॰ पु॰ २४

२५

वोभवत् भवंच दृष्टवांस्तेन ब्रह्मणा पुरुषोत्तमः एतत्सर्वं विशेषेण सांप्रतं वक्तुमर्हसि १ सूत उवाच आसीदेकार्णवं
घोरमविभागं तमोमयं मध्ये चैकार्णवे तस्मिन् शंखचक्रगदाधरः जीमूताभोंबुजाक्षस्त्वकिरीटी श्रीपतिर्हरिः ना
रायणमुखोद्गीर्णः सोऽष्टमः पुरुषोत्तमः अष्टबाहुर्महावक्षा लोकानां योनिरुच्यते किमप्यचिंत्यं योगात्मा योग
मास्थाय योगवित् फणासहस्रकलितं तमप्रतिमवर्चसं महाभोगपतेर्भोगं स्वधाम्नाचमहोच्छ्रितं तस्मिन्महा
तिपर्यंके शेते वै कनकप्रभे एवं तत्र शयानेन विष्णुना प्रभविष्णुना आत्मारामेण क्रीडार्थं लीलयाक्लिष्टकर्म।
णा शतयोजनविस्तीर्णं तरुणादित्यसन्निभं वज्रदंडं महोत्सेधं नाभ्यां सृष्टं तु पुष्करं तस्यैवं क्रीडमानस्य समी २॰
पं देवमीदृशः हेमगर्भांडजो ब्रह्मा रुक्मवर्णो ह्यतीन्द्रियः चतुर्वक्त्रो विशालाक्षः समागत्य यदृच्छया श्रिया यु
क्तेन दिव्येन सुप्रभेण सुगंधिना क्रीडमानं च पद्मेन दृष्ट्वा ब्रह्मा तमभ्येजिवान् स विस्मयमथागम्य सौम्यसंपन्नया
गिरा प्रोवाच को भवान् शेते आश्रितो मध्यमंभसां अथ तस्याच्युतः श्रुत्वा ब्रह्मणस्तु शुभं वचः उदतिष्ठत पर्यं
काद्विस्मयोत्फुल्ललोचनः प्रत्युवाचोत्तरं चैव कल्पे कल्पे प्रतिश्रियः कर्तव्यं च कृतं चैव क्रियते यच्च किंचन।
द्यौरंतरिक्षं भूश्चैव परं पदमहं प्रभुः तमेवमुक्त्वा भगवान् विष्णुः पुनरथाब्रवीत् कस्त्वं खलु समायातः समी
पं भगवान् कुतः कुत्र भूयश्च गंतव्यं कुत्र वा ते प्रतिश्रयः को भवान् विश्वमूर्तिर्वै कर्तव्यं किं च ते मया एवं ब्रुवंतं
वैकुंठं प्रत्युवाच पितामहः मायया मोहितः शंभोरविज्ञाय जनार्दनं मायया मोहितं तेजस्त्वविज्ञातं महात्मनः
यथा भवांस्तथैवाहमादिकर्ता प्रजापतिः विस्मयं चैव वचः श्रुत्वा ब्रह्मणो लोकतंत्रिणः अनुज्ञातश्च तेनाथ वैकुं

ने तस्माज्जपेत्पठेन्नित्यं भावयेद्ब्राह्मणान्सदा सर्वपापविशुद्ध्यर्थं ब्रह्मणापरिभाषितं इत्यादिलैंगेविष्णुकृतलिंगस्त
वेऽष्टादशोध्यायः १८ सूतउवाच अथोवाचमहादेवः प्रीतोहंसुरसत्तमौ पश्यतांमांमहादेवंभयंसर्वंप्रमुच्यताम्
युवांप्रसूतौगात्रेभ्योममसर्वंमहाबलौ अयंमेदक्षिणेपार्श्वेब्रह्मालोकपितामहः वामपार्श्वेचमेविष्णुर्विश्वात्माहृद
योद्भवः प्रीतोहंयुवयोःसम्यक्वरंदद्मियदीप्सितं एवमुक्त्वातमोविष्णुंकराभ्यांपरमेश्वरः पस्पर्शसुशुभाभ्यांच
कृपयासकृपानिधिः ततःप्रहृष्टमनसाप्रणिपत्यमहेश्वरं प्राहनारायणोनाथेलिंगस्थेलिंगवर्जिते यदिप्रीतिः
समुत्पन्नायदिदेयोवरस्त्वसौ भक्तिर्भवतुनोनित्यंत्वयिचाव्यभिचारिणी ब्रह्मणेविष्णवेचैवमस्त्वाहशीतांशुभूषणः
जानुभ्यामवनींगत्वापुनर्नारायणःस्वयं प्रणिपत्यचविश्वेशंप्राहमंदतरंवशी आवयोर्देवदेवेशविवादमपिशो
भने इहागतोभवान्यस्माद्विवादशमनायनौ तस्यतद्वचनंश्रुत्वापुनःप्राहहरोहरिं प्रणिपत्यस्थितंमूर्ध्नाकृतां
जलिपुटंस्मरन् महेश्वरउवाच प्रलयस्थितिसर्गाणांकर्तात्वंधरणीपते वत्सवत्सहरेविश्वंपालयैतच्चराचरम्
त्रिधाभिन्नोह्यहंविष्णोब्रह्मविष्णुहराख्यया सर्गरक्षालयगुणैर्निष्कलःपरमेश्वरः संमोहंत्यजभोविष्णोपालयै
नंपितामहं पाद्मेभविष्यतिसुतःकल्पेतवपितामहः तदाद्रक्ष्यसिमांचैवसोपिद्रक्ष्यतिपद्मजः एवमुक्त्वासभ
गवांस्तत्रैवांतरधीयत तदाप्रभृतिलोकेस्मिंल्लिंगेचाप्यप्रतिष्ठितः लिंगवेदीमहादेवीलिंगंसाक्षान्महेश्वरः लय
नाल्लिंगमित्युक्तंतत्रैवनिखिलंशुभे यस्तुलिंगंपठेन्नित्यमाख्यानंलिंगसन्निधौ सयातिशिवतांविप्रोनात्रकार्या
विचारणा इत्यादिलैंगेविष्णोःप्रबोधेएकोनविंशोध्यायः १९ ऋषयऊचुः कथंपाद्मेपुराकल्पेब्रह्मापद्मोद्भ

लिंग॰ पु॰ २५

25

पर्यंतं त्वं तु मे भृशं एतन्मे संशयं ब्रूहि किं वा त्वं च चिकीर्षसि एतदेवं विदं वाक्यं पितामहमुखोद्गतं श्रुत्वाऽप्रतिमकर्मा हि
भगवानसुरांतकृत किं त्वा वत्स त्वमेनाभ्यां भूतमेकं तु तालयं वदंति प्रियमत्यर्थमन्तुष्टास्य मया कृतः इत्येवं मन
साध्यात्वा मत्सु वाचेदमुक्तं किमेवं भगवानस्मिन्नुदरे जातसंभ्रमः किं मया चक्रुते देव यन्मां प्रियमनुत्तमं भा
षसे पुरुषश्रेष्ठ किमर्थं ब्रूहि तत्वतः एवं ब्रुवाणं देवेशं लोकयात्रानुतत्परं प्रत्युवाचांबुजाभाक्षो ब्रह्मा वेदनिधिः
प्रभुः यो मत्वोदरे सर्वं प्रविष्टोऽहं त्वदिच्छया यथा ममोदरे लोकाः सर्वे दृष्टास्त्वया प्रभो तथैव दृष्टाः कार्त्स्न्येन म
या लोकास्तवोदरे ततो वर्षसहस्रांते ह्यागतस्य मे प्रभो त्वया मत्सरभावेन मां वशीकर्तुमिच्छता प्राशुद्वाराणि
सर्वाणि पिहितानि समंततः ततो मया महाभाग संचिंत्य स्वेन चेतसा लब्धो नाभिप्रदेशेन पद्मसूत्राद्धि निर्गमः
मा भूत्ते मनसोल्पोपि व्याघातो योऽपि कथंचन इत्येषानुगतिर्विष्णो कार्याणां मे प्रसर्गिणां यन्मयानंतरे कार्यं ब्रूहि
किं करवाण्यहं ततः परममेयात्मा हिरण्यकशिपोरिपुः अनवद्यां प्रियतमां शिवां वाणीं पितामहात् श्रुत्वा विग
तमात्सर्यं वाक्यमस्मेदं रोहरिः नह्येवमीदृशं कार्यं मया व्यवसितं तव मां तु बोधयितुं कामेन क्रीडापूर्वं यदृच्छया प्रा
शुद्वाराणि सर्वाणि पिहितानि मयात्मनः न तेन्यथावगंतव्यो मान्यः पूज्यश्च मे भवान् सर्वं मर्षय कल्याण यन्मया
पकृतं तव अस्मान्मयोह्यमानस्त्वं पद्मादवतर प्रभो नाहं भवंतं शक्नोमि वोढुं तेजोमयं गुरुं पुत्रो भव ममारिघ्न सोढुं =
दशाप्स्यसि शोभनं मद्भाववचनं ब्रूहि पद्मादवतर प्रभो सत्याथ न्यो महायोगी त्वमीड्यः प्रणवात्मकः अद्यप्रभृ
ति सर्वेश श्वेतोष्णीषविभूषितः पद्मयोनिरितीत्येवं ख्यातो नाम्ना भविष्यसि पुत्रो मे त्वं भव ब्रह्मन् सत्यलोकाधिक

अप्रित्याविपुलाम्भो
गान्विष्णुर्नानावि
धाश्रयान् ॥

देविस्मयसंभवः कौतूहलान्महायोगी प्रविष्टो ब्रह्मणो मुखं इमानष्टादशद्वीपान्ससमुद्रान्सपर्वतान् प्रविश्य
सुमहातेजाश्चातुर्वर्ण्यसमाकुलान् ब्रह्मणस्तूदरे दृष्ट्वा सर्वं विस्मर्महाभुजः अहोस्य तपसो वीर्यमित्युवाच
पुनःपुनः ऊर्ध्वं दित्वा विविधांल्लोकान्विष्णुर्नानाविधाश्रयान् ततो वर्षसहस्रांते नांतं हि ददृशे यदा तदास्य व
क्त्रान्निष्क्रम्य पन्नगेंद्रनिकेतनः नारायणो जगद्धाता पितामहमथाब्रवीत् भगवानादिं तं मध्ये कालो दि
शो नभः नाहमंतं प्रपश्यामि उदरस्य तवानघ एवमुक्त्वाब्रवीद्भूयः पितामहमिदं हरिः भवानप्येवमेवाद्य
शाश्वते हि ममोदरे प्रविश्य लोकान्पश्येतान्ननोपम्यान्सुरोत्तम ततः प्रल्हादिनीं वाणीं श्रुत्वा तस्याभिवंद्य
च श्रीपतेरुदरं भूयः प्रविवेश पितामहः तथैव लोकान्गर्भस्थान्सोपश्यत्सत्यविक्रमः पर्यटित्वा तु देवस्य
ददृशेंतं न वै हरेः तावागतिं तस्य पितामहस्य द्वाराणि सर्वाणि पिधाय विष्णुः विभुर्मनः कर्तुमियेष चाशु स एव
प्रसुप्तोहमिति प्रचिंत्य ततो द्वाराणि सर्वाणि पिहितानि समीक्ष्य सः सूक्ष्मं कृत्वात्मनो रूपं नाभ्यां द्वारमविंदत प
द्मसूत्रानुसारेण अन्वतुष्य पितामहः उज्जहारात्मनो रूपं पुष्कराच्चतुराननः विरराजारविंदस्थः पद्मगर्भसमद्यु
तिः ब्रह्मा स्वयंभूर्भगवान्जगद्योनिः पितामहः एतस्मिन्नंतरे नाभ्यामेकैकस्य तु कृत्स्नशः वर्तमाने तु संहर्षे म
ध्ये तत्स्वर्णवस्य तु कृतो वापरिमेयात्मा भूतानां प्रभुरीश्वरः शूलपाणिर्महादेवो हेमवर्णवरच्छदः आगच्छद्यत्र
सोनंतो नागभोगपतिर्हरिः शीघ्रं विक्रमतस्तस्य पद्भ्यामाक्रांतपीडिताः उद्भूतास्तूर्णमाकाशे स्थूलास्तोयबिं
दवः अत्युष्णाश्चातिशीताश्च वायुस्तत्र ववौ पुनः तं दृष्ट्वा महदाश्चर्यं ब्रह्मा विष्णुमभाषत अवविंदस्व शीतोस्माः कं

९९

लिंग॰
पु॰
२८

26

याविद्धिस्तस्य ग्राम्यगमनस्य च पुरालिंगाद्भुद्धीजे प्रथमं वा हि सर्गिकं ममयोनौ समायुक्तं तद्वीजं कालपर्ययात् हि
रण्मयमकूपारं योन्यामंडमजायत शतानि दशवर्षाणामंडमप्सु प्रतिष्ठितं अंते वर्षसहस्रस्य वायुना तद्द्विधा कृते
कपालमेकं द्यौर्जज्ञे तेकपालमपरं क्षितिः उल्बं तस्य महत्सेधो यो सौ कनकपर्वतः ततस्तु प्रतिसंधात्मा देवो देवेश्वरः प्र
भुः हिरण्यगर्भो भगवांस्तस्मिन्जज्ञे चतुर्मुखः अन्तरार्केंदुनक्षत्रं शून्यं लोकमवेक्ष्य च कोसीत्यपि च विख्याते कुमा
राश्चैव भवंस्तदा प्रियदर्शनास्तत्तनयाः ये तीताः सर्वजास्तव भवनानलसंकाशाः पद्मपत्रायतेक्षणाः श्रीमान्सन
त्कुमारा ऋषभश्चैवोर्ध्वरेतसो सनकः सनंदनश्चैव तथैव च सनातनः उत्पन्नाः समकालास्ते बुद्ध्यातीद्रियदर्शिनाः
उत्पन्नाः प्रतिभात्मानो जगदुत्पीदतिवर्हिः नारे [illegible] नेव कर्माणि तापत्रयविवर्जिताः अस्य सौख्यं वहुक्लेशं जरा
शोकसमन्वितं जीवितं मरणं चैव संभवश्च पुनः पुनः स्वल्पभूतं सुखं स्वर्गे दुःखानि नरके तथा विदित्वा चागमं
सर्वमवश्यभवितव्यतां ऋषभं सनत्कुमारं च दृष्ट्वा त्वेतौ वशे स्थितौ त्रयस्त्वितरे त्रीन्गुणान्हित्वा आत्मजाः सनकादयः
वैवर्तेन तत्त्वानेन प्रवृत्तास्ते महौजसः ततस्तेषु प्रवृत्तेषु सनकादिषु वै त्रिषु भविष्यसि विमूढस्त्वं मायया शंकर
स्य तु एवं कल्पे च कल्पे च संज्ञा नश्यति तेन वै कल्पशेषाणि भूतानि सूक्ष्माणि पार्थिवानि च सर्वेषां त्वीश्वरी माया
जागर्ति समुदाहृता यएष पर्वतो मेरुर्देवलोके उदाहृतः तस्यैवेदं हि माहात्म्यं विद्धि देववरस्य तु ज्ञात्वा वेषु र सद्भा
वं ज्ञात्वा मां वा उमेतत्ताः महादेवं महायोगं भूतानां वरदं प्रभुं प्रणम्य मे यस्तु प्रातर्नमस्कृत्वा जगद्गुरुं त्वां च मा
चैव संक्रुद्धे निःश्वासं विदिदेहे दये एवं त्वां महायोगमभ्युतिष्ठन्महावलं अहं त्वामग्रतः कृत्वा स्तोष्याम्यनलं प्रभं॥

ताः

सा

प्रभो ततः स भगवान्देवो वरं दत्वा किरीटिने एवं भवतु चेत्युक्त्वा प्रीतात्मा गतमत्सरः प्रत्यासन्नमथायांतं बालार्काभं म
हाननं भगवत्यद्भुते दृष्ट्वा नारायणमथाब्रवीत् अप्रमेयो महावक्त्रो दंष्ट्री ध्वस्तशिरोरुहः दशबाहुस्त्रिशूलांको नय
नैर्विश्वतः स्थितः लोकप्रभुः स्वयं साक्षाद्विकृतो मुंजमेखली मेढ्रेणोर्ध्वेन महता नर्दमानोतिभैरवः कः खल्वेष पुमा
न्विश्वात्मा तेजोराशिर्महाद्युतिः व्याप्य सर्वा दिशो द्यां च इत एवाभिवर्त्तते तेनैवमुक्तो भगवान्विष्णुर्ब्रह्माणमब्रवीत् प
द्भ्यां तलनिपातेन यस्य विक्रमतोर्णवे वेगेन महताकाशे व्युत्थिताश्च जलाशयाः स्थूलाभिर्विद्धतोत्यर्थं सेव्यते प
य द्मसंभवः घ्राणजेन च वातेन कंपमानं त्वया सह दोधूयते महापद्मं स्वच्छंदं मम नाभिजं स एष भगवानीशो ह्यना
दिमानंतकृत्प्रभुः भवानहं च स्तोत्रेण उपतिष्ठाव गोध्वजं ततः क्रुद्धोंबुजाभाक्षं ब्रह्मा प्रोवाच केशवं भवान्न नूनमा
त्मानं वेत्ति लोकप्रभुं विभुं ब्रह्माणं लोककर्तारं मां न वेत्सि सनातनं कः प्रभुः शंकरो नाम आवयोर्व्यतिरिच्यते
वाक्यं हरिरभाषत मा मैवं वद कल्याण परिवादं महात्मनः महायोगेश्वरो येमी ५६
तस्य तत्क्रोधजं श्रुत्वा ऽनाथर्षीवरप्रदः हेतुः सर्वार्थं जगतः पुराणः पुरुषोव्ययः बीजी खल्वेष बीजानां ज्योतिरेष प्र
काशते बालक्रीडनकैर्देवैः क्रीडते शंकरः स्वयं प्रधानमव्ययं योनिरव्यक्तं प्रकृतिस्तमः ममैतानि नामानि नित्यं प्र
सवधर्मिणः यः कः स इति दुःखार्त्तैर्दृश्यते यतिभिः शिवः एष बीजी भवान्बीजमहं योनिः सनातनः स एवमुक्तो विश्वा
त्मा ब्रह्मा विष्णुमभाषत भवान्योनिरहं बीजं कथं बीजी महेश्वरः एतन्मे सूक्ष्ममव्यक्तं संशयं छेत्तुमर्हसि ज्ञात्वा चैव वि
योत्पत्तिं ब्रह्मणो लोकतंत्रिणः इदं परमसादृश्यं प्रश्नमभ्यवदद्धरिः अस्मान्महत्तरं भूतं गुह्यमस्मान्न विद्यते महतः परमं
धाम शिवमध्यात्मिनां पदं द्वैधीभावेन चात्मानं प्रविभज्य व्यवस्थितः निष्कलः सूक्ष्ममव्यक्तं सकलश्च महेश्वरः अस्यमा

शाखानां गुह्यानां पतये नमः गोकर्णाय च गोघ्नाय च शंकुकर्णाय वै नमः वरदाय च संधाय स्कन्नाय हिरदाय च नमः स
लिंग
पु.
२२ गणानां पतये गणानां पतये नमः अंभसां पतये चैव तेजसां पतये नमः नमोस्तु लक्ष्मीपतये श्रीपते श्रीमते नमः। ब
लाबलसमूहाय अक्षोभ्य क्षोभणाय च दीप्तशृंगैकशृंगाय वृषभाय ककुद्मिने नमः स्थैर्याय पुरुषे तेजसानुव्र
ताय च अतीताय भविष्याय वर्तमानाय ते नमः सुवर्चसे च वीर्याय शूराय ह्यजिताय च वरदाय वरेण्याय वराही
य महात्मने नमो भूताय भव्याय महते प्रभवाय च जनाय च नमस्तुभ्यं तपसे वरदाय च अधरे महते चैव नमः स
२१ र्वगताय च नमो बंधाय मोक्षाय स्वर्गाय नरकाय च भवाय भजमानाय रुद्राय पावकाय च अभ्युदीर्णाय दीप्ताय
निर्गुणाय गुणाय च नमः शान्ताय शास्त्राय नमस्त्वाभरणाय च हुताय उपहूताय प्रहुतप्रमिताय च नमस्ति
ष्ठाय हर्ताय अग्निष्टोमशताय च सत्स्थाय नमस्त्वैवदक्षिणाव भक्ष्याय च अहिंसायायलोभाय पशुमंत्रौषधा
धाय च नमस्त्विष्टप्रदानाय तुष्टिदाय सत्वशिल्पिने नमस्ते दिव्यहाराणाय विहाराणाय स्रग्विणे विश्वाय विश्व
रूपाय विश्वतः शिरसे नमः सर्वतः पाणिपादाय रुद्रायाप्रतिदाय च नमो हव्याय कव्याय हव्यवाहाय वै नमः प्रतिमाय च —
नमः सिद्धाय शान्ताय इष्टाय याज्यवराय च सवीराय सुघोराय विस्तृताय तताय च नमः स्थूलाय सूक्ष्माय दृश्या
शिशिराय च दृश्याय सर्वतः वर्धते ज्वलिते चैव शिखराय च वायवे नमः स्तबककेशाय उडुपर्णशिवाय च नमो नमः सुवर्णा
य तपनीयनिभाय च विरूपाक्षाय अक्षताय पिंगलाक्षाय महौजसे वृष्टिघ्नाय नमस्तुभ्यं वै नमः सौम्येक्षणाय च नमो धू
म्राय श्वेताय कृष्णाय लोहिताय च पिशिताय पिशंगाय पीताय च निषंगिणे नमस्ते सविशेषाय निर्विशेषा।

इत्यादिमहापुराणेलैंगेलिंगोत्पत्तिर्विंशोध्यायः २० सूतउवाच ब्रह्माणमग्रतःकृत्वाततःसागरुडध्वजः अतीतैश्च
भविष्यैश्चवर्तमानैस्तथैवच नामभिःछांदसैश्चैवइदंस्तोत्रमुदीरयेत् विष्णुरुवाच नमोस्तुतेभगवन्नमितानं
ततेजसे नमःक्षेत्राधिपतयेबीजिनेशूलिनेनमः सुमेढ्रायमभेढ्रायदंडिनेरूक्षतेजसे नमोज्येष्ठायश्रेष्ठायपूर्वायप्र
थमायच नमोमान्यायपूज्यायसद्योजातायवैनमः गह्वरायगिरीशायहेमवीरंवरायच नमस्तेब्राह्मणादीनां।
भूतानांप्रभवेनमः वेदानांप्रभवेचैवस्मृतीनांप्रभवेनमः नमोयोगस्यपतयेसांख्यस्यप्रभवेनमः वेदकर्मावदा
नानांदृक्षाणांप्रभवेनमः नमोध्रुवनिबद्धानामृक्षाणांप्रभवेनमः ऋषीणांप्रभवेतुभ्यंग्रहाणांप्रभवेनमः वि
द्युताशनिमेघानांगर्जितप्रभवेनमः नमोदधीनांप्रभवेद्वीपानांप्रभवेनमः अद्रीणांप्रभवेचैववर्षाणांप्रभवे।
नमः नमोनदानांप्रभवेनदीनांप्रभवेनमः नमौषधीनांपतयेवृक्षाणांपतयेनमः धर्माध्यक्षायधर्मायस्थि
तीनांपतयेनमः नमोरसानांपतयेरत्नानांपतयेनमः क्षणानांप्रभवेचैवलवानांप्रभवेनमः अहोरात्रार्द्धमा।
सानांमासानांपतयेनमः ऋतूनांप्रभवेतुभ्यंसंख्यायाःप्रभवेनमः मन्वंतराणांप्रभवेकल्पानांप्रभवेनमः अ
परार्द्धस्यप्रभवेपरार्द्धप्रभवेनमः पुराणप्रभवेतुभ्यंसर्गाणांप्रभवेनमः चतुर्विधस्यसर्गस्यप्रभवेनंतचक्षुषे
कल्पोदयनिबंधानांवृत्तीनांप्रभवेनमः नमोविश्वस्यप्रभवेब्रह्माधिपतयेनमः विद्यानांप्रभवेचैवपशूनांप
तयेनमः वाग्वृषायनमस्तुभ्यंपुराणवृषभायच पितृणांपतयेचैवविद्याधिपतयेनमः नमोभूताधिप्रभवेमं
त्राधिपतयेनमः नमःस्तुतीनांपतयेसिद्धानांपतयेनमः गरुडस्यचसर्पाणांपक्षिणांपतयेनमः सर्वगुह्यपि।

नंदते क्रीडिते चैव नमः प्रमुदितात्मने नमो मृडाय स्वपते धावते तिष्ठते नमः ॥२॥

टितायच ध्यायते जृंभते चैव कंदते द्रवते नमः वल्गते क्रीडते चैव लंबोदरशरीरिणे नमस्कृत्याय कृन्ताय मुंडाय
लिंग॰ विकटाय च नमः उन्मत्तवेशाय किंकिणीकाय ते नमः नदीवक्तुर्दते चैव नमः प्रमुदितात्मने नमो मृडाय स्वपते तथा
पु॰ वते तिष्ठते नमः नमो विकृतवेशाय क्रूरायामर्षणे नमः अप्रमेयाय गोप्त्रे च दीप्ताय निर्गुणाय च वामप्रियाय वामा
२८ यचूडामणिधराय च नमः स्तोकाय तनवे गुणैरप्रतिमाय च लोकधात्री त्वियं भूमिः पादौ सज्जनसेवितौ सर्वेषां सि
चूडामणिधराय च ॥ द्धयोगानामधिष्ठानं तवोदरं मध्येंतरिक्षं विस्तीर्णं तारागणविभूषितं स्वातेः पथ इवाभाति श्रीमान् हारस्तवो
28 रसि दिशो दशभुजास्ते भ केयूरांगदभूषिताः विस्तीर्णपरिमाणाश्च नीलांजनचयोपमाः कंठस्ते शोभते श्री
मान् पद्मरागविभूषिताः विस्तीर्णपरिमाणाश्च नीलांजनचयोपमाः दंष्ट्राकरालं दुर्धर्षमनौपम्यं मुखं तव पद्म
मालाकृतोष्णीषं शिरो द्यौः शोभते धिकं दीप्तिः सूर्ये वपुश्चंद्रे स्थैर्यं भूम्यनिले बलं ओष्ण्यमग्नौ प्रभुर्वंशे न्यमप्सु श
ह्रोंतरेतया अक्षरांतरनिष्पादा गुणानेतान्विदुर्बुधाः जपो जप्यो महादेवो महायोगो महेश्वरः पुरेशयो गुहावासी
खेचरो रजनीचरः तपोनिधिर्गुहगुरुर्नंदिनो नंदिवर्द्धनः हयशीर्षः शिरोधाता विधाता भूतभावनः बोद्धव्यो बो
धनो बोद्धा धूर्वहो दुःप्रकंपनः बृहद्रथो भीमकर्मा बृहत्कीर्तिर्धनंजयः घंटाप्रियो ध्वजी छत्री पिनाकी ध्वजिनीप
तिः कवची पट्टिशी खड्गी पाशहस्तः परश्वधी अघस्मरस्त्वनघः शूरो देवराजो रिमर्दनः त्वां प्रसाद्य पुरास्माभिर्द्विषन्तो
निहता युधि अग्निः सदार्णवस्त्वं वपिबन्नपि न तृप्यसे क्रोधाकारः प्रसन्नात्मा कामदः कामगः प्रियः ब्रह्मणो ब्र
ह्मचारी च गोप्ता त्वं शिवपूजितः देवानामक्षयः कोशस्त्वया यज्ञः प्रकल्पितः हव्यं तवेदं वहति वेदोक्तं हव्यवाहनः

यवेनमः नमःह्रस्वायह्रस्वायउपवीजायवैनमः नमःहेमायप्रह्वायवत्सलायनमोनमोनमः नमोऽनन्तायलास्याय।
नमःसत्यायभूर्भुवे नमोवैपद्मवर्णायमन्युघ्नायचमन्यवे नमोगौरायकृष्णायकद्रवीरोहितायच महासंध्याभ्र
वर्णायचारुरूपायदीप्तिने नमःकमलहस्तायदिग्वाससायकपर्दिने अप्रमाणायसर्वायअव्ययायामरायच न
मोगंधायरूपायशाश्वतायक्षतायाच दुर्गमायमहेशायरोधायकपिलायच सिकतायप्रवालायस्थितायप्र
स्तायच समेघसेकुल्यालायनमस्तेऽस्तुशिखंडिने चित्रायचित्रवेषायचित्रधर्मायरोधसे चेकितानायतुष्टाय
नमस्तेसुहितायच नमःशांतायदांतायवज्रसंहननायच रक्षोघ्नायविषघ्नायशितिकंठोर्ध्वमन्यवे लेलिहाय
कृतांतायतिग्मायुधधरायच संमोदायप्रमोदायकृतकृत्यायवैनमः अनामयायशर्वायमहाकालायवैनमः
प्रणयायचप्रणयायभक्तानांशर्मदायच मृगव्याधायदक्षायदक्षयज्ञांतकायच सर्वभूतात्मभूतायसर्वेशांतिम
पायच पुरघ्नायसुशस्त्रायधन्विनेचवरेषवे दस्योदंतविनाशायभगनेत्रांतकायच कामदायवरिष्ठायकामां
गदहनायच दैत्यानामंतकेशायदैत्याक्रंदकरायच रंगाकारायवक्रायनागेंद्रवदनायच महीघ्नायचतीक्ष्णाय
सर्वशीर्षधरायच श्मशानरतिनित्यायनमोस्तूलूकधारिणे नमस्तेप्राणमालायमुंडमालाधरायच प्रहीणा।
शोकैर्विविधैर्भूतैःपरिवृतायच मन्यवेगीतशीलायउपनृत्यप्रियायच नरनारीशरीरायदेव्याःप्रियकरायच ज
टिनेमुंडिनेचैवव्याघ्रयज्ञोपवीतिने नमोस्तुनृत्यशीलायसुगीर्भिर्गीयसेनमः कंककरायभीमायउग्रेक्षणधरायच
विभीषणायभीमायभगप्रमथनायच सिद्धसंघानुगीतायमहाभोगायवैनमः नमोस्तुकृत्अट्टहासायक्ष्वेलितास्फो।

लिंग॰
पु॰ रा॰
२२

सुप्रतिष्ठास्तु भक्तिर्भवतु शंकर एवमुक्तस्य विज्ञाय संभावयतु केशवं प्रददौ स महादेवो भक्तिं निजपदांबुजे भवान्स
र्वस्य कार्यस्य कर्ताहमधिदैवतं तदेवं संस्थितो वत्स गमिष्याम्यंबुजप्रभ एवमुक्त्वा तु भगवान्ब्रह्माणमपि शंकरः
कराभ्यां सुशुभाभ्यां च प्राह हृष्टतरः स्वयं मत्समस्त्वं न संदेहो वत्स भक्तश्च मे भवान् स्वस्त्यस्तु ते गमिष्यामि संज्ञाभ
वतु सुव्रत एवमुक्त्वा तु भगवांस्ततोऽन्तर्धानमीश्वरः गतवान्गणपो देवः सर्वदेवनमस्कृतः अथाप्य संज्ञां गोविंदा
29 त्पद्मयोनिः पितामहः प्रजाः स्रष्टुमनास्तेपे तत उग्रं तपो महत् तस्यैवं तप्यमानस्य न किंचित्समवर्तत ततो दीर्घेण
कालेन दुःखात्क्रोधोऽभ्यजायत क्रोधाविष्टस्य नेत्राभ्यां प्रापतन्नश्रुबिंदवः ततस्तेभ्योऽश्रुबिंदुभ्यो वातपित्तकफा
त्मकाः महाभागा महासत्वाः स्वस्तिकैरप्यलंकृताः प्रकीर्णकेशाः सर्पास्ते प्रादुरासन्महाविषाः सर्पांस्तानग्रजा
न्दृष्ट्वा ब्रह्मात्मानमनिंदत अहो धिक् तपसो मह्यं फलमीदृशकं यदि लोकवैनाशिकी यज्ञे आदावेव प्रजा मम
ततोऽ तस्य तीव्राभवन्मूर्छा क्रोधामर्षसमुद्भवा मूर्छाभिपातेन तेन जहौ प्राणान्प्रजापतिः तस्याप्रतिमवीर्यस्य देहात्का
रुण्यपूर्वकं अथैकादश ते रुद्रा रुदंतोऽभ्यक्रमंस्तदा रोदनात्खलु ते रुद्रा रुद्रत्वं खलु तेषु तत् ये रुद्रास्ते खलु प्राणा
ये प्राणास्ते तदात्मकाः प्राणाः प्राणवतां ज्ञेयाः सर्वभूतेषु संस्थिताः अत्युग्रस्य महत्त्वस्य साधुराचरितस्य च तस्य प्रा
णान्ददौ भूयस्त्रिशूली नीललोहितः लब्धासुस्तु भगवान्ब्रह्मा देवदेवमुमापतिं प्रणम्य संस्थितोऽपश्यद्गायत्र्या विश्वमी
श्वरं सर्वलोकमयं दिव्यं दृष्ट्वा स्तुत्वा पितामहः ततो विस्मयमापन्नः प्रणिपत्य मुहुर्मुहुः उवाच वचनं देवं सद्यादित्वं कथं
विभो इत्यादि लैंगे ब्रह्मविष्णुसंवादे द्वाविंशोऽध्यायः २२ सूत उ॰ तस्य तद्वचनं श्रुत्वा ब्रह्मणो भगवान्भवः ब्रह्मरूपध

प्रीतेत्वयिमहादेववयंप्रीताभवामहे भवानीशोनादिमांस्तेजोराशिर्ब्रह्मालोकानांत्वंहृदन्तादिर्गे सांख्याः प्रकृति
भ्यः परमंत्वांविदित्वाप्रक्षीणध्यानायमस्त्वांविशंति योगास्त्वांध्यायंतिसिद्धंभोगानुसंत्यजंतेपुनस्तान् येचाप्यन्ये
त्वांप्रपन्नाविशुद्धाः स्वैः कर्मभिस्तेदिव्याभोगाभवंति अप्रसंख्येयप्रवृत्तस्ययथाविभ्रः स्वशक्तितः कीर्तितेतवमाहा
त्म्यमपारस्यमहात्मनः शिवोनोभवसर्वत्रयोसिसोसिनमोस्तुते सूतउवाच यइदंकीर्तयेद्भक्त्याब्रह्मनारायणस्त
वं श्रावयेद्वाद्विजान्सर्वान्शृणुयाद्वासभावतः अश्वमेधायुतेकृत्वातत्फलंसमवाप्नुयात् पापाचारोपियोमर्त्यः
शृणुयाच्छिवसन्निधौ जपेद्वासोपिनिर्मुक्तोब्रह्मलोकंप्रपद्यते श्राद्धेवावैदिकेकार्येयज्ञांतेवभस्यांतिके कीर्तये
द्यः सतोमध्येतदनंतायकल्पते इत्यादिपुराणेलिंगोद्भवब्रह्मविष्णुकृतेश्वरस्तवेपंचविंशोध्यायः २५ सूतउवाच ॥
श्रापिवन्निवनेत्राभ्यांमधुपिंगायतेक्षणः प्रहृष्टवदनोत्यर्थंभवस्तोत्रकीर्तनात् उमापतिर्विरूपाक्षोदक्षयज्ञ
विनाशकृत् पिनाकीखंडपरशुःस्तुतः प्रीतस्त्रिलोचनः ततःसभगवान्देवःकृत्वावाग्मस्ततेतयोः ज्ञानन्नपिमहा
भागाःक्रीडापूर्वमथाब्रवीत् कौभवंतौमहात्मानौपरस्परहितैषिणौ समेतावंबुजाभासावस्मिन्घोरेमहाप्लवे ता
वूचतुर्महात्मानौसंनिरीक्ष्यपरस्परं भगवन्किंनुयत्तोयदविज्ञातंत्वयाविभो कुत्रचाखवमानंत्वमिच्छेद्वाचास्ते
त्वया तयोस्तद्वचनंश्रुत्वाअभिनंद्यानुमान्यच उवाचभगवान्देवोमधुरंश्लक्ष्णयागिरा भोभोहिरण्यगर्भत्वांत्वांच
कृष्णब्रवीम्यहं प्रीतोहमनयाभक्त्याशाश्वतानित्ययुक्तया भवंतौह्यद्ययस्मात्संममहृद्यतरावुभौ युवाभ्यांकिंददाम्य
द्यवराणांवरमीप्सितं अथोवाचमहाभागोविष्णुर्भवमिदंवचः सर्वंममकृतंतुष्टंदेवयदितुष्टोसिमेयदि त्वयिमे

द्वोर

लिंग· सी[illegible]संस्थिता तस्माद्द्वोरत्वमापन्नं ये मां वेत्स्यंति भूतले तेषां शिवश्च सौम्यश्च भवि[illegible]ष्यामि स दैवत तस्माच्च विश्वरू
पु· पो वै कल्पोयं समुदाहृतः तेषामघोरः शांतश्च भविष्याम्यहमव्ययः पुनश्च विश्वरूपत्वं यदा ब्रह्मन्ममाभवत् त्वया त्वहं
५ तदा ज्ञातः परमेण समाधिना विश्वरूपा च संभूता गायत्री लोकधारिणी इत्थं विश्वत्वमापन्नं ये मां पश्यंति भूतले तेषां
शिवश्च सौम्यश्च भविष्यामि स दैवत तस्माच्च विश्वरूपो वै कल्पोयं समुदाहृतः विश्वरूपा तदा चेयं गायत्री समुदाहृता
30 सर्वरूपा तदा चेमे संभूता मम पुत्रकाः चत्वारस्ते समाख्याताः पादा वै लोकसंमताः तस्माच्च सर्ववर्णत्वं प्रजानां वै भवि
ष्यति सर्वभक्ष्या च मेध्या च वर्णतश्च भविष्यति मोक्षो धर्मस्तथार्थश्च कामश्चेति चतुष्टयं तस्माद्वेदाश्च वेद्यं च चतुर्धा वै
भविष्यति भूतग्रामश्च चत्वार आश्रमाश्च तथैव च धर्मस्य पादाश्चत्वारश्चत्वारो मम पुत्रकाः तस्माच्चतुर्युगावस्था जग
द्वै सचराचरं चतुर्धावस्थितश्चैव चतुष्पादो भविष्यति भूर्लोकोथ भुवो लोकः स्वर्लोकोथ महस्तथा जनस्तपश्च स
वै त्यं विष्णुलोकस्ततः परं अष्टान्तरः स्थिता लोकः स्थाने स्थाने तदक्षरं भूर्भुवः स्वर्महश्चैव पादाश्चत्वार एव च भूर्लोकः
अष्टावत्रास्थि तालोकाः प्रथमः पादो भुवो लोकस्ततः परः स्वर्लोको वै तृतीयस्तु चतुर्थस्तु महस्तथा पंचमस्तु जनस्तत्र षष्ठस्तु तप उच्यते
सत्यं तु सप्तमो लोको ह्यपुनर्भवगामिनां ब्रह्मलोके स[illegible]तं स्थानं पुनरावृत्तिदुर्लभं स्कांदसोमं तथा स्थानं सर्वसि
द्धिसमन्विते रुद्रलोकः परं स्थानं पदं तद्योगिनां स्मृतं निर्ममा निरहंकाराः कामक्रोधविवर्जिताः द्रक्ष्यंते ते [illegible] द्विजा
युक्ता ध्यानतत्परमानसाः तस्माच्चतुष्पदा ह्येषां त्वया दृष्टा सरस्वती पादो वै विष्णुलोके [illegible]कौमारे शांतमुत्तमं ऊँमं मा
हेश्वरं चैव तस्माद्दृष्टाश्चतुष्पदाः तस्माच्च पशवः सर्वे भविष्यंति चतुष्पदाः ततश्चैषां भविष्यंति चत्वारो वै पयोधराः

श्वेत

वोथार्थंब्रह्माणंप्राहसस्मितं श्वेतःकल्पोयदात्वासीदेवंहंश्वेतस्तदाभवं श्वेतोष्णीषःश्वेतमाल्यःश्वेतांवरधरःसितः श्वेतास्थि
मांसरोमाचश्वेतत्वकश्वेतलोहितः तेननाम्नाचविख्यातःश्वेतकल्पस्तदात्वसौ वंदृशीताचदेवेशीश्वेतांगाश्वेतलोहिता
श्वेतवर्णातदात्वासीद्गायत्रीब्रह्मसंज्ञिता यस्मादहंचदेवेशत्वयागुह्यतपोवृतः विज्ञातस्तेनतपसासद्योजातत्वमागतः
सद्योजातेतिब्रह्मैतद्गुह्यंचैतत्प्रकीर्तितं तस्माद्गुह्यत्वमापन्नंयेवेत्स्यंतिद्विजातयः तत्समीपंगमिष्यंतिपुनरावृत्तिदुर्ल
भं यदाचैवपुनस्त्वासीलोहितोनाममामतः मत्कृतेनचवर्णेनकल्पोवैलोहितःस्मृतः तदालोहितमांसास्थिलोहि
तक्षीरसंनिभः लोहिताक्षीस्तनवतीगायत्रीवाक्प्रकीर्तिता ततोस्यलोहितत्वेनवर्णस्यचविपर्ययात् मत्कृतेनच
वर्णेनकल्पोवैलोहितःस्मृतः वामतश्चैवदेवस्यवामदेवत्वमागतः तत्रापिचमहावाहोत्वयाहंनियतात्मना विज्ञा
तस्तेनयोगेनतस्मिन्वर्णांतरेस्थितः ततश्चवामदेवेतिख्यातिंयातोस्मिभूतले येचापिवामदेवत्वंज्ञास्यंतीहद्विजा
तयः रुद्रलोकंगमिष्यंतिपुनरावृत्तिदुर्लभं यदाहंपुनरेवेहपीतवर्णोयुगक्रमात् मत्कृतेनचनाम्नावैपीतक
ल्पोभवत्तदा मत्प्रसूताचदेवेशीपीतांगीपीतलोहिता पीतवर्णातदात्वासीद्गायत्रीब्रह्मसंज्ञिता तत्रापिचमहास
त्वयोगयुक्तेनचेतसा यस्मादहंतेविज्ञातोयोगतत्परमानसः यस्मात्तत्पुरुषत्वंवैविज्ञातोहंपुनःपुनः योमांरुद्रंच ल्पोः
रुद्राणींगायत्रींवेदमातरं विभोवेत्स्यंतितपसाविमलाब्रह्मसंमिताः रुद्रलोकंगमिष्यंतिपुनरावृत्तिवर्जिताः यदा
हंपुनरेवासंकृष्णवर्णोभयानकः मत्कृतेनचवर्णेनसकल्पःकृष्णउच्यते तत्राहंकालसंकाशःकालोलोकप्रकाल
नः विज्ञातोसित्वयाब्रह्मन्घोरोघोरपराक्रमः मत्प्रसूताचगायत्रीकृष्णांगाकृष्णलोहिता कृष्णरूपाचदेवेशीतदा

श्च॰ गु॰ नां॰

लिंग॰ पु॰ ३१

स्मिन्पितामहः कल्पे यो हि ह्य भवत्सर्वलोकप्रकाशनः मनुर्वैवस्वतश्चैव नवमो योभविष्यति तदा चतुर्युगावस्थे कल्पे त
स्मिन्युगांतिके अनुग्रहार्थं लोकानां ब्राह्मणानां हिताय च उत्पत्स्यामि तदा ब्रह्मन्पुनरस्मिन्युगांतिके भविष्यामि शि
युगप्रकृत्या वै तदा तस्मिन्प्रथमे युगे द्वापरे प्रथमे चैव यदा व्यासः स्वयंप्रभुः तदाहं ब्राह्मणार्थाय कालेनास्मिन्युगांतिके
भविष्यामि शिखायुक्तः श्वेतो नाम महामुनिः हिमवत्पर्वते रम्ये छागले पर्वतोत्तमे तत्र शिष्याः शिखायुक्ता भविष्यंति त
दा मम श्वेतः श्वेतशिखश्चैव श्वेताश्वः श्वेतलोहितः चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः ततस्ते ब्रह्मभूयिष्ठं दृ
ष्ट्वा ब्रह्मगतिं परां मत्समीपं गमिष्यंति ध्यानयोगपरायणाः ततः पुनर्यदा ब्रह्मन्द्वितीये द्वापरे विभुः प्रजापतिर्यदा व्या
सः सत्यो नाम भविष्यति तदा लोकहितार्थाय सुतारो नाम नामतः भविष्यामि कलौ तस्मिन्शिष्याणां हितकाम्यया
तत्रापि मम ते शिष्या योगात्मानो दृढव्रताः भविष्यंति महाभागाश्चत्वारो लोकसंमताः सुधामा विरजश्चैव शंखपाद्वाशय
व च योगात्मानो महात्मानः सर्वे ते क्षीणकिल्बिषाः तेपि तेनैव मार्गेण ध्यानयोगसमन्विताः मत्समीपं गमिष्यंति पुनरा
वृत्तिदुर्लभं सप्तमे परिवर्ते तु यदा व्यासः शतक्रतुः विभुर्नाम महातेजाः प्रथितः सर्वजाः स्मृताः तदाप्यहं भविष्यामि का
लेतस्मिन्युगांतिके जैगीषव्यो विभुर्नाम सर्वेषां योगिनां वरः तत्रापि मम ते पुत्रा भविष्यंति युगे तदा सारस्वतश्च मेघश्च मे
घवाहः सुवाहनः तेपि तेनैव मार्गेण ध्यानयोगपरायणाः गमिष्यंति महात्मानो रौद्रं पदमनामयं वसिष्ठश्चाष्टमे व्यासः
परिवर्ते भविष्यति तदा चैवं भविष्यामि नाम्नाहं दधिवाहनः तत्रापि मम ते पुत्रा योगात्मानो दृढव्रताः भविष्यंति महायो
गास्तेषां नास्ति समो भुवि कपिलश्चासुरिश्चैव तथा पंचशिखो मुनिः वाष्कलश्च महायोगी धर्मात्मानो महौजसः प्रा
द्वापरे चैव यदा व्यासोंगिरः स्मृतः तदाप्यहं भविष्यामि हहोडो नाम नामतः तत्रापि मम ते पुत्राः चत्वारो विजपोधनाः द्विजश्रेष्ठा भविष्यंति
योगात्मानो दृढव्रताः हसुखो दुर्मुखश्चैव दुर्दुरो दुरतिक्रमः प्राप्य योगगतिं सूक्ष्मां विमला यौतकिल्बिषाः ते पि तेनैव मार्गेण योगयुक्ता महौजसः रुद्र
लोकं गमिष्यंति पुनरावृत्तिदुर्लभं पंचमे द्वापरे चैव व्यासस्तु सविता यदा तदा चापि भविष्यामि कंको नाम महातपाः अनुग्रहार्थं लोकानां योगात्मा वैक
लातिगः चत्वारस्तु महाभागा विमलाः शुद्धयोनयः शिष्याः मम भविष्यंति योगात्मानो दृढव्रताः सनकः सनातनश्चैव प्रभुर्यश्च सनंदनः विभुः सन
त्कुमारश्च निर्ममो निरहंकृतिः मत्समीपमुपेष्यंति पुनरावृत्तिदुर्लभं षष्ठे ... यदा मृत्युः तदाप्यहं भविष्यामि लोकाक्षि

द्वितीये द्वापरे चैव तदा व्यासस्तु भार्गवः तदाप्यहं भविष्यामि तुंदुरुस्तु युगांतिके तत्रापि भविष्यंति चत्वारो मम पुत्रकाः विद्युदीक्षश्च विद्रश्च विद्यु चाशुः पापनाशनः तेपि तेनैव मार्गेण योगेके नमहेजसः रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं चतुर्थ

प्राप्य योगं तथा ध्यानं तथा ब्रह्म चर्मतले

नीरुनामतः तत्रापि मम ते शिष्या योगात्मानो दृढव्रताः भविष्यंति महाभागाश्चत्वारो लोकसंमताः सुधामा विरजश्चैव शंखश्चैव रजस्तथा योगात्मानो महात्मानः सर्वे ते क्षीणकिल्बिषाः तेपि तेनैव मार्गेण ध्यानयोग समन्विताः मत्समीपं गमिष्यंति पुनरावृत्तिदुर्लभं

सोमश्चमंत्रसंयुक्तोयस्मात्मम मुखाच्युतः जीवः प्राणभृतांब्रह्मन्पुनः पीताः स्तनैः स्मृताः तस्मात्सोममयंचैव अमृतंजी
वसंस्थितं चतुष्पदाभविष्यंति श्वेतत्वंतस्यतेनतत् तस्माच्चैवक्रियाभूताद्विपदावैमहेश्वरी दृष्टापुनस्त्वयैवैषासावित्री
लोकभाविनी तस्माच्चद्विपदाः सर्वेद्विजन्मानश्चनराः स्मृताः तस्माच्चोग्रमयाभूतासर्ववर्णामहेश्वरी दृष्टात्वयासर्वस
त्वासर्वभूतधरापरा तस्माच्चविश्वरूपत्वमजानांवैभविष्यति अजश्चैवमहातेजाविश्वरूपोभविष्यति अमोघरेताः
सर्वत्रमुखेवास्यहुताशनः तपसाभावितात्मानोयेमांद्रक्ष्यंतिवैद्विजाः ईशित्वेचवशित्वेचसर्वगंसर्वमास्थितं रजस्त
मोभ्यांनिर्मुक्तंत्यक्त्वामानुष्यकंवपुः मत्समीपमुपेष्यंतिपुनरावृत्तिदुर्लभं इत्येवमुक्तोभगवान्ब्रह्मारुद्रेणवैद्विजाः
प्रणम्यप्रणतोभूत्वापुनराहपितामहः यएवंभगवान्विद्वान्गायत्र्यामहेशंकरं विश्वात्मानंहिसावित्रंगायत्र्यासद्
वेश्वरं तस्यदेहपरंस्थानंनान्यास्त्वितिचसोऽब्रवीत् तस्माद्योवेत्तिविश्वत्वमस्मादस्यमहात्मनः सयातिब्रह्मसायुज्यं
वचनाद्ब्रह्मणः प्रभो इत्यादिमहापुराणेलैंगेब्रह्मरुद्रसंवादेरुद्रस्तवप्रतिपादनेत्रयोविंशोध्यायः २३ सूतउवाच
श्रुत्वैवमखिलंब्रह्मारुद्रेणपरिभाषितं पुनः प्रणम्यदेवेशंरुद्रमाहपितामहः भगवन्देवदेवेशविश्वरूपमहेश्वर उ
मायास्तुमहादेवनमितालोकमंडिताः विश्वरूपमहाभागकस्मिन्कालेमहेश्वर कस्यांवायुगसंभूत्यांद्रक्ष्यंतीहद्विजातयः
केनवातपसादेवध्यानयोगेनकेनच तनवस्त्वंमहादेवशक्याद्रष्टुंद्विजातिभिः तस्यतद्वचनंश्रुत्वाशर्वः संप्रेक्ष्यतंगुरुः
स्मयन्नाहमहादेवोऋग्यजुःसामसंभवः महेश्वर उ॰ तपसानैववृत्तेनदानेनधर्मफलेनच नतीर्थफलयोगेनक्रतुभिर्वा
सदक्षिणैः नवेदाध्ययनैर्वापिनविज्ञानांनिवेदनैः नशक्योमानुषैर्द्रष्टुमृतेध्यानादहंविभो सप्तमेचैववाराहेततस्त्व

ऐतानिर्मलाऊर्ध्वरेतसः प्राप्यमाहेश्वरंयोगंरुद्रलोकंगताहिते यदाव्यासस्तुरस्तत्पर्यायेचतुर्दशे तत्रापिपुनरेवा
हंभविष्यामियुगांतिके वंशेत्वंगिरसांश्रेष्ठेगौतमोनामनामतः भविष्यामिमहापुण्यंगौतमंनामतद्वनं तत्रापिमम
तेपुत्राभविष्यंतिकलौतदा अत्रिरुग्रश्रवाश्चैवश्रवणोथश्रविष्टकः योगात्मानोमहात्मानःसर्वेयोगसमन्विताः प्रा
प्यमाहेश्वरंयोगंरुद्रलोकंगताहिते ततःपंचदशेप्राप्तेपरिवर्तेक्रमागते त्रय्यारुणिर्यदाव्यासोद्वापरेसमपद्यत त
दाप्यहंभविष्यामिनाम्नावेदशिरामुनिः तत्रवेदशिरानामअवनेतत्पारमेश्वरं भविष्यतिमहावीर्यंवेदशीर्षश्चपर्वतः
हिमवत्पृष्ठमासाद्यसरस्वत्यांनगोत्तमे तत्रापिममतेपुत्राभविष्यंतितपोधनाः कुणिश्चकुणिबाहुश्चकुशरीरःकुनेत्र
कः योगात्मानोमहात्मानःसर्वेतेह्यूर्ध्वरेतसः प्राप्यमाहेश्वरंयोगंरुद्रलोकंगताहिते व्यासोयुगेषोडशेतुयदादे
वोभविष्यति तत्रयोगप्रदानायभक्तानांविजितात्मनां तदाप्यहंभविष्यामिगोकर्णोनामनामतः भविष्यतिसुपु
ण्यंतगोकर्णोनामतद्वनं तत्रापिममतेपुत्राभविष्यंतीहयोगिनः कश्यपोह्युशनाश्चैवच्यवनोथबृहस्पतिः तेपिते
नैवमार्गेणध्यानयोगसमन्विताः प्राप्यमाहेश्वरंयोगंगंतारोरुद्रमेवहि ततःसप्तदशेचैवपरिवर्तेक्रमागते यदाभ
विष्यतिव्यासोनाम्नादेवःकृतंजयः तदाप्यहंभविष्यामिगुहावासीतिनामतः हिमवच्छिखरेरम्येमहातुंगेमहा
लये सिद्धक्षेत्रंमहापुण्यंभविष्यतिमहालयं तत्रापिममतेशिष्यायोगज्ञाब्रह्मवादिनः भविष्यंतिमहात्मानोनिर्म
मानिरहंकृताः रामणपावामदेवश्चमहाकायोमहानिलः तेषांदशसहस्रंतुशिष्याणांध्यानयोगिनां भविष्यंति
तदाकलौपर्वतेध्यानपूजकाः योगाभ्यासरताश्चैवहृदिकृत्वामहेश्वरं महालयपदंन्यस्तंदृष्ट्वायांतिशिवेपदं येचान्ये

प्राप्य माहेश्वरं योगं ध्यानिनो दग्धकिल्विषाः सप्तमीं यं गमिष्यंति पुनरावृत्तिदुर्लभं परिवर्त्तेष्टमे व्यासः सारस्वतस्त
था तदाप्यहं भविष्यामि ऋषभो नाम नामतः तत्रापि मम ते पुत्रा भविष्यंति महौजसः पाराशर्यश्च गर्गश्च भार्गवोंगिरसस्त
था भविष्यंति महात्मानो ब्राह्मणा वेदपारगाः ध्यानमार्गं समासाद्य गमिष्यंति तथैव ते सर्वे तपोबलोत्कृष्टाः शापा
नुग्रहकोविदाः तेपि तेनैव मार्गेण योगोक्तेन तपस्विनः रुद्रलोकं गमिष्यंति पुनरावृत्तिदुर्लभं नवमे द्वापरे व्यास
स्त्रिधामा नाम नामतः यदा भविष्यते विप्रास्तदाहं भविता मुनिः हिमवच्छिखरे रम्ये भृगुतुंगे नगोत्तमे नाम्ना भृगो
स्तु शिखरे प्रथिते देवपूजिते तत्रापि मम ते पुत्रा भविष्यंति दृढव्रताः वलेवंधुर्निमृदः केतुश्रृंगस्तपोधनः योगात्मा २४
नो महात्मानस्तपोयोगसमन्विताः रुद्रलोकं गमिष्यंति तपसा दग्धकिल्विषाः एकादशे द्वापरे वा व्यासस्तु त्रिव
तो यदा तदाप्यहं भविष्यामि गंगाद्वारे कलौ युगे उग्रो नाम महातेजाः सर्वलोकेषु विश्रुतः तत्रापि मम ते पुत्रा भ
विष्यंति महौजसः लंवोदरश्च लंवश्च लंवात्मा लंवकेसरः प्राप्य माहेश्वरं योगं रुद्रलोकं गता हि ते द्वादशे परिव
र्त्ते तु शततेजा महामुनिः भविष्यति महातेजा व्यासस्तु कविसत्तमः तदाप्यहं भविष्यामि कलाविह युगांतिके हैतु
कं वनमासाद्य अत्रिविरूपी पितामहः तत्रापि मम ते पुत्राः सर्वे भस्मानुलेपनाः भविष्यंति महात्मानो महायोगबला
न्विताः सर्वज्ञः सर्वबुद्धिश्च सत्यः सम्यक्तथैव च प्राप्य माहेश्वरं योगं रुद्रलोकं गता हि ते त्रयोदशे पुनः प्राप्ते परिवर्त्ते
क्रमेण तु धर्मो नारायणो नाम व्यासस्तु भविता यदा तदाप्यहं भविष्यामि वालिर्नाम महामुनिः वालिखिल्याश्रमे
पुण्ये पर्वते गंधमादने तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः सुधामा काश्यपश्चैव वसिष्ठो विरजस्तथा महायोगबलो

लिंग॰
पु॰
३३

33

तेमास्थाय रुद्रलोकाय ते गताः द्वाविंशे परिवर्ते तु व्यासः शुष्मायणो यदा तदाप्यहं भविष्यामि वाराणस्यां महाद्युतिः नाम्ना वै
लांगली भीमो देवा यत्र सवासवाः द्रक्ष्यंति मां कलौ तस्मिन्नवतीर्णं हलायुधं तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः भ
ल्लावी मधुपिंगश्च श्वेतकेतुः कुशस्तथा तेपि माहेश्वरं योगं प्राप्य ध्यानपरायणाः विमला ब्रह्मभूयिष्ठा रुद्रलोकाय सं-
स्थिताः परिवर्ते त्रयोविंशे तृणबिंदुर्यदा मुनिः व्यासो हि भविता ब्रह्मंस्तदाहं भविता पुनः श्वेतो नाम महाकायो मुनि
पुत्रः सुधार्मिकः तत्रापि मम ते पुत्रा भविष्यंति तपस्विनः उशिजो बृहदुक्थश्च देवलः कविरेव च प्राप्य माहेश्वरं योगं रुद्र
व्यासो ऋक्ष लोकाय ते गताः परिवर्ते चतुर्विंशे [illegible] लो [illegible] यदा विभोः तदाप्यहं भविष्यामि कलौ तस्मिन् युगांतिके शूली नाम महा
योगी नैमिषे देववंदिते तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः शालिहोत्रोग्निवेशश्च युवनाश्वः शरद्वसुः तेपि तेनैव मार्गे-
ण रुद्रलोकाय संस्थिताः पंचविंशे ततः प्राप्ते परिवर्ते क्रमागते वासिष्ठस्तु यदा व्यासः शक्तिर्नामा भविष्यति तदाप्यहं भ
विष्यामि दंडी मुंडीश्वरः प्रभुः तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः छागलः कुंडकर्णश्च कुंभश्चैव प्रवाहकः प्रा
प्य माहेश्वरं योगं रुद्रलोकाय ते गताः षड्विंशे परिवर्ते तु यदा व्यासः पराशरः तदा चाहं भविष्यामि सहिष्णुर्नाम नाम
तः पुरं भद्रवटं प्राप्य कलौ तस्मिन् युगांतिके तत्रापि मम ते पुत्रा भविष्यंति सुधार्मिकाः उलूको वैद्युतश्चैव शंबूक
श्चाश्वलायनः प्राप्य माहेश्वरं योगममृतत्वाय ते गताः सप्तविंशे ततः प्राप्ते परिवर्ते क्रमागते जातूकर्णो यदा व्या
सो भविष्यति तपोधनाः तदा चाहं भविष्यामि सोमशर्मा द्विजोत्तमः प्रभासतीर्थमासाद्य योगात्मा योगविश्रुतः त
त्रापि मम ते शिष्या भविष्यंति तपोधनाः अक्षपादः कुमारश्च उलूको वत्स एव च योगात्मानो महात्मानो विमलाः शुद्ध

ष्टिमहात्मानः कलौ तस्मिन् युगांतिके ध्यानेमनः समाधाय विमलाशुद्धबुद्धयः गत्वा महालयं पुण्यं दृष्ट्वा माहेश्वरं पदं नी
लिलारयते जंतर्दशादर्शान्दशापरान् आत्मानमेकविंशं तु तारयित्वा महालये मम प्रसादाद्यास्यंति रुद्रलोकं गतज्वराः ॥
ततोष्टादशमे चैव परिवर्ते यदा विभो तदा ऋतंजयो नाम व्यासस्तु भविता मुनिः तदाप्यहं भविष्यामि शिखंडी नाम नामतः
सिद्धक्षेत्रे महापुण्ये देवदानवपूजिते हिमवच्छिखरे रम्ये शिखंडी नाम पर्वतः शिखंडिनो वनं चापि यत्र सिद्धनिषेवितम्
तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः वाचःश्रवा सवाकश्च श्यपामास्यश्च स्तथीश्वरः योगात्मानो महात्मानः सर्वे ते वेदपार
गाः प्राप्य माहेश्वरं योगं रुद्रलोकाय संस्थिताः एकोनविंशे तु परिवर्ते क्रमागते व्यासस्तु भविता नाम्ना भारद्वाजो ॥
महामुनिः तदाप्यहं भविष्यामि जटामालीति नामतः हिमवच्छिखरे रम्ये जटायुर्यत्र पर्वतः तत्रापि मम ते पुत्रा भविष्यंति
महौजसः हिरण्यनाभः कौशल्यो लोकाक्षिः कुथुमिस्तथा ईश्वरा योगधर्माणः सर्वे ते ह्यूर्ध्वरेतसः प्राप्य माहेश्वरं योगम
हेश्वरपदे स्थिताः ततो विंशतमे चैव परिवर्ते यदा तदा गौतमस्तु यदा व्यासो भविष्यति तदा मुनिः तदाप्यहं भविष्यामि अ
ट्टहासस्तु नामतः अट्टहासप्रियाश्चैव भविष्यंति तदा नराः तदा हिमवतः पृष्ठे अट्टहासो महागिरिः देवदानवयक्षेंद्रसिद्ध
चारणसेविते तत्रापि मम ते पुत्रा भविष्यंति महौजसः योगात्मानो महात्मानो ध्यानिनो नियतव्रताः सुमंतुर्बर्वरिर्विद्वा
न्कबंधः कुशकंधरः प्राप्य माहेश्वरं योगं रुद्रलोकाय ते गताः एकविंशे पुनः प्राप्ते परिवर्ते क्रमागते वाचःश्रवाः स्मृतो व्या
सो यदा सप्तर्षिसत्तमः तदाप्यहं भविष्यामि दारुको नाम नामतः तस्माद्भविष्यते पुण्यं देवदारुवनं तदा तत्रापि मम ते पुत्रा
भविष्यंति महौजसः प्लक्षो दार्भायणिश्चैव केतुमान् गौतमस्तथा योगात्मानो महात्मानो नियता ऊर्ध्वरेतसः नैष्ठिकं ब

लिंगमूर्तिर्महेश्वरः कर्तुमर्हसि तां स्माकं रोमहर्षण संप्रतं ॥ सूत उवाच ५
देवा दृष्टो महादेवः

लिंग पु॰ ३४

34

यत तमुद्दिश्य तदा ब्रह्मा नमस्कृत्य कृतांजलिः सर्वं त्वशेषं भगवांल्लब्धवान् स्तु शंकरात् इति श्रीलिंगपुराणे रुद्रावतारः दे
वानिर्देशप्रवर्त्तविशोध्यायः २४ ऋषय ऊचुः कथं पूज्यो महादेवः कैलासे तेन गात्मजा एकस्यां महादेवेशो लिंगा
र्चनविधिक्रमं तथा पार्श्वस्थितो नंदी शालंकायनजन्मनः कृत्वा विलिपुनः प्राह ब्रह्मपुत्राय सुव्रत सनत्कुमाराय प्र
भलिंगार्चनविधिक्रमं तस्माद्ब्रह्मा सोमहातेजाः कृतवान् कृतिसंमितं स्नानयोगोपचाराणि यथा शैलादिना श्रुतात्
कृतवांस्तत्प्रवक्ष्यामि स्नानाद्यं चार्चनाविधिं शैलादिरुवाच अथ स्नानविधिं वक्ष्ये ब्राह्मणानां हिताय वै सर्वपापह
रं साक्षाच्छिवेन कथितं पुरा अनेन विधिना स्नात्वा यः सकृत्संपूज्य शंकरं ब्रह्मकूर्चं च पीत्वा च सर्वपापैः प्रमुच्यते त्रिवि
धं स्नानमाख्यातं देवदेवेन शंभुना हिताय ब्राह्मणादीनां चतुर्मुखसुतोत्तम वारुणं पूर्वतः कृत्वा ततश्चाग्नेयमुत्तमं मंत्र
स्नानं ततः कृत्वा पूजयेत्परमेश्वरं भावदुष्टोंभसि स्नात्वा भस्मना न विशुध्यति भावशुद्धश्चरेच्छौचमन्यथा स्नानमाचरे
उ२८ त् सरित्सरस्तडागेषु सर्वेष्वा प्रलयं नरः स्नात्वापि भावदुष्टश्चेन्न सशुध्यत्यसंशयः नृणां हि चित्तकमलं प्रबुद्धमभवत्तदा
प्रसुप्तं तमसा ज्ञाने भानोर्भासा यथा शुचिः मृत्कुशास्तिलपुष्पं च स्नानार्थं भसितं तथा आदाय तीर्थं निर्दिश्य स्नान
तीर्थं कुशादि च प्रक्षाल्याचम्य पादौ च मलं देहाद्विशोध्य च द्रव्यैस्तु तीरदेशस्थैस्ततः स्नानं समाचरेत् उद्धृतासीति मंत्रे
ण पुनर्देहं विशोधयेत् मृदादाय ततश्चान्यद्गृह्य स्नात्वा त्यनुल्वणं गंधद्वारां दुराधर्षामिति मंत्रेण मंत्रवित् कपिला
गोमयं चैव वहस्तेनैव विलेपयेत् पुनः स्नानं परित्यज्य तद्दग्धं मलिनं ततः शुक्लवस्त्रपरीधानो भूत्वा स्नानं समाचरेत् स
र्वपापविशुद्ध्यर्थमावाह्य वरुणं तथा संस्मृत्य मनसा देवं ध्यानयोगेन वै भवं अवाह्य त्रिस्थल्यातीर्थं अवगाह्य भवं स्मरन्
पुनराचम्य विधिवदभिमंत्र्य महाजलं अवगाह्य ततस्तस्मिन्नघमर्षणं नमोयेभानुसोमाग्निमंडले संस्मरन्वशी

कुद्वयः प्राप्यमाहेश्वरंयोगंरुद्रलोकायतेगताः अष्टाविंशेपुनःप्राप्तेपरिवर्तेक्रमागते पराशरसुतःश्रीमान्विष्णुर्लोकपिता
महः यदाभविष्यतिव्यासोनाम्नाद्वैपायनःप्रभुः तदाषष्ठेनचांशेनविष्णुःपुरुषसत्तमः वसुदेवाद्यदुश्रेष्ठोवासुदेवोभवि
ष्यति तदाप्यहंभविष्यामियोगात्मायोगमायया लोकविस्मयनार्थायब्रह्मचारिशरीरकः श्मशानेमृतमुत्सृष्टंदृष्ट्वा
कायमनाथकं ब्राह्मणानांहितार्थायप्रविष्टोयोगमायया दिव्यांमेरुगुहांपुण्यांत्वयासार्द्धंचविष्णुना भविष्यामित
दाब्रह्मन्नकुलीनाममनामतः कायावतारमित्येवंसिद्धक्षेत्रंचवैतदा भविष्यतितदात्यन्तंयावद्भूमिर्धरिष्यति तत्रापि
ममतेशिष्याभविष्यन्तितपस्विनः कुशिकश्चैवगर्गश्चमित्रःकौरुष्यएवच योगात्मानोजितात्मानोब्राह्मणावेदपारगाः
प्राप्यमाहेश्वरंयोगंविमलाऊर्ध्वरेतसः रुद्रलोकंगमिष्यन्तिपुनरावृत्तिदुर्लभं एतेपाशुपताःसिद्धाभस्मोद्धूलितविग्रहाः
लिंगार्चनरतानित्यंबाह्याभ्यन्तरसंस्थिताः भक्त्याममैवयोगेनध्याननिष्ठाजितेन्द्रियाः इत्येतत्प्रावर्तनंप्रोक्तमवतारेषुल
क्षणं मन्वादिकृष्णपर्यन्तेअष्टाविंशयुगक्रमात् तत्रश्रुतिसमृद्धानांविभागोधर्मलक्षणः भविष्यतितदाकालेकृष्णद्वै
पायनोयदा सूतउ॰ निशम्यैवमहातेजामहादेवेनकीर्तितं रुद्रावतारेभगवान्प्रणिपत्यमहेश्वरं तुष्टावचाभिरिष्टाभि
पुनःप्राहवृषांकेरं ब्रह्मोवाच सर्वेविस्मयादेवाःसर्वेविस्मयागणाः नहिविष्णुसमाकाचिद्गतिरन्याविधीयते ३
त्येवंसततंवेदागायंतेनात्रसंशयः सदेवदेवोभगवान्तवलिंगार्चनेरतः तवप्रणाममपरमःकथंदेवोह्यभूत्प्रभुः सूतउ॰
निशम्यवचनंतस्यब्रह्मणःपरमेष्ठिनः प्रविवृत्यनेत्राभ्यांतमालोक्याहशंकरः भवान्नारायणश्चैवशक्रःसातात्मसेश्वरः
मुनयश्चसदालिंगंसंपूज्यविधिपूर्वकं स्वंस्वंपदंविभोःप्राप्तास्तस्मात्संपूजयेतिते लिंगार्चनंविनानिष्ठानास्तियस्माज्जना
र्दने ब्राह्मणोयजतेनित्यंश्रद्धयाभगवान्प्रभुः इत्येवमुक्त्वाभगवान्ब्रह्मणमहेश्वरः पुनःसंप्रेक्ष्यदेवेशस्तत्रैवांतरधी।

लिंग॰
पु॰
३५

35

देवानां पुष्पतोयेन ऋषीणां च कुशांभसा पितॄणां तिलतोयेन गंधयुक्तेन सर्वतः यज्ञोपवीती देवानां निवीती ऋषितर्पणे
प्राचीनावीती विप्रेंद्राः पितॄणां तर्पयेत्क्रमात् अंगुसशेणैव धीमांस्तर्पयेद्देवतागणं ऋषीन्कनिष्ठांगुलिना श्रोत्रियः
सर्वसिद्धये पितॄणां तर्पयेद्देवाद्दक्षिणांगुष्ठकेन तु तर्प्यैवं मुनिशार्दूल ब्रह्मयज्ञेय यजेद्बुधः देवयज्ञं च मानुष्यं भूत
यज्ञं तथैव च पितृयज्ञं च पूर्णात्मा यज्ञकर्मपरायणः स्वशाखाध्ययनं विप्रा ब्रह्मयज्ञमिति स्मृतं अग्नौ जुहोति यत्किं
चिद्देवयज्ञं प्रचक्ष्यते भूतिदं सर्वदेहीनां भूतयज्ञं प्रचक्ष्यते सदांतान्सर्वतत्त्वज्ञान्ब्राह्मणान्वेदपारगान् सर्वेषामे
व भूतानां बलिदानं विधानतः शृण्म्यतेभ्यो यद्दत्तमन्नं मानुष्यमुच्यते पितॄनुद्दिश्य यद्दत्तं पितृयज्ञं प्रचक्ष्यते एवं पं
च महायज्ञान्कुर्यात्सर्वार्थसिद्धये सर्वेषां चैव यज्ञानां ब्रह्मयज्ञो वरः स्मृतः ब्रह्मयज्ञरतो मर्त्यो ब्रह्मलोके महीय
ते ब्रह्मयज्ञेन तुष्यंति सर्वे देवाः समानवाः ब्रह्मा च भगवान्विष्णुः शंकरो नीललोहितः वेदाश्च पितरश्चैव नात्र कार्या
विचारणा ग्रामाद्बहिर्गतो भूत्वा ब्राह्मणो ब्रह्मयज्ञवित् यावन्न दृश्यः संभवेद्दृष्टज्ञानांतं नरः प्राच्यां वाथ उदीच्यां वा
प्रागुदीच्यामथापि वा पूर्णमाचमनं कुर्याद्ब्रह्मयज्ञार्थमेव तु प्रीत्यर्थं तु ऋक्तेवाथ पीत्वा ज्ञात्वयादेव च यजुषाप
विमृज्यैव हिः प्रक्षाल्य च वारिणा प्रीत्यर्थं सामवेदानामुपस्पृशेत मूर्द्धनि स्पृशेदथर्ववेदानां नेत्रे चांगिरसस्तथा
नासिके ब्राह्मणांगानां तालुं वा चाल्य च वारिणा अष्टादशपुराणानां ब्रह्माद्यानां तथैव च तथा चोपपुराणानां सौरा
द्यानां तथाक्रमे पुराणानामितिहासानां सेवज्ञानं तथैव च श्रोत्रं स्पर्शं हि तप्यर्थं हृद्यंतं ततः स्पृशेत् कल्पादीनां
तु सर्वेषां कल्पविकल्पविनिमाः एवमाचम्य चास्तीर्य दर्भाणां पुंजमात्मनः कृत्वा पाणितले धीमानात्मनो दक्षिणे

आचम्यचपुनस्तस्मात्तत्रोत्तीर्यमंत्रवित् प्रविश्यतीर्थमध्यंतुपुनःपुण्यायविद्धये शृंगेणहेमपुटकैःपालाशैर्वादलैस्ततो
स्तथा सकुशेनसपुष्पेणजलेनैवाभिषिंचयेत् रुद्रेणपवमानेनत्वरिताख्येनमंत्रमंत्रवित् होतारंपवमानाद्यैस्त्व॰
थाशांतिहृदयेनच शांतिधर्मेणचैकेनपंचब्रह्मपवित्रकैः तन्मंत्राधिदेवानांस्वरूपंचऋषीन्स्मरन् एवंह्यवाभि॰
षिंच्यायमूर्द्धानंययसाहिजाः ध्यायेच्चत्र्यंबकंदेवंहृत्पद्मेचाप्यमीश्वरं आचम्याचमनंकुर्यात्स्वगोत्रोक्तंसमीक्ष्य
च पवित्रहस्तश्चासीनःशुचौदेशेयथाविधिः अभ्युक्ष्यसकुशेनाद्भिर्दक्षिणेनकरेणच द्वीपेप्रतिष्ठितनोयंवह्नीभू॰
त्वाप्यतेद्रितः प्रदक्षिणत्रयंकृत्वाहिंसापापप्रशांतये इतिसंक्षेपतःप्रोक्तंस्नानंनाचमनमुत्तमं सर्वेषांब्राह्मणानां
नहितार्थंहिद्विजसत्तमाः इत्यादिपुराणेलैंगेस्नानाचमनविधिःपंचविंशोध्यायः २५ नंदिकवाच आवाहयेत्ततोदे
वींगायत्रींवेदमातरं आयातुवरदादेवीत्यनेनैवमहेश्वरी पाद्यमाचमनीयंचतस्याश्चार्घ्यंप्रपादयेत् प्राणायामंततः
कृत्वासमासीनःस्थितोपिवा सहस्रंवातदर्द्धंवाशतमष्टोत्तरंतुवा गायत्रींप्रणवेनैवत्रिविधेष्वक्षमाचरेत् अर्घ्यंदत्वा
समभ्यर्च्यप्रणम्यशिरसास्वयं उत्तरेशिखरेदेवीत्यस्तोद्धास्यचमातरं प्राच्यालोकाभिवंद्येशींगायत्रींवेदमातरं कृतां
जलिपुटोभूत्वाप्रार्थयेद्भास्करंततः उदुत्यंचतथाचित्रंजातवेदसमेवच ^आदित्यावेतथाचैवआदित्योवाविधानतः
तथासौराणिसूक्तानिऋक्षयजुःसामगानिच जपेत्प्रदक्षिणंपश्चात्त्रिःकृत्वाचविभावसोः आत्मानंचांतरात्मानंपर
अभिवंद्यपुनः सूर्यंब्रह्माणंच विधानतः॥५
मात्मानमेवच अभिवंद्यपुनःसूर्यंब्रह्माणंचविभावसं सनीनपित्रन्ययथान्यायंस्वनाम्नावाहयेत्ततः सर्वानावाह्य
मीतिदेवानावाह्यसर्वतः तर्पयेद्विधिनापश्चान्मातृकुलंवोवासुहृत्कुलंवः ध्यात्वास्वरूपंतत्तत्तुअभिवंद्ययथाक्रमम्

लिंग॰ पु॰ २९

36

यं सेचयेद्वै नास्त्रानं गंधचंदनवारिणा द्रव्याणि शोधयेत्पश्चात् क्षालनप्रोक्षणादिभिः क्षालनं प्रोक्षणं चैव प्रणवेन विधी
यते प्रोक्षणं चार्घ्यपात्रं च पाद्यपात्रमतः क्रमात् तथा ह्याचमनीयार्थं कल्पितं पात्रमेव च स्थापयेद्विधिना धीमानवगुंठ्य
यथाविधि दर्भैराच्छादयेत्तेनैव संस्थाप्याम्भुद्रववारिणा तेषु तेषु च सर्वेषु क्षिपेत्तोयं सुशीतलं प्रणवेन क्षिपेत्तेषु द्रव्याणि
लोक्य बुद्धिमान् उशीरं चंदनं चैव पाद्ये तु परिकल्पयेत् जातिकंकोलकर्पूरवटमूलतमालकं चूर्णयित्वा यथान्या
यं क्षिपेदाचमनीयके एवं सर्वेषु पात्रेषु दापयेच्चंदनं तथा कुशाग्राण्यक्षतांश्चैव यवव्रीहितिलानि च आज्यसिद्धार्
थपुष्पाणि भसितं चार्घ्यपात्रके कुशपुष्पयवव्रीहिवटमूलतमालकं दापयेत्प्रोक्षणीपात्रे भसितं प्रणवेन तु न्यसे
नयस्तु वै यथा दावप्रदग्धेषु तृणेष्विव पुनः स्त्रितो वनानां प्रथमं दृष्ट्वा तेषां मूलेषु संभवः तथा कालेयुगानां तु क
लिनेष्विव संभवः एवं युगाद्युगस्येह सन्तानं तु परस्परं वर्तते व्यवच्छेदाद्यावन्मन्वन्तरक्षयः सुखमायुर्बलं रू
पं धर्मार्थः कामएव च युगेष्वेतानि हीयन्ते त्रीणि पादक्रमेण तु ससंध्यांशेन हीयन्ते युगानां धर्मसिद्धयः इत्ये
ष प्रतिसंधिर्वै कीर्तितस्तु मया तव चतुर्युगानां सर्वेषामेतेनैव प्रसाधनं एषा चतुर्युगावृत्तिरा सहस्राद्गुणीकृता
ब्रह्मणस्तदहः प्रोक्तं रात्रिश्चैतावती स्मृता अत्रार्जवं जडीभावो भूतानामायुगक्षयात् एतदेव तु सर्वेषां युगानां ल
क्षणं स्मृतं एषां चतुर्युगानां च गणिता ह्येकसप्ततिः क्रमेण परिवृत्ता तु मनोरन्तरमुच्यते चतुर्युगे यथैकस्मिन्भ
वतीह तथा भवत् तथा चान्येषु भवति पुनस्तद्वै यथाक्रमं सर्गे सर्गे तथा भेदा उत्पद्यन्ते तथैव तु पंचविंशत्परिमि
तानि न्यूनानि अधिकानि तया तथा कल्पयुगैः सार्धं भवन्ति सह लक्षणैः मन्वन्तराणां सर्वेषामेतदेव तु लक्षणं यथा यु
गानां परिवर्तिनानि चिरप्रवृत्तानि युगस्वभावात् तथा न संतिष्ठति जीवलोकः क्षयोदयाभ्यां परिवर्तमानः इत्ये
तल्लक्षणं प्रोक्तं युगानां तु समासतः अतीतानागतानां हि मन्वन्तरेष्विह व्यत्ययो मनयश्चैव सर्वे तस्य प्रयोजनाः ए
वं वर्षप्रमाणेन तु प्रविभागो युगे युगे युगस्वरूपं तावत्तु विदध्ये मतदा प्रभुः वर्णाश्रमविभागोऽथ युगानि युगसि
द्धये युगानां परिमाणेन कथितं तु प्रसंगतः ददामि देवपुत्रं वं पद्मयोनेः समासतः इत्यादिमहापुराणे लैंगे युग
धर्मव्यवस्थायां चत्वारिंशोऽध्यायः ४० सूत उवाच पुनः ससर्ज भगवान्प्रद्युम्नलोहर्षं वत्सजाः सहस्रयुगपर्यन्ते प्रभा

त्वंवसर्वे॰

आपो

ऽनेन पितामहः एवं परार्द्धे विप्रेंद्र द्विगुणे तत्र यदागते तदा धरांभसा व्याप्ता ह्यापस्ताश्च तेजसा तेजः समीरणे वह्निः समीरणश्च
व्योम्नि तन्मात्रसंयुतः इंद्रियाणि दशैकं च तन्मात्राणि द्विजोत्तम अहंकारमनुप्राप्य प्रलीनानि ततः क्षणात् अभोः
अभिमानस्तदा तत्र महत्तत्त्वं प्राप्य वेक्षणात् अव्यक्ते गुणैः सार्द्धं प्रलीनमभवद्ध्रुवं ततः सृष्टिरभूत्तस्मात्पूर्ववत्
पुरुषाधिष्ठितात् अथ स्रष्टा स्वरात्तस्य मनसा तेन मानसाः नवर्षेतु लोकेस्मिन् प्रजाः कमलयोनिना हृ
ष्टार्थं भगवान् ब्रह्मा पुत्रैर्वै मानसैः सह उग्रं चचार विश्वेशं समुद्दिश्य तपः स्वयं तुष्टस्तु तपसा तस्य भवोऽन्त्या
वास्य वांछितं ललाटमस्य निर्भिद्य ब्रह्मणः पुरुषस्य तु पुत्रत्वमिति शोच्यस्त्री पुमानभवत्तदा तस्य पुत्रो
महादेवोऽर्द्धनारीश्वरोऽभवत् तदा हरः जगत्सर्वं ब्रह्माणं च जगद्गुरुं अथार्द्धमात्मनः कल्याणीमात्मनः परमे
श्वरी विभेदयोगमार्गेण सृष्ट्यर्थं जगतां शिवः तस्या हरिं च ब्रह्माणं ससर्ज परमेश्वरः विश्वेश्वरश्च विश्वात्मा
वामे पाशुपते तथा तस्माद्ब्रह्मा महादेवादीशजः स हरिस्तथा अंडजः पद्मजश्चैव भवो गर्भभवस्तथा च पतते
कथितं सर्वमिति हासं पुरातनं वैराग्यं ब्रह्मणो वदे तद्भृतं च समासतः नारायणोपि भगवान् द्विधा कृत्वा
त्मनस्तनुं ससर्ज सकलं तस्माद्भागाद्देवचराचरं ततो ब्रह्माणमसृजत् ब्रह्मा रुद्रं पितामहः मुने कल्पां
तरे रुद्रो हरिं ब्रह्माणमीश्वरः ततो ब्रह्माणमसृजन्मुने कल्पांतरे हरिः नारायणं पुनर्ब्रह्मा ब्रह्माणं च पुनर्भ
वः तदा विचार्य वै ब्रह्मा दुःखं संसारं त्यजः सर्वं विसृज्य चात्मानमात्मन्येव नियोज्य च संहृत्य प्राणसंचारं
पाषाण इव निश्चलः दशवर्षसहस्राणि समाधिस्थोऽभवत्प्रभुः अधोमुखं च तत्पद्मं हृदि संस्थं सुशोभने हरि

स्मि

लिं॰ग॰
पु॰रा॰
५२

तेष्वेकैर्णवप्रवुद्धं चाभवत्तदा तस्यैवं वक्त्रमभवत्कुंभकेन निरोधिते ततो मामिति शिवे देवं मर्द्धमात्राधरं परे महाणाल
तंतु भागैकशतभागैर्व्यवस्थिते यमीयमविशुद्धात्मा नियम्यैवं हृदीश्वरं यमद्युद्यादिभिं प्रज्ञं यो गात्परं जयदेश्वयं
तस्य हृत्कमलस्थस्य नियोगाद्वोशनो विभुः ललाटमस्य निर्भिद्य प्रादुरासीन्महेश्वरः लोहितो भूत्स्वयं नीललः
शिवस्य हृदयोद्भवः वह्निश्चैव तत्संयोगात्प्रकृत्या पुरुषः प्रभुः नीलश्च लोहितश्चैव यतः कालाकृतिः पुमान्
नीललोहित इत्युक्तस्तेन देवेन वै प्रभुः ब्रह्मणा भगवान्कालः प्रीतात्मा चाभवत्प्रभुः सुप्रीतमानसं देवं तुष्टाव
च पितामहः नामाष्टकेन विश्वात्मा विश्वात्मानं महात्मने पितामह उवाच नमस्ते भगवान्रुद्र भास्करामि
ततेजसे नमो भवाय देवाय रसायांबुमयाय च शर्वाय क्षितिरूपाय सदा सुरभिणो नमः ईशाय वायवे तुभ्यं
संस्पर्शाय नमो नमः पशूनां पतये चैव पावकायातितेजसे भीमाय व्योमरूपाय शब्दमात्राय ते नमः महादे
वाय सोमाय अमृताय नमोस्तु ते उग्राय ते नमो नित्यं यजमानस्वरूपिणे यः पठेत्शृणुयाद्वापि पितामहकृतं
स्तवं रुद्राय कथितं विप्रान्श्रावयेद्वा समाहितः अष्टमूर्तेस्तु सायुज्यं वर्षादेवस्य वा प्नुयात् एवं स्तुत्वा महादे
वमवैक्षत पितामहः तदाष्टधा महादेवः समातिष्ठत्समंततः तदा प्रकाशते भानुः ज्योत्स्ना वत्सा निशाकरः क्षि
तिर्वायुः पुमानेभ आकाशं सर्वगं चैव तदा प्रभृति ते शाक्तं अष्टमूर्तिमितीश्वरं अष्टमूर्तेः प्रसादेन विरंचिश्च ससर्ज
ह प्रभुः सृष्टं तदखिलं ब्रह्मा पुनः कल्पांतरे प्रभुः सहस्रयुगपर्यंतं सत्यं वै चराचरं प्रजाः सृष्टुमना स्तेपे तत
उग्रं तपो महत् तस्यैवं तप्यमानस्य न किंचित्समवर्तत ततो दीर्घेण कालेन दुःखात्क्रोधोभ्यजायत क्रोधाविष्ट

स्यनेत्राभ्यां प्रापतन्नश्रुबिंदवः ततस्तेभ्योश्रुबिंदुभ्यो भूताः प्रेतास्तदाभवन् सर्वांस्तानग्रजान्दृष्ट्वा भूतप्रेतपिशा
चकान् अनिंदत ततदा देवो ब्रह्मात्मानमजो विभुः जहौ प्राणांश्च भगवान् क्रोधाविष्टः प्रजापतिः ततः प्राणात्म
या रुद्रः प्रादुरासीत्प्रभोर्मुखात् अर्द्धनारीश्वरो भूत्वा बालार्कसदृशद्युतिः तदेकादशधात्मानं प्रविभज्य व्यव
संदृश्याहौ शिवानु मोः ५ स्थितः अर्द्धेन स्वेन सर्वात्मा अर्द्धेनावामभामायतिस्थितां ससर्जन्नंदा लक्ष्मी दुर्गा ज्येष्ठा सरस्वती वामा रौद्री
महामाया वैसवी वाग्विजेतृणां कलाविकरणी चैव काली कमलवासिनी बलविकरणी देवी बलप्रमथिनी
तथा सर्वभूतदमनी सर्वशक्तिमनोन्मयी तथान्या बहवः सृष्टास्तया नार्यः सहस्रशः रुद्रैश्चैवं महादेव
ब्रह्मणः प्रददौ प्रा स्त्रात्रिभुवनेश्वरः सर्वज्ञस्तत्सर्वप्रायैनितस्तमहेश्वरः प्रहृष्टे ततो रुद्रः किंचित्प्रत्यागतासवे प्रभ्य
णानात्मस्थान्महेश्वरः ५ भाषत देवेशो ब्रह्माणं परमं वचः मा भैर्देव महाभाग विरंचे जगतां गुरो मयेह स्थापिताः प्राणा यत्नमुत्तिष्ठ
हे प्रभो श्रुत्वा वचस्ततस्तस्य स्वप्नभूते मनोगते पितामहः प्रसन्नात्मा नेत्रैः फुल्लाम्बुजप्रभैः ततः प्रत्यागतप्रा
णः समुद्वीक्ष्य महेश्वरं स उदीक्ष्य चिरं कालं स्निग्धगंभीरया गिरा उवाच भगवान्ब्रह्मा समुत्थाय कृतांज
लिः भो भो वद महाभाग नंदयसि मे मनः को भवान्विश्वमूर्तिर्वै स्थित एकादशात्मकः [illegible] ॥
तस्य तद्वचनं श्रुत्वा व्याजहार महेश्वरः स्पृशन्कराभ्यां ब्रह्माणं सुसुखाभ्यां सुरारिहा मां विद्धि परमात्मान
मजा ८ मेनां मायामिति एते वै यान्तिका रुद्रास्त्वां रक्षितुमिहागताः ततः प्रणम्य तं ब्रह्मा देवदेवमुवाच ह कृतांज
लिपुटो भूत्वा हर्षगद्गदया गिरा भगवन्देवदेवेश दुःखैराकुलितो ह्यहं संसारान्मोक्तुमीशान मामिहार्ह

एवं वेसांविको रुद्रस्त्वां रक्षितुमिहागतः ८

लिं॰ग॰
पु॰ग॰
५४

54

ल्पिशंकर ततःप्रहस्यभगवान्पितामहमुमापतिः सहात्मजैर्जगन्नाथस्तत्रैवांतर्दधेप्रभुः इंद्रउवाच तस्माच्छि
लादलोकेषुदुर्लभोवैत्वयोनिजः मृत्युहीनःपुमांस्तुयः समृत्युःपद्मजोपिसः किंतदेवभवोरुद्रः प्रसीदति
यदीश्वरः नदुर्लभोमृत्युहीनस्तवपुत्रोह्ययोनिजः मयाचविष्णुनाचैवब्रह्मणाचमहात्मना अयोनिजोमृ
त्युहीनमसमर्थौनिवेदितु सूतउवाच एवंव्याहृत्यविप्रेंद्रमनुगृह्यचतंघृणी देवैर्वृतोययौदेवःसितेनेभेन
वैविभुः इत्यादिमहापुराणेलैंगेइंद्रशिलादसंवादेएकचत्वारिंशोध्यायः ४१ सूतउवाच गतेवैरेणयवर
देसहस्राक्षेशिलाशनः आराधयन्महादेवंतपसातोषयद्भवं अथतस्यैवमनिशंतत्परस्यद्विजस्यतु दिव्यं
वर्षसहस्रंतुगतेक्षणमिवाद्भुते वल्मीकेनावृतांगश्चभक्षितःकीटकैर्द्विजः वज्रसूचीमुखैश्चान्यैरक्तपाभि
श्चसर्वतः निर्मांसरुधिरत्वैवनिर्लेपःकुड्यवत्स्थितः अस्थिशेषोभवत्पश्चात्तमैक्षतशंकरः यदास्पृ
ष्टोमुनिस्तेनशंकरेणास्मरारिणा तदैवमुनिशार्दूलःसोत्ससर्जक्लमंद्विजः तप्यतस्तस्यतपसाप्रतुतोषच
शंकरः तुष्टस्त्वमित्यसौवाचगणेशैश्चोमयासह तपसानेनकिंकार्यंनतवजातमहामते ददामिपुत्रंसर्वज्ञं भवतस्
सर्वशास्त्रार्थपारगं ततःप्रणम्यदेवेशंतुष्टावचशिलाशनः हर्षगद्गदयावाचासोमंसोमविभूषणं भग
वन्देवदेवेशत्रिपुरार्दनशंकर अयोनिजंमृत्युहीनंपुत्रमिच्छामिसत्वरं सूतउवाच पूर्वमाराधितःप्राहत
पसापरमेश्वरः शिलादंब्रह्मणांरुद्रःप्रीत्यापरमयापुनः पूर्वमाराधितोविप्रब्रह्मणाहंतपोधन तपसाचा
वतारार्थंमुनिभिश्चैवसत्तमैः तवपुत्रोभविष्यामिनंदीनाम्नात्वयोनिजः पिताभविष्यसिममपितुर्वैजगतां।

मुने एवमुक्तो मुनिश्रेष्ठ प्रणिपत्य स्थितं मुनी सोमः सोमोपमः प्रीतस्तत्रैवांतरधीयत लब्धपुत्रः पिता रुद्रात्प्रीतोऽम
म महामुने यज्ञांगणं महत्प्राप्य यज्ञार्थं यज्ञविन्ममः नततत्क्षणादहं शंभोस्तदनुज्ञस्तस्य चाज्ञया संजातः पूर्वमेवा
हं युगांताग्निसमप्रभः ववर्षुस्तदा पुष्करावर्तकाद्या जगुः किंनराः खेचराः सिद्धसाध्याः शिलादात्मजत्वं गतो हं
मुनीद्राः समंताद्ववृषुः सपुष्पांबुमिश्रा तं दृष्ट्वा कालसूर्याभं जटामुकुटधारिणं त्र्यक्षं चतुर्भुजं कालं शूलटंक
गदाधरं वज्रिणं वज्रदंष्ट्रं च वज्रिणाराधितं शिशुं वज्रकुंडलिनं घोरं नीरदोपमनिःस्वनं ब्रह्माद्यास्तुष्टुवुः सर्वे।
सुरेंद्राश्च मुनीश्वराः नेदुः समंततः सर्वे नन्नृतुश्चाप्सरोगणाः मुनींद्राश्च निशार्हैर्लक्ष्ण्यज्ञः सामसंभवैः मंत्रै
र्माहेश्वरैस्तुतास्ते प्रणामपुरंदरान्विताः ब्रह्मा हरिश्च रुद्रश्च शक्रः साक्षाच्छिवांबिका जीवश्चंद्रमहातेजा भास्करः
पवनोऽनलः ईशानो नैरृतो यक्षो यमो वरुण एव च विश्वेदेवास्तथा रुद्रा वसवश्च महाबलाः लक्ष्मीः साक्षात्स
तीदेवी पुष्टा देवी चैव सरस्वती अदितिश्च दितिश्चैव श्रद्धा लज्जा धृतिस्तथा नंदा भद्रा च सुरभी सुशीला सुमना तथा
हर्षेंद्रश्च महातेजा धर्मो धर्मात्मजस्तथा आहृत्य मां तदा लिंगपतत्सुष्टुवुर्मुनिसत्तमाः शिलादोऽस्म मुनिर्दृष्ट्वा पितुर्मे
ना दृशं तदा भीत्या प्रणम्य पुण्यात्मा प्रोवाचेष्टप्रदं सतं भगवन्देवदेवेश त्रियंबक ममाव्यय पुत्रोसि जगतो।
यस्मात्जातो दुःखाद्धि किं पुनः [illegible]स्तेगतो यस्मात्पितामे पुत्र सर्वेशः अयोनिजन्नमस्तुभ्यं जगद्योने पिताम
ह पितः पुत्र महेशान जगतां च जगद्गुरो वत्स वत्स महाभाग याहि मां परमेश्वर त्वया हं नंदितो यस्मान्नंदीना
म्ना सुरेश्वर तस्मान्नंदय मां नंदिन्नमामि जगदीश्वर प्रसीद पितरौ मेऽद्य रुद्रलोकं गतावुभौ पितामहाश्च भो।

कोज८

लिं॰ग॰
पू॰ग॰
५५

नंदिन्नवतीर्णोमहेश्वरे नमंनमःस्वेशानंदीश्वरमहेश्वर पुत्रपाहिमहादेवदेवदेवजगद्गुरो पुत्रत्वमेवनंदीशम
नायकीर्तितेहिज्ञाः वत्सततत्स्यतोवत्सतत्रःस्तयाःस्वेरेश्वरैः यःपठेत्तच्छृणुयाद्वापिस्तवंपित्राप्रभाषितं स्रा
वयेद्वाद्विजान्भक्त्यासमयासहमोदते एवंस्तवात्ततेवालक्षणस्यव्रजमाननः मुनीश्वरांश्चसंप्रेक्ष्यशिलादो
वाचसुव्रतः पश्यध्वंमुनयःसर्वेमहाभाग्यंममाव्ययं ॥ नंदीयज्ञभागेणदेवस्यावतीर्णोयतःप्रभुः मत्समःकःपु
मानलोकेदेवोवादानवोपिवा पश्यनंदीयतोजातोयज्ञभूमौहितायमे इत्यादिमहापुराणेलिंगेनंदीश्वरोत्पत्तौद्वि
चत्वारिंशोध्यायः ४२ नंदिरुवाच मयासहपिताहृष्टःप्रणम्यचमहेश्वरं उटजंस्वंजगामाशुनिधिंलब्ध्वेवनि
र्धनः यदागतोहमुटजंशिलादस्यमहामुने तदावैवैदिकंरूपंत्यक्त्वामानुष्यमास्थितः नष्टाचैवस्मृतिर्दिव्या
येनकेनापिकारणात् मानुष्यमास्थितेदृष्ट्वापितालोकपूजितः ललापदुःखितोत्यर्थंस्वजनैश्चसमावृतः
जातकर्मादिकांश्चैवचकारममसर्ववित् शालंकायनपुत्रोयंशिलादःपुत्रवत्सलः उपदिष्टाहितेनैवऋक्
शाखांयजुषस्तथा सामशाखांसहस्रंचसांगोपांगंमहामुने आयुर्वेदंधनुर्वेदंगांधर्वंचाश्वलक्षणं हस्तिनां
लक्षणांचैवनरलक्षणमेवच संपूर्णसप्तमेवर्षेततोयमुनिसत्तमौ मित्रावरुणनामानौतपोयुक्तौबलान्वितौ
तस्याश्रमंगतौदिव्यौद्रष्टुंमांचाज्ञयाविभोः ऊचतुश्चमहात्मानौमांनिरीक्ष्यमुहुर्मुहुः तातनंदित्वमल्पायुः
सर्वशास्त्रार्थपारगः नदृष्टमेवचाप्यस्यआयुर्वर्षाद्दतःपरं इत्युक्तवतिविप्रेंद्रेशिलादःपुत्रवत्सलः समालिं
ग्यचदुःखार्तोरुरोदातीवदुःखितः हापुत्रपुत्रपुत्रेतिपपातचसमंततः अहोबलंविधेश्चैवविधानस्येतिदुः

55

वितः तस्यचान्तेस्वरंश्रुत्वातदाश्रमनिवासिनः निपेतुर्विकलात्यर्थंरक्तोवक्त्रमंगलं तत्श्रुत्वाश्चमहादेवंत्रियंबकमुमापतिं ॥
गत्वात्रियंबकेनैवमधुरेणसमन्वितो हर्वामयुतसंख्यातोसर्वव्याधिभयापहो पितात्रिगतसंत्रस्तस्तथैवचपितामहः
निश्चेष्टश्चवभूवासौमत्तवन्निपपातह मत्तोभीतोहमविरातशिरसाचाभिवंद्यते मत्तवत्पितरंसाक्षात्पतितेचपि
तामहे प्रदक्षिणीकृत्यचतेरुदन्तोग्रतोऽभवं हृत्पुंडरीकमध्येवैध्यात्वादेवंत्रियंबकं पंचदशभुजंशांतंपंच
वक्त्रंसदाशिवं सरित्तस्यांतरेपुण्येस्थितंसोपरमेश्वरः तदाब्रवीन्महादेवःसोमःसोमार्द्धभूषणः वत्सनंदिन्म
हाबाहोमत्तोभीतिःकुतस्तव मयैवप्रेषितोविप्रोमन्तव्यस्त्वन्नसंशयः वत्सैतेतवदेहेचलौकिकेपरमार्थतः
नास्त्येवदैविकेहृष्टःशिरादेनप्रणतव देवैश्चमुनिभिःसार्द्धंगंधर्वैर्दानवोत्तमैः नास्त्येवदैविकेहृष्टेकश्चिदेवमहा
त्मनः पूजितेयत्तदावत्सदैविकंनैष्ठिकेश्वर संसारस्यस्वभावोयंसुखदुःखंविपुनःपुनः सर्वेत्वगणोयोनिपरित्यागः ॥
सर्वेष्वेवविवेकिता एवमुक्त्वातमोमालात्सर्वदेवेश्वरेश्वरः कराभ्यांसुशुभाभ्यांसउभाभ्यांपरमेश्वरः पस्पर्श
भगवान्रुद्रःपरमार्तिहरोहरः उवाचचमहादेवस्तुष्टात्मापरमेश्वरः निरीक्ष्यगणपांश्चैवदेवीहिमवतःसुता
मामालोक्यचतुष्टात्मामहादेवःसुरेश्वरः अपरोगमरैश्चैवनित्यंदुःखविवर्जितः अक्षयश्चाव्ययश्चैवसपिता
समहृज्जनः ममेष्टगणपश्चैवमहावीर्योमहापराक्रमः इष्टोममसदाचैवममपार्श्वगतःसदा महाबलश्चैवभवितामु
हायोगबलान्वितः एवमुक्त्वाचमांदेवोभगवान्सगणस्तदा कुशेशयमयींमालांसमुन्मुच्यात्मनस्तदा आवबं
धमहातेजाममदेवोवृषध्वजः तयाहंमालयाचैव शुभयाकंठसंस्थया अत्रोदशभुजश्चैवद्वितीयइवशंकरः त

लिं॰ग॰
पु॰रा॰
५६
56

तपवंसमादायहस्तेनपरमेश्वरः उवाचब्रूहिकिंतेप्रददामिवरमुत्तमं ततोजटाश्रयंवारिगृहीत्वाहारनिर्मलं उक्त्वानंदी
भवस्वेतदुत्ससर्जवृषध्वजः ततःसादिव्यतोयावहैर्णामिति[illegible]लाशुभा पद्मोत्पलवनोपेताप्रावर्ततमहानदी ता
मुवाचमहादेवोनंदीपरमशोभना यस्माज्जटोदकादेवप्रवृत्तात्वंमहानदी तस्माज्जटोदकाख्याताभविष्यसिसरिद्व
रा त्वयिस्नातानरःकश्चित्सर्वपापैःप्रमुच्यते ततोदेव्यामहादेवःशिलादतनयःप्रभुः पुत्रस्त्वे[illegible]मितिप्रोच्यपादयोः
समपातयत् ससमाघ्रायशिरसिपाणिभ्यांपरिमार्ज्यच पुत्रप्रेमाणाभिविवशास्नातामिस्तनजैःशिभिः पयसाशंव
गौरेणदेवदेवंनिरीक्ष्यसा तानिस्रोतांसित्रीण्यस्याःस्रोतस्विन्याभवंस्तदा नदीत्रिस्रोतसंदेवोभगवानवदद्भवः त्रि
स्रोतसंनंदीहृष्ट्वावृषःपरमहर्षितः ननादनादात्तस्मात्तुसरिदन्यातदाभवत् वृषध्वनिरितिख्यातादेवदेवेनसानदी
जांबूनदमयंचित्रंसर्वरत्नमयंशुभं स्वंदेवस्याद्भुतंदिव्यंनिर्मितंविश्वकर्मणा मुकुटंचैववबंधेशामममूर्ध्निवृष
ध्वजः कुंडलेचशुभेदिव्येवज्रवैडूर्यभूषिते प्रावबंधमहादेवःस्वयमेवपरमेश्वरः सोतथाभ्यर्च्यमानेहिदृष्टामेघप्र
भाकरः मेघोभसाःभिषिंचैकैप्रहृष्टेनस्वतेजसा तदाभिषिक्तस्यतदा
प्रवृत्तास्रोतसाभृशम् यस्मात्सुवर्णान्निःसृत्यनद्येकासंप्र
वर्तिता स्वर्णोदकेतितामाहमहादेवस्त्रियंबकः जांबूनद

द्वितीया स्वगुण
शुभा ५८

मयात्तस्मात्कुंडाद्धितयशुभात् प्रावर्ततनदीपुण्याख्याताजंबूनदीतिसा
एतत्पंचनदंनामजप्येश्वरसमीपगं यःपंचनदमासाद्यस्नात्वाजप्येश्वरेश्वरम्

ह्रदेयेह्निवस्नाप्लुतंस्नायात्येवनसंशयः नदोदकाचत्रिःस्रोतावृषध्वनिःस्वर्णोदका। अथदेवोमहादेवःसर्वभूतपति
र्भवः देवीमुवाचशर्वाणीमुमांगिरिसुतामजां देविनंदीश्वरंदेवमभिषिंचामिभूतपे गणेंद्रान्व्याहरिष्यामिकिं
वाकिमन्यसेवधे तस्यतद्वचनंश्रुत्वाभवानीहर्षितानना स्मयंतीवरदंप्राहभवंभूतपतिंपतिं सर्वलोकाधिपत्यं
चगणेशत्वंतथैवच दातुमर्हसिदेवेशशैलादस्तनयोमम ततःसभगवान्देवःसर्वलोकमहेश्वरः सस्मारग
णपान्दिव्यानदेवदेवोवृषध्वजः इत्यादिमहापुराणेलैंगेनंदीगणाभिषेचनेचत्वारिंशोध्यायः ४२ सूतउवाच
स्मरणाद्देवदेवस्यसेशाशास्तेगणेश्वराः सर्वेसहस्रहस्ताश्चसहस्रायुधपाणयः त्रिनेत्राश्चमहात्मानस्त्रिदशै
रपिवंदिताः कोटिकालाग्निसंकाशाजटामुकुटधारिणः दंष्ट्राकरालवदनानित्याबुद्धाश्चनिर्मलाः कोटि
कोटिगणैःस्तैरसंख्यैरनाथगणेश्वराः असंख्याताममहात्मानस्तत्राजग्मुर्मुदान्विताः गायंतश्चस्तुवंतश्चनृत्यं
तश्चमहाबलाः महाडंवरवाद्यानिवादयंतस्तथैवच रथैर्नागैर्हयैश्चैववासिंहमर्कटवाहनाः विमानेषुतथारू हृषै४
ढाहेमचित्रेषुतेगणाः भेरीमृदंगमुरजपणवानकगोमुखैः वादित्रैर्विविधैश्चान्यैःपटहैरेकपुष्करैः भेरीमु
रजकंसालेराडंवरकडिंडिमैः मर्दलैर्वेणुवीणाभिर्विविधैःस्फुलनिःस्वनैः फलकैस्तालघातैश्चककुभैः
कंबुकैरपि वाद्यमानैर्महायोगाआजग्मुर्देवसंसदि तेगणेशामहेशानान्सर्वेदेवेश्वरेश्वराः प्रणम्यदेवंदेवीं
चइदंवचनमब्रुवन् भगवन्देवदेवेशत्रियंबकवृषध्वज किमर्थंस्मृतादेवआज्ञापयमहाद्युते किंसागरान्शो
षयामोवयंवायमकिंकरैः हन्मोमृत्युसुतान्सर्वांश्चपशुवद्धन्मपद्मजंनेति इंद्रंसहदेवैश्चसहविष्णुवायुना आ

लिं॰पु॰
पू॰ भा॰
४२

51

नयामो वयं संक्रुद्धा दैत्यान्वै महदानवैः कस्याद्य समनं त्वेषोर्ऽकरिष्यामस्तवाज्ञया तांस्तथावादिनः सर्वान् गणेशान्सर्व
संमतान् उवाच देवः संहृष्य कोटिकोटिशतान्प्रभुः शृणुध्वं यत्कृते यूयमिहायाता जगद्धिताः श्रुत्वा तत्प्रयतात्मानः
कुरुध्वं तदशंकिताः नंदीश्वरोयं पुत्रो मे सर्वेषामीश्वरेश्वरः प्रियोग्रनायकश्चैव सेनानीश्च समृद्धिमान् तमिमं मम
संदेशाद्यूयं सर्वे पि संमताः सेनान्यमभिषिंचध्वं महायोगपतिंपतिं एवमुक्ता भगवता गणपाः सर्व एव ते एवम
स्त्विति संमंत्र्य संभारानाहरंस्ततः तस्य सिंहासनं दिव्यं जांबूनदमयं शुभं आसनं मेरुसंकाशं मनोहरमुपाहर
न् शातकुंभमयं चापि वारि स्वामीकरप्रभं मुक्तादामावलंबं च मणिरत्नावभासितं स्तंभैश्च वैडूर्यमयैः किंकि
णीजालसंवृतं चारुरत्नकसंयुक्तं मंडपं विश्वतो मुखं समादधुश्च तन्मध्ये तदासनवरं शुभं तस्याग्रतः पादपीठं
नीलवज्रावभासितं चक्रुः पादप्रतिष्ठार्थं कलशौ चास्य पार्श्वगौ संपूर्णौ परमांभोभी रत्नविग्रहृताननौ कल
शानां सहस्राणि सौवर्णा राजतं तथा ताम्रजं मृण्मयं चैव सर्वतीर्थांबुपूरितं छत्रं शतशलाकं च जांबूनदमयं शु
भं शंखहाराङ्गगौरेणाच्छेन विराजितं व्यजने चंद्रशुभ्रे च हेमदंडे सचामरे ऐरावतः सुप्रतीको गजावैतौ सल
जितौ मुकुटं कांचनं चैव निर्मितं विश्वकर्मणा कुंडले चामले दिव्ये वज्रे चैव वराउधं जांबूनदमयं सूत्रं केयूरद्व
यमेव च हारं च मणिचित्रांगं निर्मितं विश्वकर्मणा संभाराणि तथान्यानि विविधानि बहून्यपि समंतान्निन्युर
व्ययागणपा देवसंमताः ततो देवाश्च इंद्राश्च संभाराणि कारकास्तथा मनयो भगवान्ब्रह्मा नवब्रह्माणएव च ब्रह्म=
लोकाः सलोकपा देवास्तत्राजग्मुर्मुदान्विताः तेष्वागतेषु सर्वेषु भगवान्परमेश्वरः सर्वं कार्यादिकं कर्तुमा

णीवीणीवर्षाणिवीणाचोत्तरे तयोर्मध्येवविज्ञेयंमेरोमध्यमिलावृतं १३ दक्षिणेनतुनीलस्यनिषधस्योत्तरेणतु तदायतो
पश्चिमतोमाल्यवान्नामपर्वतः १४ योजनानांसहस्रेषुसनीलनिषधौयतः आयामतस्वत्रिंशत्सहस्राणिप्रकीर्तितः १५
तस्यप्रतीच्यांविज्ञेयः पर्वतोगंधमादनः आयामतस्तुविज्ञेयामाल्यवान्नाममनामतः १६ जंबूद्वीपस्यतविस्तारान्समेनतुसमं
ततः प्रागायतः स्वपर्वाणः षडेतेवर्षपर्वताः १७ अवगाढौभयतः समुद्रौपूर्वपश्चिमे हिमप्रायस्तुहिमवान्हेमकूटस्तु
हेमवान् १८ तरुणादित्यसंकाशोहिरण्यो निषधः स्मृतः चन्द्रवर्णसमोवर्णैः सर्वगः नियतः स्मृतः १९ कृनाकृनिपरीणा
हृत्वरश्मः समंततः नीलेश्चवैडूर्यमयः श्वेतकेतयतः स्मृतः २० मयूरवर्हवर्णस्तुशातकौभस्त्रिशृंगवान् एवंसंक्षेपतः प्रो
क्ताः पुनः श्रृणुगिरीश्वरान् २१ मेरोदेवकूटस्तुपूर्वस्यांदिशिपर्वतौ कैलासोगंधमादश्चपूर्वपश्चाद्यवस्थितौ २२ निषधः
परियात्रश्चद्वावेतौवर्षपर्वतौ यथापूर्वौतथायाम्यावेतौपश्चिमतः स्मृतौ त्रिकूटोगापुहविथाभुत्तरौवर्षपर्वतौ २३ पूर्वव
च्चायतावेतावर्णावांतोव्यवस्थितौ मर्यादापर्वतानेतानष्टावाहुर्मनीषिणः २४ योसौमेरुर्द्विजश्रेष्ठाः प्रोक्तःकनकपर्व॰
तः तस्यपादास्तुचत्वारश्चतुर्दिक्षुनगोत्तमाः २५ येविष्टिताः सर्वश्रेष्ठाः सप्तद्वीपवतेस्सह दशयोजनसाहस्रमायामस्तेषुव
र्णितं २६ पूर्वेणमंदरोनामदक्षिणेगंधमादनः विपुलः पश्चिमेपार्श्वेसुपार्श्वश्चोत्तरेस्मृतः २७ महाहृदाः समुत्पन्नाश्चत्वारोद्वीप
तवः मंदरस्यगिरेशृंगेमहाहृतः सकेतुराट् २८ आलंवप्राद्वाशिखरकदंवस्त्वेवपादपः दक्षिणस्यापिशैलस्यशिखरेदेवसे
वितः २९ जंबूस्सदापुष्पफलासदामाल्योपशोभिता सकेतुर्दक्षिणेद्वीपेजंबूलोकेषुविश्रुतः ३० विपुलस्यापिशैलस्यपश्चिमेव
महात्मनः संजातःशृंगेशास्तिमहान्अश्वत्थश्चैवपादपः ३१ सुपार्श्वस्योत्तरस्यापिशृंगेजातोमहाद्रुमः न्यग्रोधोविपुलस्कंधोनेकयो

लिं॰
पु॰
५२

जनमंडलः २२ तेषांवनानिवक्ष्यामिशैलेंद्राणांयथाक्रमं अमानुषाणिरम्याणिसर्वकालर्तुकानिच मनोहराणिचत्वारिदे
वक्रीडनकानिच चत्वार्द्दिव्याण्यरण्याणिनामतस्तन्निबोधत २४ पूर्वेचैत्ररथंनामदक्षिणेगंधमादनं विभ्राजंपश्चिमेविद्याउ
त्तरेसवितुर्वनं २५ मित्रेश्वरंतुपूर्वेतुषष्ठेश्वरमतःपरं वर्षेश्वरंपश्चिमेतूत्तरेचार्थकेश्वरं २६ महासरांसिचत्वारिमु
निपुंगवाः यत्रक्रीडंतिसुरविंदाः पर्वतोपवनेषुच २७ अरुणोदंसरःपूर्वेदक्षिणेमानसंस्मृतं सितोदंपश्चिमेमेरोर्महाभद्रंत
थोत्तरे २८ शाकस्यदक्षिणेदिग्भेनेमिवस्यचपश्चिमे सिताभ्रश्चकुररश्चाकूपारश्चाचलोत्तमाः २९ विकंकोमणिशैलश्च
वृक्षाश्चापदलोत्तमः महानीलोथरुचकः सविंदुर्दर्दुरस्तथा ३० वेणुमांश्चसमेघश्चनिषधोदेवपर्वतः इत्येतेपर्वतवराश्च
न्येचगिरयस्तथा ३१ पूर्वेणमंदरस्यैतेसिद्धावासाउदाहृताः तेषुतेषुगिरींद्रेषुगुहासुचवनेषुच ३२ रुद्रक्षेत्राणिदि
व्यानिविष्णोर्नारायणस्यच सरसोमानसस्येहदक्षिणेनमहाबलाः ३३ येकीर्त्यमानास्तान्सर्वान्संक्षिप्यप्रवदाम्यहं शैलस्य
विशिखश्चैवशिखराश्चाचलोत्तमाः ३४ पतंगोमहामूलोगजशैलाःपिशाचकाः पंचशैलोथकैलासोहिमवांश्चाचलोत्त
मः ३५ इत्येतेदेवचरिताउत्कटाःपर्वतोत्तमाः तेषुतेषुचसर्वेषुपर्वतेषुवनेषुवै ३६ रुद्रक्षेत्राणिदिव्यानिस्थापितानिसुरो
त्तमैः दिग्भागेदक्षिणेप्रोक्तामेरोरमरवर्चसः ३७ अपरेणासितोदस्यसरसोद्विजसत्तमाः उत्तमायेमहाशैलाःप्रवक्ष्येतान्स
मंततः ३८ सुगंधःशिखिशैलस्यश्रीशृंगोवाचलोत्तमः सपदःशंखशैलश्चकंकोवैडूर्यपर्वतः ३९ कपिलःपिंजरोभ
द्रःसुवरोथमहाचलः कुमुदोमधुमांश्चैवअंजनोमुकुटस्तथा ४० कृष्णश्चपांडुरश्चैवसहस्रशिखरस्तथा पारिजातश्चशै
लेंद्रःश्रीगर्भश्चाचलोत्तमाः ४१ एतेतेदेवरचिताःउक्तामेपर्वतोत्तमाः सर्वेपश्चिमदिग्भागेरुद्रक्षेत्रसमन्विताः ४२ महारु ५२

दिदेश पितामहं पितामहोपि भगवान्नियोगाद्देवतस्य तु चकार सर्वं विधिवदभिषेकं समाहितः अर्चयित्वा ततो ब्र
ह्मा स्वयमेवाभ्यषिंचत ततो विष्णुस्ततः शक्रो ऋषयश्च सहामरैः अभिषिंचंस्तु विधिवन्नंदिनं शिवशासनात्।
वासोयुगं ततो दिव्यं दिव्यं गंधं तथैव च केयूरकुंडले मालां मुकुटं हारमेव च छत्रं शतशलाकं च वालव्यजनमा
युधं दत्तं महात्मना तेन ब्रह्मणा परमेष्ठिना ऋषयस्तु ष्टुवुः सर्वे पितामहपुरोगमाः स्तवं तं चैव तस्मै विष्णुः
सर्वजगत्पतिः शिरस्यंजलिमाधाय तस्थाव समाहितः प्रांजलिः प्रयतो भूत्वा जयशब्दं चकार ह ततो गणाधि
पाः सर्वे ततो देवास्ततोऽसुराः एवं स्तुतश्चाभिषिक्तो देवैः सब्रह्मकैस्तथा उद्वाहश्च कृतस्तत्र नियोगात्परमेष्ठि
नः मरुतां च सुतां देवीं सुयशां सुवर्चसं ह लेभे शशिप्रभं छत्रं तयात्र विभूषितं चामरैर्भ्रमरासक्तसहस्त्री स्त
रत्ना जनैर्वृतं सिंहासनं च परमं तया लब्धं मनोजितं अलंकृतो महालक्ष्म्या मुकुटाद्यैः सुभूषणैः लब्धवांश्च परमो
देव्याः कंठगतस्तया वृषेंद्रं च सितं नागं सिंहं सिंहध्वजं तथा रथं च हैमं छत्रं च वज्ररत्नविभूषितं आधिपत्येन स
दृशो मया नास्ति विभुः क्वचित् सोऽवयश्च गृहीत्वैवं तस्या सर्वं यथाविधि देवैः आरुह्य वृषमीशानो महादेवागतः शि
वः नंदिनापि विभवं दृष्ट्वा तदा च पार्श्वे यद्गणाः पुनर्देवर्षयः सिद्धा आज्ञां पाशुपतीं द्विजाः अथाज्ञां प्रददौ तेषामी
श्वराणां सर्वतो विभुः नंदिकेनगजामर्त्तस्तदा पाशुपतीं शुभां तस्मात् द्विजोत्तमैर्योलब्ध्वा तदाज्ञां मुनिपुंगवाः भवभ
क्तास्तु देवास्तस्मात् देवं समर्चयेत् इत्यादिमहापुराणे लिंगे नंदीश्वराभिषेकवर्णनं नाम विंशोध्यायः अथ अ
षयऊचुः तयास्तव्य क्रममखिलं कथितं शंकरस्य तु सर्वात्मभावं रुद्रस्य स्वरूपं वक्तुमर्हसि सूत उवाच भूर्भु

तं४

वः स्वर्महश्चैव जनः साक्षात्तपस्तथा सत्यलोकं सपातालं नरकार्णवकोटयः तारका ग्रहसोमार्कध्रुवाः सप्तर्षयस्त
था वैमानिकास्तथान्ये वतिष्ठन्त्यस्य प्रसादतः अनेन निर्मितास्त्वेते तदात्मानो द्विजर्षभाः समष्टिव्यष्टिरूपेण सर्वा
लिं॰ पु॰ त्मा संस्थितः शिवः सर्वात्मानं महादेवं महात्मानं महेश्वरं न विजानन्ति संमूढा माययात्स्य मोहिताः तस्य देव
पु॰ रा॰ स्य रुद्रस्य शरीरे वै जगत्त्रयं तस्मात्प्रणम्य तं वक्ष्ये जगतो निर्णयं परं पुरा वः कथितं सर्वं यथाण्डस्य महाकृतिः भु
५८ वनानां स्वरूपं च ब्रह्माण्डे कथयाम्यहं पृथिवी चान्तरिक्षं च स्वर्ल्लोको जन एव च तपः सत्यं च सप्तैते लोकास्त्वण्डोद्भवाः
58 शुभाः अधस्ताद्दत्र चैव हि द्विजाः सप्त तलानि तु महातलादयस्तेषां अधस्तान्नरकाः क्रमात् महातले हेमतले स
र्वरत्नोपशोभिते प्रासादैः सुविचित्रैश्च भवस्यायतनैस्तथा अनन्तेन च संयुक्तं मुचुकुन्देन धीमता नृपेण वलि
ना चैव पाताले स्वर्गवासिना नीले रसातले विप्राः शार्करं हि तलातलं पीतं सुतलमित्युक्तं वितलं विद्रुमप्रभं
सितं हि वितलं यच्च तलं यच्च सितेतरं क्ष्मायास्तु यावद्विस्तारं अधस्तेषां तु सुव्रताः तलानां चैव सर्वेषां श्रृणुमाने
समाहिताः सहस्रयोजनं व्योम नवसाहस्रमेकशः लक्षं सप्तसहस्रं हि योजनानां सदा नस्य तु व्योम्नः प्रमाणं मूलत
त्रिंशत्महास्तिकं तत्तु सुवर्णेन मुनिश्रेष्ठास्तथा वासुकिना शुभे रसातलमिति ख्यातं तथान्यैश्च निषेवितं विरो
चनहिरण्याक्षतक्षकाद्यैश्च सेवितं महाजंभेन वीरेण हयग्रीवेण धीमता शंकुकर्णेन संभिन्नं तथा नमुचिपूर्वकैः
तलातलमिति ख्यातं तथान्यैर्विविधैर्वीरैस्तलं चैव सुशोभनं तलेषु तेषु सर्वेषु चेश्वरः परमेश्वरः स्कन्देन नन्दिना सार्धं गणपैः सर्वतो वृ
सर्वशोभासमन्वितं तः तलानां चैव सर्वेषां अमी स्वरः प्रभमतमः स्मातलानि धरा वापि समथा कथितामया इत्यादि महापुराणे लैंगे भ
वैनायकादिभिश्चैव
कालनेमिपुरोग
मैः पूर्वदैवैः समाख्यातं हतलं वज्रघायवरैः वितलं तारकाद्यैश्च तारकाग्निमुखैस्तथा महातलं च मायाद्यैश्च ब्रह्लादेना हरेण च ४

वनकोशपंचवृत्ताविंशोध्यायः ४५ सूत उवाच सप्तद्वीपास्तताभूमिनदीपर्वतसंकुला समुद्रैः सप्तभिश्चैव सर्वतः
परिवारिता जंबूः प्लक्षः शाल्मलीवशाकः पुष्करनामच कुशः क्रौंचस्तथैवान्यः सप्तद्वीपा इमेस्मृताः सर्वद्वीपेषु
सर्वेषु सांवः सर्वगो गौहितः नानावेशधरो भूत्वा सान्निध्यंकुरुते हरः क्षीरोदे लवरसोदश्च सुरोदधिघृतोदधिः दध्यो
दकश्च श्वाद्वोदः स्वादुदश्च सप्तसमुद्रगाः समुद्रेषु च सर्वेषु सर्वदा सगणः शिवः जलरूपधरः श्रीमान् क्रीडते चोर्मि-
वाहुभिः क्षीरार्णवास्ततमिवसदा क्षीरार्णवे हरिः शेते शिवज्ञानधिया साक्षाद्वै योगनिद्रया यदा प्रबुद्धो भगवा
न्प्रबुद्धमखिलं जगत् यदा सुप्तस्तदा सुप्तं तन्मयं चाचराचरं तेनैव सृष्टमखिलं धृतं रक्षितमेव च संहृतं देवदेव
स्य प्रसादात्परमेष्टिनः सृष्टा इति विख्याता जपंति पुरुषर्षभाः अनिरुद्धं मुनिश्रेष्ठाः शंखचक्रगदाधरं येचापि
रुद्रं पुरुषं ध्यायंत्यात्मविदो जनाः तेनिरुद्धमनाः मनाः सर्वे सर्वसंपत्समन्विताः सनंदनश्च भगवान् सनकश्च
सनातनः वालखिल्याश्च सिद्धाश्च मित्रावरुणकौ तथा यजंति सततं चैव विश्वस्य प्रभवं हरिं सप्तद्वीपेषु तिष्ठंति
नानाशृंगमहोत्क्रया आसमुद्रादयः केचिद्धिरयोगकरास्तथा धरायाः पतयश्चासन्बहवः कालगौरवात् ।
शापाच्च परमेशान्याः क्रौंचारेर्जननं प्रति मन्वंतरेषु सर्वेषु अतीतानागतेष्विह नवत्यामिथरेशांतो वक्ष्ये स्वायं
भुवांतरे मन्वंतरेषु सर्वेषु अतीतानागतेषु च तत्याभिमानिनश्चैव सर्वे तस्य प्रयोजकाः स्वायंभुवस्यतु मनोः पौ
त्रस्यासन्महाबलाः प्रियव्रतात्मवीरास्तु दश इत्यपि कीर्तिताः आग्नीध्रश्चाग्निवाहुश्च तथा मेधातिथिर्वसुः ज्यो
तिष्मान्द्युतिमान्हव्यवसनःपुत्र एव च प्रियव्रतोभ्यषिंचत्तान्सर्वान् सप्तसु पार्थिवान् जंबूद्वीपेश्वरं चक्रे आग्नीध्रं

सप्तमहावले तत्र द्वीपेश्वरं चाथ वर्के मेधातिथिं प्रभुं शाल्मलीं च वपुष्मंतं राजानमभिषिक्तवान् ज्योतिष्मंतं कुश
द्वीपे राजानं कृतवान् प्रभुः पुष्करे सवनस्यापि महावीतः सुतोभवत् धातकी चैव द्वावेतौ पुत्रौ पुत्रवतां वरौ म
लिं॰ग॰ हावीतं स्मृतं वर्षं तस्य नाम्ना महात्मनः नाम्ना च धातुके श्चापि धातकी खंडमुच्यते हव्योप्यजनयत्पुत्रान् शाकद्वी
वृ॰रा॰ पेश्वरः प्रभुः जलदं च कुमारं च सुकुमारं मणीवकं कुसुमोत्तरमोदाकिं सप्तमस्तु महाद्रुमः जलदं जलदस्या
५५ पि वर्षं प्रथममुच्यते कुमारस्य तु कौमारं द्वितीयं परिकीर्तितं सुकुमारं तृतीयं तु सुकुमारस्य ते मणीवकं च कीर्ति
५१ स्प॰ तुर्थं च मणीवकमिहोच्यते कुसुमोत्तरस्य वर्षं तु पंचमं कुसुमोत्तमं मोदाकिं वापि मोदाकेर्वर्षं षष्ठं प्रकीर्तितं
महाद्रुमस्य नाम्ना तु सप्तमं तु महाद्रुमं तेषां हि नामतस्तानि सप्त वर्षाणि तत्र वै क्रौंचद्वीपेश्वरस्यापि पुत्रा द्यु
तिमतस्तु वै कुशलो मनुगश्चोष्णः प्रवरश्चांधकारकः मुनिश्च दुंदुभिश्चैव सुता द्युतिमतस्तु वै तेषां स्वना
मभिर्देशाः क्रौंचद्वीपाश्रयाः शुभाः कुशलदेशः कुशलो मनुगस्य मनोनुगः उष्णस्योष्णः स्मृतो देशः प्रवर स्प॰
स्यापि प्रावरः अंधकारस्य देशश्च अंधकारस्तु कीर्त्यते मुनेस्तु मुनिदेशो वै दुंदुभेर्दुंदुभिः स्मृतः एते जनपदाः स
प्त क्रौंचद्वीपे तु भास्वराः ज्योतिष्मंतः कुशद्वीपे सप्तैवासन्महौजसः उद्भिदो वेणुमांश्चैव स्वैरथो लंबनो धृतिः
प्रथमं १ षष्ठः प्रभाकरश्चापि सप्तमः कपिलः स्मृतः उद्भिदं प्रथमं वर्षं द्वितीयं वेणुमंडलं तृतीयं स्वैरथाकारं चतुर्थं लं
बनं स्मृतं पंचमं धृतिमत्षष्ठं प्रभाकरमनुत्तमं सप्तमं कपिलं नाम कपिलस्य प्रकीर्तितं शाल्मलस्येश्वरः सुता
स्त्रयस्तु वपुष्मतः श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा वैद्युतो मानसश्चैव सुप्रभश्चापि सप्तमः श्वेतस्य

देशः श्वेतस्य हरितस्य च हारितः जीमूतस्य च जीमूतो रोहितस्य च रोहितः वैद्युतो वैद्युतस्यापि मानसस्य तु मानसाः
सुप्रभः सुप्रभस्यापि सप्तैते देशनामकाः प्लक्षद्वीपे तु वक्ष्यामि जंबूद्वीपादनंतरं सप्त मेधातिथेः पुत्राः प्लक्षद्वी
पेश्वराः स्मृताः ज्येष्ठः शांतभवस्तेषां शिशिरस्तु सुखोदयः आनंदश्च शिवश्चैव क्षेमकश्च ध्रुवस्तथा नाम्नातेषां
स्तनामानि सप्तवर्षाणि भागशः निवेशितानि तैस्तानि पूर्वं स्वायंभुवांतरे मेधातिथेस्तु पुत्रैस्तैः प्लक्षद्वीप।
निवासिभिः वर्णाश्रमाचारयुक्ताः प्रजास्तत्र निवेशिताः प्लक्षद्वीपादिवर्षेषु शाकद्वीपांतिकेषु च ज्ञेयः पं
चस्वधर्मो वै वर्णाश्रमविभागशः सुखमायुश्च रूपं च बलं धर्मो द्विजोत्तमाः पंचस्वेतेषु द्वीपेषु सर्वसाधारणं सर्वेषु ४
रुद्रार्चनरतो नित्यं महेश्वरपरायणः ४ स्मृतं पंचस्वेतेषु द्वीपेषु प्रजाश्चैव द्विजेश्वराः प्रजापतेश्च रुद्रस्य भवाम्नतम्वोकृटाः इति श्रीआदिपुराणेलेरा
श्रकोशषट्त्रिंशोध्यायः ३८ सूत उवाच आग्नीध्रं ज्येष्ठजातं कान्यपुत्रं महाबलं प्रियव्रतोभिषिंचत्तं जंबूद्वी श्रद्धा ४
पेनराधिपं सोतीव भवभक्तश्च तपस्वी करुणास्तदा भवार्चनरतश्चैव धीमान् श्रीमान् द्विजर्षभाः तस्य पुत्रा च ४
बभूवुस्ते प्रजापतिसमा नव सर्वे माहेश्वराश्चैव महेश्वरपरायणाः ज्येष्ठो नाभिरिति ख्यातो यस्य किंपुरुषोनु
जः हरिवर्षस्तृतीयेन वतुर्थोभूदिलावृतः रमस्तु पंचमस्तत्र हरिर्वै षष्ठ उच्यते कुरुस्तु सप्तमस्तेषां भद्रा
श्वाष्टमः स्मृतः नवमः केतुमालश्च तेषां देशान्निबोधत नाभेस्तु दक्षिणं वर्षं हिमाह्वं तु पिता ददौ वर्षमा।
ल्यवंतं चापि भद्राश्वाय न्यवेदयत् गंधमादनवर्षं तु केतुमालाय दत्तवान् एवं क्रमेण चान्येषां समानानि ददौ
प्रभुः एवं तेषां समानानि कृत्वा वर्षाणि भागशः आग्नीध्रस्तेषु सर्वेषु पुत्रांस्तानभ्यषिंचत यथाक्रमं स धर्मा

लिं॰ग॰
पु॰रा॰
६॰

ततस्तत्तपसिस्थितः तपसाभावितश्चापिस्वाध्यायतिरतोऽभवत् स्वाध्यायनिरतःपश्चाद्धिध्यानरतस्त्वभूत् यानिकिं
पुरुषार्थानिवर्षाणिपष्टोश्रुभानिच तेषांस्वभावतःसिद्धिःसर्वप्रायासयत्नतः विपर्ययोनतेषास्तिनजरामृत्युभयं
नचधर्मोधर्मौनतेषांभेदोनोत्तमाधममध्यमाः नतेष्वास्तियुगावस्थाक्षेत्रेष्वष्टसुपर्वताः रुद्रक्षेत्रेस्मृताश्चैवजंगमाः
स्थावराश्चये भक्ताःप्रासंगिकाश्चापितेषुक्षेत्रेषुयांतिते तेषांहितायरुद्रेणाष्टक्षेत्रेविनिर्मिते तत्रतेषुमहा
देवःसान्निध्यंकुरुतेसदा दृष्ट्वाहिमहादेवमष्टक्षेत्रनिवासिनः सपर्वईश्वरस्तेषांसर्वदापरमागतिः नाभेर्निस
र्गंवक्ष्यामिहिमांकेसन्निबोधत नाभिस्त्वजनयत्पुत्रंमरुदेव्यांमहाद्युतिः ऋषभंपार्थिवश्रेष्ठंसर्वक्षत्रस्यपूर्वजं
ऋषभाद्भरतोजज्ञेवीरःपुत्रशताग्रजः अभिषिच्यतमृषभोभरतंपुत्रवत्सलः ज्ञानवैराग्यमाश्रित्यजित्वेंद्रियप
विग्रहः सर्वात्मनात्मनिस्थाप्यमनसात्मानमीश्वरं नग्नोजटीनिराहारोवीराध्वानंगतोहिसः इत्यादिमहापु
राणेलैंगेभुवनकोशेसप्तचत्वारिंशोध्यायः ४७ सूतउवाच जंबूद्वीपस्यमध्येतुमेरुर्नाममहागिरिः नानार
त्नवर्णःसशृंगैःस्थितःस्थितिमतांवरः चतुराशीतिसाहस्रमुत्सेधेनप्रकीर्तितः प्रविष्टःषोडशाधस्ताद्विस्तृतः
षोडशैवतु शरावसंस्थितित्वाद्द्वात्रिंशन्मूर्ध्निविस्तृतः विस्तारोद्विगुणश्चास्यपरिणाहोनुमंडलः हैमीकृ
तोमहेशस्यशुभांगस्पर्शनेनच धत्तूरपुष्पसंकाशःसर्वदेवनिकेतनः क्रीडाभूमिस्तुदेवानामनेकाश्चर्यसंयु
तः लक्षयोजनमायामंतस्यैवतुमहागिरेः ततःषोडशसाहस्रयोजनानिक्षितेरधः शेषंचोपरिविप्रेंद्राःसं
धयस्तस्यशृंगिणः मूलायामप्रमाणंतुविस्तारोमूलतोगिरेः पूर्वतःपद्मरागाभोदक्षिणेहेमसन्निभः पश्चि

निराशास्त्यक्तसंदेहः
शैवमागात्परंपदं
हिमाद्रेर्दक्षिणंवर्षंभ
रतायन्यवेदयत् त
स्मात्तुभारतंवर्षंतस्यना
म्नाविदुर्बुधाः भरतस्या
त्मजोविद्वान्सुमति
र्नामधार्मिकः बभू
वतस्मिंस्तद्राज्यंभरतः
संन्यवेशयत् पुत्रसं
क्रामितश्रीकोवनंरा
जाविवेशसः॥

60
वदृ

मेनीलसंकाशस्तोतैर्विद्रुमप्रभः अमरावती पूर्वभागे नानाप्रासादसंकुला नानादेवगणाकीर्णा मणिजालैः
समावृता गोपुरैर्विविधाकारैर्हेमरत्नविभूषितैः तोरणैर्हेमचित्रैश्च मणिरत्नैः परिस्थितैः सैलापालापङ्क
शालैः सर्वाभरणभूषितैः स्तनभारविनम्रैश्च मदाघूर्णितलोचनैः स्त्रीसहस्रैः समाकीर्णा अप्सरोभिः समंत
सरोभिश्च= तः दीर्घिकाभिर्विचित्राभिः फुल्लोत्पलसंकुलैः हेमसोपानसंयुक्तैर्हेमैः सैकतराशिभिः नीलोत्पलैः
सोत्पलैश्च हेमैश्च जातिसगोयिभिः एवंविधैस्तडागैश्च नदीभिश्च नदैस्तथा विराजते पुरी शुभ्रा तया सौ पर्वतः शु-
भः तेजस्विनी नाम पुरी वाग्नेय्यां पावकस्य तु अमरावतिसंकाशा सर्वभोगसमन्विता वैवस्वती दक्षिणे तु यम सादिय्या ४
स्य यमिनी प्रभोः भवनैरावृता दिव्यैर्जाम्बूनदमयैः शुभैः नैर्ऋत्यां कृष्णवती तथा शुद्धवती शुभा वायोर्गंध
वती नाम्ना वायव्यां दिशि शोभना महोदया चोत्तरे तु ऐशान्यां तु यशोवती पर्वतस्य दिगंतेषु राजन्ते दिवि सर्व
दा ब्रह्मविष्णुमहेशानां तथान्येषां निकेतनं सर्वभोगयुतं पुण्यं दीर्घिकाभिर्नगोत्तमे सिद्धैर्यक्षैस्तु संकीर्णं ग
यर्वैर्मुनिपुङ्गवैः तथान्यैर्विविधाकारैर्भूतसंघैश्च तद्विधैः गिरेस्तुपरिविभेद्धाः शुद्धस्फटिकसन्निभे सहेमभूमि-
विस्तीर्णे विमाने समहत् तुस्थिते तस्मिन्महाभुजः शर्वः सोमसूर्याग्निलोचनः सिंहासने मणिमये दिव्ये तु गणै
र्वावृतः हरेस्तत्र च विस्तीर्णे विमाने वामतः स्थिते पद्मरागमये दिव्ये पद्मजस्य तु दक्षिणे तस्मिन् शक्रस्य विपुले
पुरे वस्य यमस्य तु सोमस्य वरुणस्याथ निर्ऋतेः पावकस्य च वायोश्चैव तु रुद्रस्य सर्वालयनिवेशने तेषां तेषां वि
मानेषु दिव्येषु विविधेषु च ऐशान्यामीश्वरस्तेषु निम्माणि वर्म निःस्थिता सिद्धेश्वरस्य भगवच्छिलादेः शिष्यस

लिं॰ ग॰
पु॰ ग॰
६१

नमः सनत्कुमारश्च सिद्धेशाः सनातनः सुरेश्वराः सनकश्च सनन्दश्च सहस्रशः योगभूमिः क्वचित्तस्मिन्भोग
भूमिः क्वचित्क्वचित् बालसूर्यप्रतीकाशे विमाने तत्र शोभने शैलादिनः शुभं वासितस्मिन्नास्ते गणेश्वरः ष
एमुखस्य गणेशस्य गणानां तु सहस्रशः स्वयशायाः स्वसेनाया मातृणां सदनं स्मृतं तस्य जंबूनदीनाम मूलमा
वेष्ट्य संस्थिता तस्य दक्षिणपार्श्वे तु जंबूवृक्षः सुशोभनः अप्रमेयः सुविस्तीर्णः सर्वकामफलप्रदः मेरोः समं
ताद्विस्तीर्णं शुभं वर्षमिलावृतं तत्र जंबूफलाहाराः केचिच्चाम्रतभोजनाः जांबूनदसमप्रख्या नानावर्णाश्च भो
क्षु॰ १ गिनः मेरुपादाः स्मृता विप्रा द्वीपोयं मध्यमः स्मृतः नववर्षान्वितश्चैव नदीनदगिरीश्वरैः नववर्षं तु वस्यामि जं
बूद्वीपे यथा तथा विस्ताराम्मंडलाच्चैव योजनैस्तन्निबोधत इत्यादिमहापुराणे लैंगे भुवनकोशे ऽष्टचत्वारिंशो
ध्यायः ४८ सूत उवाच शतमेकं सहस्राणां योजनानां तु स स्मृतः द्वीपेषु सप्तभिश्चैव युक्तो लोकावृतः शु
भः नील~~ योऽन्तरे मेरोः श्वेतस्तस्योत्तरे स्थितः जठरो देवकूटश्च पूर्वस्यां दिशि पर्वतौ निषधो दक्षिणे मेरोस्त
स्य दक्षिणतो गिरि हेमकूट इति ख्यातो हिमवांश्चैव दक्षिणे मेरोः पश्चिमतश्चैव पर्वतौ द्वौ धराधरौ माल्यवा
न्गंधमादनस्ताबुभौ महदायतौ एते पर्वतराजानः सिद्धचारणसेविताः तेषामंतरविष्कंभो नवसाहस्रमेकशः
इदं हैमवतं वर्षं भारतं नाम विश्रुतं हेमकूटं परं तस्मान्नाम्ना किंपुरुषं स्मृतं नैषधं हेमकूटात्तु हरिवर्षं तदुच्यते
हरिवर्षात्परं चैव मेरोः शुभमिलावृतं इलावृतात्परं नीलं रम्यकं नाम विश्रुतं रम्यात्परतरं ख्यातं विख्यातं त
द्धिरण्मयं हिरण्मयात्परतरं शृंगी वै वकुरुः स्मृतं धनुःसंस्थे तु विज्ञेये द्वे वर्षे दक्षिणोत्तरे दीर्घाणि तत्र चत्वा

61

रोमध्यतस्त्विलावृतं मेरोःपश्चिमपूर्वेणद्वौद्वौदीर्घतरौस्मृतौ पूर्वाकनिषधमर्याद्यवेद्याईदक्षिणंस्मृतं परंनी
लवतोयत्तवेद्यर्धंवोत्तरंस्मृतं तस्माद्वेवतवेद्यर्थेदक्षिणेश्रीणिचोत्तरे तयोर्मध्येतविज्ञेयंमेरुमध्यमिलावृ
तं दक्षिणेनतनीलस्यनिषधस्योत्तरेणतु उदायतोमहाशैलोमाल्यवान्नामनामतः योजनानांसहस्रेतुनव
नीलनिषधायतः आयामतश्चतत्त्रिंशत्सहस्राणिप्रकीर्तितः तथाप्रतीच्यांविज्ञेयःपर्वतोगंधमादनः
आयामतस्तुविस्तारान्माल्यवानिवविस्तृतः जंबूद्वीपस्यविस्तारात्समेनतुसमंततः प्रागायताःस्ववर्ष्माणः
षडेतेवर्षपर्वताः अवगाढाश्चोभयतःसमुद्रौपूर्वपश्चिमौ हिमप्रायःसहिमवान्हिमकूटस्तुहेमवान् त
रुणादित्यवर्णाभात्तैजसोनिषधःस्मृतः चतुर्वर्णःससौवर्णोमेरुश्चोर्द्धमथःस्मृतः वृत्ताकृतिपरीणाहः
श्चतुरस्रःसमंततः नीलश्चवैडूर्यमयःश्वेतशुक्लोहिरण्मयः मयूरपक्षवर्णास्तुशातकुंभस्तुवीर्यवान् एतेसं
तेपतःशाकाःपुनःशृंगाणिसीखरान् जठरोदेवकूटश्चपूर्वस्यांदिशिपर्वतौ पूर्वपश्चायतावेतावर्णवांतौव्य
वस्थितौ मर्यादापर्वतानेतानष्टावाहुर्मनीषिणः योसौमेरुर्द्विजश्रेष्ठाःप्रांशुःकनकपर्वतः तस्यपादास्तुच
त्वारश्चतुर्दिक्षुनगोत्तमाः यैर्वि--ष्टानचलतिसप्तद्वीपवतीमही दशयोजनसाहस्राःशाखेष्वपिविष्कंभे
पूर्वेणमंदरोनामदक्षिणेगंधमादनः विपुलःपश्चिमेपार्श्वेसुपार्श्वश्चोत्तरेस्थितः महाद्रुमाःसमुत्पन्नाश्चत्वा
रोद्वीपकेतवः मंदरस्यगिरेःशृंगेमहावृक्षःसकेतराट् प्रलंबशाखाशिखरःकदंबश्चैत्यपादपः दक्षिणस्या
विशैलस्यपश्चिमस्यमहात्मनः संजातःशिखरेस्यापिसमहानश्वत्थपादपः सुपार्श्वस्योत्तरस्यापिशृंगेजातो

वि॰ ग॰
पु॰ ग॰
६२

महाद्रुमः न्यग्रोधो विपुलस्कंधोनेकयोजनमंडलः तेषां चतसृणां वक्ष्यामि शैलेंद्राणां क्रमेण नः अमाद्युद्यानि र
म्यानि सर्वकालर्त्तुकानि च मनोहराणि चत्वारि देवक्रीडनकान्यथ वनानि च चतुर्दिक्षु नामतस्तन्निबोध मे ।
पूर्वे चैत्ररथं नाम दक्षिणे नंदनं वनं वैभ्राजं पश्चिमे विद्यादुत्तरे सवितुर्वनं मित्रेश्वरं तु पूर्वेण षष्ठेश्वरमतः परम
मठेश्वरं पश्चिमे तु उत्तरे चाम्रकेश्वरं महासरांसि च तथा चत्वारि भूतनिषेवणाः तत्रात्मानस्तु सुखिनः पर्वतेषु
वनेषु च अरुणोदं सरः पूर्वे दक्षिणं मानसं स्मृतं सितोदं पश्चिमसरो महाभद्रं तथोत्तरं शाखस्य दक्षिणे सेंद्रं
विशाखस्य तु पश्चिमे उत्तरे नैगमेशस्य कुमारस्य च पूर्वशः अरुणोदस्य पूर्वेण शैला ये नामतः स्मृताः तो
श्रसंते तेपतः वक्ष्येन शाकं विस्तरेण तु सितांतश्च कुरुदंतश्च कुररश्चाचलोत्तमाः विकचो मणिशैलश्च वृक्षवां
श्चाचलोत्तमः महानीलोथ रुचकः सविंदुर्दुरस्तथा पूर्वेण मंदरस्यैते सिद्धावासा मुदा युताः एतेषु च
गिरींद्रेषु गुहासु च वनेषु च रुद्रेंद्राणि दिव्यानि विश्वोनारायणस्य च सरसो मानसस्येह दक्षिणेन महा
बलाः ये कीर्त्यमानास्तान् सर्वान् संक्षिप्य वदामि वः शैलस्त्रिशिखरो नाम शिशिरश्चाचलोत्तमः श्वेते
देवचरिता उत्कटाः पर्वतोत्तमाः तेषु तेषु च सर्वेषु पर्वतेषु वनेषु च रुद्रेंद्राणि दिव्यानि स्थापितानि सरोम
मेः दिग्भागे दक्षिणे प्रोक्ताः पश्चिमे च वदामि वः अपरेण सितोदस्य सरसोस्य द्विजोत्तमाः उत्तमा ये महाशै
लाः प्रवक्ष्ये तान् समंततः सुगंधशिखिशैलश्च श्रीशृंगो वाचलोत्तमः सुपक्षः शांखशैलश्च कंको वैदूर्य
पर्वतः कपिलः पिंजरो भद्रः सवरो यमहाबलः कुमुदो मधुमांश्चैव अंजनो मुकुटस्तथा कृष्णश्च पांडु

रश्चैव सहस्रशिखरस्तथः पारिजातश्च शैलेंद्रः श्रीशृंगश्चाचलोत्तमः इत्येते देवचरिता उत्कटाः पर्वतोत्तमाः सर्वे पश्चिम
दिग्भागे रुद्रक्षेत्रसमाश्रिताः महाभद्रस्य सरसश्चोत्तरेण महाचला। ये स्थिताः कीर्त्यमानांस्तान्संक्षेपेण निबोधत
शंखकूटो महाशैलो वृषभो हंसपर्वतः नागश्च कपिलश्चैव पिंजरश्चाचलोत्तमः जारुधिश्चैव शैलेंद्र एते उत्तरतः
स्थिताः तेषु दिव्येषु शैलेषु देवदेवस्य शूलिनः असंख्यातानि दिव्यानि विमानानि सहस्रशः एतेषां शैलमुख्यानां
मंतरेषु यथाक्रमं सरितश्चांतरद्रोण्यः सरांस्युपवनानि च वसंति देवमुनयः सिद्धाश्च शिवभाविताः कृतवासाः स
पत्नीकाः प्रसादात्परमेष्ठिनः लक्ष्म्यायामं बिल्ववने ककुभे कश्यपादयः तथा तालवने शक्रसिंहोपेंद्रोरणो
विभोः उदुंबरे कर्दमस्य तथान्येषां यतात्मनां विद्याधराणां सिद्धानां पुण्ये चाम्रवने स्थितिः नागानां सिद्धसंघानां
तथा निंबवने स्थितिः सूर्यस्य किंशुकवने तथा रुद्रगणस्य च बीजपूरवने पुण्ये देवाचार्यो व्यवस्थितः कौमुदे तु व
ने विष्णुश्च मुख्यानां महात्मनां स्थलपद्मवनांते न्यग्रोधे शेषभोगिनः शेषस्तु शेषजगतां पतिरास्ते निरावि
तः सर्वजगतां कालः पाताले व्यवस्थितः विष्णोर्विष्णुगुरोर्मूर्तिर्देवः साक्षाद्धलायुधः शयने देवदेवस्य सह
देः कंकणप्रभोः वने पनसवृक्षाणां सशक्रा दानवादयः किंकरै रुद्रगेश्चैव विशालकवने स्थिताः संतानक
स्थलीमध्ये साक्षाद्देवी सरस्वती मनोरमवने हृद्ये वर्ष्यकोटिसमन्विते नंदीश्वरो गणवरैः शोभावत्यां व्यवस्थितः
एवं संक्षेपतः प्रोक्ता वनानि वनवासिनः असंख्याता मया नाम्ना वक्तुं वै विस्तरेण तु इत्यादि महापुराणे लैंगे भुवन
कोशे एकोनपंचाशत्तमोऽध्यायः ४९ सूत उवाच सितांतशिखरे शक्रः पारिजातवने शुभे तस्य प्राच्यां कौमुदा

लिं॰ग॰ हिमकूटो वृषविस्तरः श्रेष्ठो पुराण्युदीर्णानि दानवानां द्विजोत्तमाः सवज्रकोटरे पुण्यराक्षसानां महात्मनां नील
कानां पुराण्याहुरष्टाषष्टिरिति द्विजाः महानीलेपि शैलेंद्रे पुराणि दश पंच च हयाननानां मुख्यानां किंनराणां च स
व्रताः वेणुमंधे महाशैले विद्याधरपुरत्रयं वैकुंठे गरुडः श्रीमान्करंजे नीललोहितः वसुधारे वसूनां च निवासः
पू॰ भा॰ परिकीर्तितः रत्नधारे गिरिवरे सप्तर्षीणां महात्मनां सप्तस्थानानि पुण्यानि सिद्धावासयुतानि च महाप्रजापतेः
५२ स्थानमेकशृंगे नगोत्तमे गजशैले तु दुर्गायाः सुमेधे वसवः स्मृताः आदित्याश्च तथा रुद्राः कृतावासास्तथाश्विनौ
अशीतिर्देवपुर्यस्तु हेमकूटे नगोत्तमे सुनीले राक्षसावासाः पंचकोटिशतानि च पंचकूटे पुराण्यासन्पंचकोटिप्रमा
63 णतः शतशृंगे पुरशतं यक्षाणाममितौजसां ताम्राभे काद्रवेयाणां विशाखे तु गुहस्य वै श्वेतोदरे मुनिश्रेष्ठाः सु
पर्णस्य महात्मनः पिनाके च कुबेरस्य हरिकूटे हरेर्गृहं कुमुदे किंनरावासस्त्वंजने चारणालयः कृष्णे गंधर्वहा
वासः पांडुरे पुरसप्तकं विद्याधराणां विप्रेंद्रा विश्वभोगसमन्वितं सहस्रशिखरे शैले दैत्यानामुग्रकर्मणां पुराणां तु
सहस्राणि सप्त शक्रारिणां द्विजाः मुकुटे पन्नगावासः पुष्पकेतौ मुनीश्वराः वैवस्वतस्य सोमस्य वायोर्नागगणस्य
च तक्षस्य सितशैलेंद्रे चत्वार्यायतनानि च वलेंद्रे विलरुद्राणां गुहस्य च महात्मनः कुबेरस्य च सोमस्य तथान्ये
षां दिवौकसां सत्यायतनमुख्यानि मर्यादापर्वतेष्वपि श्रीकंठाद्रिगुहावासी सर्वावासः सहोमया श्रीकंठस्या
धिपत्यं वै सर्वदेवेश्वरस्य तु अंडस्यास्य प्रवृत्तिस्तु श्रीकंठेन न संशयः अनंतेशादयस्त्वेवं प्रत्येकं चांडपालकाः चक्र
वर्तिनश्च त्रयःकालास्ततो विद्येश्वरास्त्विह श्रीकंठाधिष्ठितान्यत्र स्थानानि तु समासतः मर्यादापर्वतेष्वेषु स्मृतानि तु प्रवद एवं=
ना

स्थितं श्रीकंठाधिष्ठितं विश्वं चराचरमिदं द्विजाः कालाग्निशिवपर्यंतं कथं शक्यो ऽतिविस्तरः इत्यादिमहापुराणे
लैंगे भुवनकोशे पंचाशत्तमो ऽध्यायः ५० सूत उवाच देवकूटगिरेर्मध्ये महाकूटे सुशोभने हेमवैडूर्यमाणि
क्यनीलगोमेदकादिभिः तथान्यैर्मणिमुख्यैस्तु निर्मिते निर्मले शुभे शालाशतसहस्राढ्ये सर्वद्रुमविभू
षिते चंपकाशोकवकुलपुन्नागासनमंडिते पारिजातकसंछन्ने नानापक्षिगणाकुले नैकधातुशतैश्चि
विचित्रकुसुमोज्वले नितंबतटमालैर्वा नैकसत्वगणान्विते विमलस्वादुपानीयैर्नैकप्रस्रवणैर्युते निर्मलो
ज्वलपानीयैर्दिव्यरत्नविभूषिते गणपादकवृक्षाभिस्रवंतीभिरलंकृते स्निग्धवर्णमहामूलमनेकस्कंध
पादपं रम्यमत्यंतविस्तीर्णं दशयोजनमंडलं तत्र शुभवनं नाम नानाभूतगणालयं महादेवस्य देवस्य शंकरस्या
मितात्मनः दीप्तमायतनं तत्र हेममणिविभूषितं हेमप्राकारसंयुक्तं मणितोरणमंडितं स्फाटिकैस्तु विचि
त्रैस्तु गोपुरैश्च समाचितं सिंहासनैर्मणिमयैः शुभास्तरणसंयुतैः पादपीठयुतैः सम्यक् शर्वेणाधिष्ठितैः
शुभैः प्रासादानि विमानानि वितते नानावर्णैर्गृहोत्तमैः मंडपैस्तु विचित्रैस्तु स्फाटिक—भसंयुतैः संयुतं सर्वभूतेंद्रै
र्ब्रह्मेंद्रोपेंद्रपूजितैः वराहगजसिंहर्क्षशार्दूलकरभाननैः गृध्रोलूकमुखैश्चान्यैरजामेषमुखैरपि प्रमथै
र्विविधैः स्थूलैर्गिरिकूटोपमैः शुभैः बलविलिंदसंकाशैः करालैर्हरिकेशैश्च रोमशैश्च महाभुजैः नानाव
र्णाकृतिधरैर्नानासंस्थानसंस्थितैः दीप्तास्यैर्दीप्तचरितैर्नंदीश्वरमुखैः शुभैः बलविलिंदसंकाशैर्गणमा
दिसमन्वितैः प्रमथैरमरैर्नित्यं महापारिषदैरपि तत्र भूतपतेर्देवाः इज्यो नित्यं प्रयुंज्यते ऊह्वरीशोखपट

लिं॰ग॰
पु॰रा॰
६४

ढैर्भेरीडिंडिमगोमुखैः ललिताहवितैर्गीतैर्नंदीश्वरमुखैः शुभैः भुजास्फालान्यकुर्वद्भिर्नित्यंवर्णितवल्गितैः स
पूजितोमहादेवः प्रमथैः प्रमथेश्वरः सिद्धदेवर्षिगंधर्वैर्ब्रह्मणाथमहात्मना इंद्रोपेंद्रमुखैश्चान्यैः पूजितस्तत्र
शंकरः विभक्तचारुशिखरो यत्रतत्रैववर्चसः कैलासः यत्रराजस्यकुबेरस्यमहात्मनः निवासःकोटियक्षा
णांतथान्येषांमहात्मनो तत्रापिदेवदेवस्यभवस्यायतनंमहत् तस्मिन्नायतनेसोमः सदास्तेसगणोहरः य
त्रमंदाकिनीनामसरम्याविमलोदका सुवर्णमणिसोपानाकुबेरशिखरेशुभे जांबूनदमयैःपद्मैर्गंधस्प
र्शगुणान्वितैः नीलवैडूर्यपत्रैश्चगंधोपेतैर्महाबलैः तथाकुमुदखंडैश्चमहापद्मैरलंकृता यत्रगंधर्वनारी
भिरप्सरोभिश्चसेविते देवदानवगंधर्वैर्यक्षराक्षसकिन्नरैः उपस्पृष्टजलापुण्यानदीमंदाकिनीशुभा त
स्यास्तुचोत्तरपार्श्वेहरस्यायतनंमहत् वैडूर्यमणिसंपन्नंयत्रास्तेशंकरःस्वयं हिज्ञाग्रलकनंदायास्ती
रेवैप्राच्यदक्षिणे वनेडुमसहस्राढ्यंमृगपक्षिसमाकुले तत्रापिसगणःसोवःक्रीडतेनुपमेगृहे नंदायाः
पश्चिमतीरेकिंचिद्दक्षिणाश्रिते पुरंरुद्रवनेनामनानाप्रासादसंकुलं तत्रापिशतधाकृत्वाप्यात्मानंचो
विकांतथा क्रीडतेसगणःसोवसन्तशतालयमुच्यते एवंशतसहस्राणिशर्वस्यायतनानिच प्रतिद्वीपं
मुनिश्रेष्ठाःपर्वतेषुवनेषुच नदीनदतडागानांतीरेषुर्णवसंधिषु इत्यादिमहापुराणेलैंगेभुवनकोशेए
कपंचाशत्तमोध्यायः ५१ सूतउवाच नयश्चवहवःप्रोक्ताःसदावद्भजलाःशुभाः सरोवरेभ्यःसंजातास्तसे
भ्योनाद्विजोत्तमाः प्राङ्मुखादक्षिणास्याश्चयोनरप्रवहाःशुभाः पश्चिमाग्राःपवित्रास्तुशतिवर्षंतुकीर्तिताः

64

मपंत्रेतरुणाः शुभाः पद्मपत्रसुगंधाश्च जायंते भवभाविताः जंबूफलरसाहारा अनिष्यंदाः सुगंधिनः देवलोक
च्युतास्तत्र जायंते ह्यजरामराः त्रयोदशसहस्राणि वर्षाणां ते नरोत्तमाः आयुः प्रमाणं जीवंति वर्षे दिव्ये वि
लावृते जंबूफलरसं पीत्वा न जरा बाधते त्विमान् न च ग्लानिः क्लमश्चापि न मृत्युर्न चैव हि था तत्र जांबूनदं ना त५३
म कनकं देवभूषणं इंद्रगोपकसंकाशं जायते भास्वरं तु तत् एवमयासमाख्यातं नववर्षानुवर्णने वर्णा
गुर्भोजनाद्यं च संक्षिप्य न च विस्तरात् हेमकूटे तु गंधर्वा विज्ञेयाः साप्सरोगणाः सर्वे नागास्तु निषधे शे
षवासुकितक्षकाः महाबलास्त्रयस्त्रिंशत् रमंते याज्ञिकाः सुराः नीले तु वैडूर्यमये सिद्धब्रह्मर्षयोमलाः
दैत्यानां दानवानां तु श्वेतपर्वत उच्यते शृंगवान्पर्वतश्चैव पितॄणां निलयः स्मृतः हिमवान् यक्षमुख्यानां
भूतानामीश्वरस्य च सर्वाद्रिषु महादेवो हरिणा वलणांबया नंदिना च गणैः सार्द्धं वर्षेष्वेव वनेषु च नी
लेचापि त्रिशृंगे च भगवान्नीललोहितः सिद्धैर्दैत्यैश्च पितरैर्हृष्टो नित्यं विशेषतः नीलस्तु वैडूर्यमयः श्वे
तः शुक्लो हिरण्मयः मयूरबर्हवर्णश्च शातकौंभस्त्रिशृंगवान् एते पर्वतराजानो जंबूद्वीपे व्यवस्थिताः इत्या
दिमहापुराणे लिंगे भुवनकोशे द्विपंचाशत्तमोध्यायः ५२ सूत उवाच सप्तद्वीपादिष्वेतेषु सप्त सप्त सुप
र्वताः तदायताः प्रतिदिशं निविष्टा वर्षपर्वताः प्लक्षद्वीपे तु वक्ष्यामि सप्त दिव्यान्महाचलान् गोमेदकोत्र
प्रथमो द्वितीयश्चांद्र उच्यते तृतीयो नारदो नाम चतुर्थो दुंदुभिः स्मृतः पंचमः सोमको नाम सुमहान्षष्ठ उच्य
ते सप्तर्षिभिः प्रोक्तो वैभ्राजः सप्तमस्तथा सप्तैते गिरयः प्रोक्ताः प्लक्षद्वीपे विशेषतः सप्तैव शाल्म

लिं.पु.
पू.भा.
५५

लीद्वीपेतान्वैसंक्षेपतोवदे कुमुदश्चोन्नतश्चैवपर्वतश्चबलाहकः द्रोणःकंकणामहिषःककुद्मान्सप्तमःस्मृतः
कुशद्वीपेतुसप्तैवद्वीपाश्चकुलपर्वताः तांश्चसंक्षेपतोवक्ष्येनाममात्रेणवैक्रमात् विद्रुमःप्रथमःप्रोक्तोद्विती
योहेमपर्वतः तृतीयोद्युतिमान्नामचतुर्थःपुष्पवान्स्मृतः कुशेशयःपंचमस्तुषष्ठोहरिगिरिःस्मृतः सप्त
मोमंदरःश्रीमान्महादेवनिकेतनः मंदाइतिह्यपांनाममंदरोदारणादपां तत्रसाक्षान्महादेवोविश्वेशो
विमलःशिवः सोमःसनंदीभगवानास्तेहेमगृहोत्तमे तपसातोषितःपूर्वंमंदरेणमहेश्वरः अविमुक्तेन
ह्यतेवैलेभेसपरमंवरं प्रार्थितश्चमहादेवोनिवासार्थंमहाव्यया सनंदीसगणःसोमस्तेनासौतेनसंवसति
क्रौंचद्वीपेतुसप्तैवक्रौंचाद्याःकुलपर्वताः क्रौंचोवामनकःपश्चात्तृतीयश्चांधकारकः अंधकारात्परश्चापि
दिवावृन्नामपर्वतः दिवावृतःपरश्चापिविविंदोगिरिरुच्यते विविंदात्परतश्चापिइंद्रकीलोमहागिरिः
इंद्रकीलात्परश्चापिप्रोच्यतेदुंदुभिस्वनः एतेरत्नचयाःसप्तक्रौंचद्वीपस्यपर्वताः शाकद्वीपेचगिरयःस
प्ततान्वदामिवः उदयोरैवतश्चैवश्यामकोमुनिसत्तमाः राजतश्चगिरिश्चैवअंबिकेयःसुशोभनः आंबिके
यात्परोरम्यःसर्वौषधिसमन्वितः तथैवकेसरीत्युक्तोयतोवायुःप्रजायते पुष्करेपर्वतःश्रीमानेकएव
महाशिलः चित्रैर्मणिमयैःकूटैःशिलाजालसमुच्छ्रितैः द्वीपस्यतस्यपूर्वार्द्धेचित्रसानुःस्थितोमहान्।
परिमंडलसहस्राणिविस्तीर्णःपंचविस्तरात् ऊर्द्धंचैवचत्रिंशच्चसहस्राणिमहागिरिः द्वीपार्द्धस्यपरिवि
मःपर्वतोमानसोत्तरः स्थितोवेलासमीपेतुअर्द्धचंद्रइवोदितः योजनानांसहस्राणिऊर्द्धंपंचाशदुच्छ्रितः

66

तावदेवतुविस्तीर्णः पर्वतः परिमंडलः सप्तद्वीपस्यार्द्धेचमानसः पृथिवीधरः एकएवमहासानुः सन्निवेशाद्वि
धाकृतः स्वादूदकेनोदधिना सर्वतः परिवारितः पुष्करद्वीपविस्तारविस्तीर्णोसौसमंततः तस्मिन्द्वीपेस्मृतौद्वौ
तु पुण्यौजनपदौशुभौ अतौमानसत्कूपस्यपर्वतस्यसमंडलौ महावीतंततद्वर्षंबाह्यतमानसस्यत तस्माद्वा
क्यांतरंतन्मधातकीखंडउच्यते स्वादूदकेनोदधिना पुष्करःपरिवारितः विस्तारान्मंडलाच्चैवपुष्करस्यसमेनत
पद्वीपासमुद्राणांहेतैर्ज्ञेयाःपरस्परं परेणपुष्करस्याथस्वादूदस्यस्थितोमहान् स्वादूदकंसमुद्रंचसमंता
त्परिवेष्ट्यच पौरस्त्यमहतीतत्रत्यश्यतेलोकसंस्थितिः कांचनीद्विगुणाभूमिसर्वाचैकशिलोपमा तस्यापरे
णशैलस्तुमर्यादाभानुमंडलः प्रकाशश्चाप्रकाशश्चलोकालोकःसउच्यते लोकालोकोगिरिर्यावत्ताव
द्दैर्घ्यायतास्मृता योजनानांसहस्राणांदशतस्योच्छ्रयःस्मृतः तावांश्चविस्तरश्चैवलोकालोकमहागिरेः प्रवा
वीनेततस्यार्द्धंवरंतिरविश्मयः परावीनेतमोनित्यंलोकालोकस्ततःस्मृतः एषसंक्षेपतःप्रोक्तोभूर्लोकस्य
वविस्तरः आभानोर्वैभुवःस्वस्तुआध्रुवान्मुनिसत्तमाः आवहाद्यानिधिमानिवायोर्वैसंततेनमुयः आवहःप्र
वहश्चैवततश्चानुवहस्तथा संवहोविवहश्चाद्यततश्चोर्द्धंपरावहः द्विजाःपरिवहश्चैववायोर्वैसमयोन
नयः वलाहकास्तथाभानुश्चंद्रोनक्षत्रराशयः ग्रहाश्चऋषयःसप्तध्रुवोविप्राःक्रमादिह योजनानांमही
पृष्ठाद्र्ध्वंपंचदशध्रुवः नियुतान्येकनियुतंभूपृष्ठाद्भानुमंडले रथःषोडशसाहस्रोभास्वरस्यरथोपरि च
तुराशीतिसाहस्रामेरुश्चोपरिभूतलात् कोटियोजनमाक्रम्यमहर्लोकेध्रुवेमतः जनलोकोमहर्लोका।

लिं॰ ग॰
पु॰ ग॰
६७

नयाकोटिद्वयेस्मृतः भुवनलोकानिसप्तैतेतत्वेऽस्मिन्कथितानिवै अथःसप्ततलानांचनरकाणांहिकोटयः मा
योताश्चवह्निगायाश्चषडविंशतिरेवच पापिनस्तेषुपच्यंतेस्वस्वकर्मानुरूपतः अवीच्यंतानिसर्वाणिरौरवाद्या
द्यानितेषुच प्रत्येकंपंचकान्याहुर्नरकेषुविशेषतः अंडस्मादौमयाप्रोक्तमंडस्यावरणानिच हिरण्यगर्भस
र्गस्यप्रसंगाद्बहुविस्तरे अंडानामीदृशानांतुकोट्योज्ञेयःसहस्रशः सर्वगत्वात्प्रधानस्यतिर्यगूर्ध्वमधःस्थि
ताः अंडेष्वेतेषुसर्वेषुभुवनानिचतुर्दश प्रत्यंडंद्विजशार्दूलास्तेषांहेतुर्महेश्वरः अंडेषुचांडबाह्येषुतथाद्यावर
णेषुच तमोंतेचतमःपारेवाष्टमूर्तिर्व्यवस्थितः तस्यात्मनोमहेशस्यमहादेवस्यधीमतः अदेहिनस्तद्देहोदेह
मखिलेपरमात्मनः अस्याष्टमूर्तेःशर्वस्यशिवस्यगृहमेधिनः गृहिणीप्रकृतिर्दिव्याप्रजाश्चमहदादयः पश
वःकिंकरास्तस्यसर्वेदेहाभिमानिनः आद्यंतहीनोभगवाननंतःपुमान्प्रधानंपुरुषाश्चसप्त प्रधानमूर्तिस्त्वथ
षोडशांशोमहेश्वरस्याष्टतनुःसएव आत्मावलानस्यधरास्थितेहधराधरावारिधराःसमुद्राः ज्योतिर्गणाःश
क्रमुखाःसुराश्चवैमानिकाःस्थावरजंगमाश्च दृष्टाःस्वतल्लक्षणहीनमीदृग्दृष्टाःसुरेंद्रास्तुकिमत्रचित्रहेति य
देगतानिभुवनात्यावकाद्याशक्तितोणाश्चाभवन्नयतोपि दग्धुंतृणंवापिसमस्तमस्ययत्तस्यवह्निर्नेशाशा
कविष्णुः वायुस्तृणंचालयितुंनतस्यान्येसाम्यस्यान्यभावान्सकलाःसुरेंद्राः यदास्वयंपूज्यपरिपुःसुरेंद्रैःसुरेश्व
रःसर्वसमस्तदेहैः सुरेश्वरंयत्नवाचकोवाभवान्इतीत्यंसकोनहलात्मा तदाचहैमवतंगतएवयत्नस्त।
दाविकाहैमवतीशुभाया उमाशुभेराभरणैरनेकैःसुशोभमानानतनुर्नाविरासीत् नीशस्तुस्तवावरूशोभमा

६७

नामतामत्तौ हेमवतीमपृच्छत् किमेतदीशे वक्त्रशोभमाने कोवाविकेयलवपुष्कोवा निशम्यतेषां वचनमुमाह
प्रणोचरस्तेति सुरासुरोक्तः प्रणोमुरेतामिह राजमानानामत्तौ लोहितशुक्लकृष्णौ संभाविता सा सकलामरेंद्रैः
सर्गप्रवृत्तिस्तु सुरासुराणां ज्योतिर्गणानां प्रकृतिश्च पुंसोयतस्य चाज्ञावशगत्यचाह तस्माद्धि ज्ञात्वा सर्वमजस्य
तस्य नियोगतस्त्वंडमभूद्वरात्रे अग्रजस्त्वयोडादविलेवतस्मात् ज्योतिर्गणोलोकमजात्मकेतत् इत्यादिमहापु
राणेलैंगे भुवनकोशे त्रिपंचाशत्तमोध्यायः ५३ सूतउवाच ज्योतिर्गणप्रचारं च संक्षिप्याद्ब्रवीम्यहं देवदेवा
णां चालोक्यग्रहचारप्रसिद्धये मानसोपरिमाहेंद्री प्राच्यां मेरोः पुरी स्थिता दक्षिणेभानुपुत्रस्य वरुणस्य च वा
रुणे सौम्ये सोमस्य विपुलातासु दिग्देवताः स्थिताः अमरावती संयमनी सुखा चैव विभा क्रमात् लोकालोको
परिष्टात्सर्वतो दक्षिणायने काष्ठां गतस्य सूर्यस्य गतिर्यातां निबोधत दक्षिणं चक्रमेभानुः क्षिप्तेषुरिव गच्छ
ति ज्योतिषां चक्रमादाय सततं परिगच्छति पुरांतिके यदाभानुः शक्रस्य भवति प्रभुः सर्वैः सयामनैर्हरोदयमिव
दृश्यते सर्वेव सत्वत्यां तु निशांतस्य प्रदृश्यते अस्तमेति पुनः सूर्यो विभायां विश्वदृग्विभुः मयाप्रोक्तोमराव
त्यांतथासौ चाविंतस्करः यदासंयमिनीं प्राप्य सुखा चैव विभावरी यदापराह्णस्त्वाग्नेय्यां पूर्वाह्णो नैर्ऋते हि
ताः तदा त्वपराह्णं तु वायुभागे सुदारुणं ईशान्यां पूर्वरात्रं च मुहूर्तेनैव गच्छति योजनानां मुहूर्तस्य इमां संख्यां
निबोधत शतानां शतसहस्राणामेकत्रिंशच्च सा स्मृता पंचाशच्च तथान्यानि सहस्राण्यधिकानि च मौहूर्तिकी ग
तिर्ह्येषा भास्करस्य महात्मनः एतेन गतियोगेन यदा काष्ठां तु दक्षिणां पर्यगच्छत्यनंगो सौ मानसस्योत्तरे हरिः म

लिं॰ग॰
पु॰रा॰
६८

68

धेनत्वपुष्करस्यायं क्रमते दक्षिणायने मानसोत्तरशैले तु महातेजा विभावसुः मंडलानि शतं पूर्वमशीत्यभ्यधिकं वि
भुः बाह्यं चाभ्यंतरं चैव अंके चोत्तरायणाद्दक्षिणे प्रत्यहं चरते तानि सूर्यो वै मंडलक्रमात् कुलालचक्रपर्यंतो यथा शी॥
घ्रं प्रवर्तते दक्षिणायक्रमे देवस्तथा शीघ्रं निवर्तते तस्मात्प्रकृष्टां भूमिं तु कालेनाल्पेन गच्छति सूर्यो द्वादशभिः
शीघ्रं मुहूर्तैर्दक्षिणायने त्रयोदशार्द्धमृक्षाणामह्ना तु चरते रविः मुहूर्तैस्तावदृक्षाणि नक्तमष्टादशैश्चरन्
कुलालचक्रमध्यस्थो यथा मंदं प्रसर्पति तथोदगयने सूर्यः सर्पते मंदविक्रमः तस्माद्दीर्घेण कालेन भूमिं स्व॥
ल्पां स गच्छति सरथो भगवान्भानुरादित्यैर्मुनिभिस्तदा गंधर्वैरप्सरोभिश्च ग्रामीणैः सर्पराक्षसैः प्रदीप्यन्स
हस्रांशुश्चरन्तः पृष्ठतोऽप्यधः ऊर्द्धं तत्रक्रकरं तु क्रमाससभाग्नाल्मीमनुत्तमां ग्रहैर्भोभिर्मुनिभिस्तु पक्षैः संध्यायां तु नि
शाचरान् नित्यं तु शास्त्रवान्मामान्वाल्पेणेश्चरते रविः अष्टादशमुहूर्तानि उत्तरायणपश्चिमे अहर्भवति तच्चा
पि चरते मंदविक्रमः त्रयोदशार्द्धमृक्षाणां नक्तं द्वादशभी रविः मुहूर्तैस्तावदृक्षाणि दिवाष्टादशभिश्चरन् ततो
मंदतरेणाभ्यां नक्तं भवति वै यथा मृत्पिंड इव मध्यस्थो ध्रुवो भवति वै यथा त्रिंशन्मुहूर्तानेवाहुरहोरात्रं ध्रुवो भ्रम
न् उभयोः काष्ठयोर्मध्ये भ्रामयन्मंडलानि तु कुलालचक्रनाभिश्च तथा तत्रैव वर्तते ध्रुवस्तथा हि विज्ञेयस्तत्रैव
परिवर्तते उत्तानपादिर्भ्रमते ग्रहैः सार्द्धं प्रदक्षिणः गणोमुनिर्ज्योतिषां तु मनसा तस्य सर्पति अधितिष्ठन्पुनस्तेन
भानुस्त्वाराधयतिष्टति रश्मिरेणोः सर्वतो पंच सर्वदेवो वै समीरेणः उत्तानपादस्य तदा ध्रुवस्तैव प्रसादतः विष्णोरुत्ता
नपादेनमासाद्द्वादशात्स्पृहेतना ग्रहः पीतात्सूर्येण क्रमते शशिनेक्रमात् निशाकरान्तिः सर्वे तेजीमूताः प्रत्यहं पुनः

६८

वृंदं जलमयं चैव समनेनाभिताडितं । अपां वृष्टिं विसर्जंते तो भासा दत्तेन भास्करः । तोयस्य नास्ति वै नाशस्तदेव परिव
र्तते । हिताय सर्वजंतूनां गतिः शर्वेण निर्मिता । भूर्भुवः स्वस्तथा लोका व्याप्ता येनाम्भसा तु मेव च । प्राणा वै जगतामापो भूता
नि भुवनानि च । वक्तव्यं किमु केनेन च चावृतमिदं जगत् । आपः शिवश्च भगवान् आधिपत्ये शिवः स्थितः । अपां त्वा
धिपतिर्देवो रुद्र इत्येव कीर्तितः । भवात्मकं जगत्सर्वमिति किं चेह चाद्भुतं । नारायणत्वं देवस्य हरेश्चाद्भिर्विनाश
भोः । जगतां निलयो विष्णुस्त्वापस्तस्यालयानि तु । इमं दृश्यमानेषु चराचरेषु गोभूमिभूतास्तयि निष्क्रमंति या
सर्वतस्त्वानुमतस्त्वेतेषु विभावयोस्तु ... अग्निना च जलं प्रापो धूमाग्निवातानां संयोगस्त्वभ्रमुच्यते वारिणा वायुतः
संति अभ्राण्येव शतक्रतोः । यत्र धूमोद्भवश्चासीद्द्विजानां हितकृत्सदा । दावाग्निधूमसंभूतमभ्रं वनहितं स्मृतं । धू
तधूमोद्भवं चाभ्रमशुभाय भविष्यति । आभिचारीय धूमोत्थं भूतनाशाय वै द्विजाः । एवं धूमविशेषेण जगतां वै हिता
हितं । तस्मादाच्छादये धूममभिचारकृतं नरः । अनाद्याय द्विजः कुर्याद्भूतं तत्राभिचारिकं । एकस्य द्विपलोकस्य
क्षयकृद्वै भविष्यति । अपां निदानं जीमूताः षण्मासानीह सत्त्वताः । वर्षत्येवं हि जगतां हिताय वै भवभवाज्ञया स्तनि
तं चेह वायवश्चैव युतं पावकोद्भवं । विद्युतां तेषां सहोत्पत्तिरप्राणां मुनिपुंगवाः । न भ्रश्यंति यतो ह्यापो मेघनाम्ना मेघ
उच्यते कृष्णवर्त्मा च वैरस्यात्पत्ताश्चैवं दृष्ट्वा त्रिविधाः । धूमतो नवधपते स्तमेघविच्छेदिते ततः । यं देयास्तथ जीमूता
श्च वहस्यानगास्ततः । विरिंचोद्भूतसंज्ञाः सर्वे प्रवहस्कंधश्रास्ततः । मूकाः शब्दापशब्दास्ते तेषां कृत्येय यथाक्रमं अ
ल्पवृष्टिप्रदा दीर्घकाले शीतसमीरणाः । जीमूताश्च तथा क्षीणा विद्युद्ध्वनिविवर्जिताः । तिष्ठंति क्रोशमात्रे च परा

लिं॰ ग॰
पु॰ रा॰
६९
69

मस्तथा तेजोपहारीवलवान्वेदितोभ्यर्थितोवुधः गंभीरघोषोगंभीरोगंभीरवलवाहनः न्यग्रोधरूपोन्यग्रो
धोविश्वकर्माचविश्वभुक् तीक्ष्णोपायश्चहर्यश्वसहायःकर्मकालवित् विष्णुःप्रसादितोयज्ञःसमुद्रोवडवा
मुखः हुताशनसहायश्चप्रशान्तात्माहुताशनः उग्रतेजामहातेजाजयोविजयकालवित् ज्योतिषामयनः
सिद्धिःसंधिर्विग्रहएवच शंखीशिखीजटीज्वालीखेचरोद्युचरोवली वैणीचपणवीचैवनालीकंकटकस्तथा
सर्व``पतिनादीचसर्वपापविमोचकः वंधनस्तनरेंद्राणांयुधिशत्रुविनाशनः सांख्यप्रवासीदुर्वासाःसर्व
वाधुनिषेवितः प्रस्कंदोयुविभागश्चअतुल्योयज्ञभागवित् सर्वावासःसर्वचारीदुर्वासावासवोमनुः भीमो
भीमकरोयज्ञःसर्वधारीधरोत्तमः आकाशोनिर्विरूपश्चनिर्वैरीकुंड्याःखगः भिन्नश्चभिन्नरूपश्चरोद्ररूपःसु
रूपवान् वसुरश्मिःसुवर्चसीवसुवेगोमहावलः मनोवेगोनिशाचारःसर्वलोकफलप्रदः सर्ववासःकृपा

लिं·पु·
पू·भा·
८१

वासउपदेशकरो ""ः मुनिरात्मामुनिर्लोकः सहस्राक्षःसहस्रभुक् पक्षीचपक्षिरूपश्चअतिदीप्तोदिशांपतिः उ
न्मनाउन्मदःकामोह्यर्थार्थीकरणोमृतः महासेनोविशाखश्चषष्टिभागोगवांपतिः शक्तिभासःप्रतिष्टंभीच
मूस्तंभनएवच ऋतुर्ऋतुकरःकालोमधुर्मधुकरोवचः वानस्पत्योवाजसनोनित्यमाश्रमपूजितः ब्रह्मचा
रीलोकचारीसुचारीसर्वचारविचारवित् ईशानईश्वरःकालोनिशाचारीह्यनेकधृक् निमित्तस्थोनिमित्तश्चनंदीनं
दाकरोहरिः नंदीश्वरःसुनंदीचनंदनोविषमर्दनः भगहारीनिहंताचकालोवलपितामहः चतुर्मुखो
महालिंगश्चारुलिंगस्तथैवच लिंगाध्यक्षःसुराध्यक्षःकालाध्यक्षोयुगावहः बीजाध्यक्षोबीजकर्ताअ
ध्यात्मानुगतोबलः इतिहासश्चकल्पश्चतमोहिजगदीश्वरः दंभोदंभवहोदंभोवंशोवंशकरःकलिः
लोककर्तापशुपतिर्महाकर्ताह्यधोक्षजः अक्षरंपरमंधामबलवान्शक्रएवच नित्योह्यनीशःशुद्धात्मा
शुद्धोमान्योगतोगतिः बहुप्रसादःस्वप्नोदर्पणोनगाधर्ममंत्रवित् वेदकारःसूत्रकारोविद्वांसःपरमर्दनः म
हामेघनिवासीचमहाघोरोवशीकरः अग्निज्वालोमहाज्वालोअतिदीप्तोहुतोहविः धिषणःशंकरोनित्यो
वर्चस्वीधूमकेतनः नीलस्तथांगलुब्धश्चशोभनोनिरवग्रहः स्वस्तिस्वस्तिस्वभावश्चभागीभागकरोलघुः उत्सं
गश्चमहांगश्चमहागर्भपरायणः कृष्णवर्णःसुवर्णश्चइंद्रियःसार्ववर्णिकः महापादोमहाहस्तोमहाकायोमहा
यशाः महामूर्द्धामहाकायोमहानेत्रोमहाबलः महांतकोमहाकर्णोमहोष्ठोमहादमः महानासोम
हाकंबुर्महाग्रीवःश्मशानदृक् महाहस्तोमहौजस्कोह्यनंतात्मामृगालयः लंबितोलंबितोष्ठश्चमहामायःपयो

निधिः महादेवोमहादंष्ट्रोमहाजिह्वोमहामुखः महानखोमहारोमामहाकेशोमहाजटः असंपन्नप्रसादश्चप्रत्ययो।
गिरिसादनः स्नेहोऽस्नेहनपातश्चअजितश्चमहामुनिः वृषकोवृषकेतश्चअनलोवायुवाहनः मंडलीमेघवाहश्च।
देवदानवदर्पहा अथर्वशीर्षासामास्यऋक्सहस्रोजितेजसः यजुःपादपयोगुह्यःप्रकाशोजंगमस्तथैवच अमोघाऽ
र्थप्रसादश्चअंतर्गम्यःसुदर्शनः उपहारप्रियःसर्वःकनकःकांचनास्थिरः नाभिर्नादकरोहव्यःपुष्करःस्थपतिःस्थिरः
द्वादशात्मावरस्तुंडोयज्ञोयज्ञसमाहितः रक्तोनीलःकलिःकामोमकरःकालपूजितः सगणोगणकारश्चभूतवाहन
सारथिः भस्मशायीभस्मगोप्ताभस्मभूतस्तरुर्गणः आगमश्चविलोपश्चमहात्मासर्वपूजितः सगणोगणकारश्च
शुक्लःत्रीशुक्लसंपन्नःशुचिर्भूतनिषेवितः आश्रमस्थःकपोतस्थोविश्वकर्मापतिर्वरः विशालाक्षश्चताम्रोष्ठोह्यम्बुजालः
सुनिश्चलः कपिलःकंकपाःस्थूलआयुश्चैवःपरोमरः गंधर्वोह्यादकस्तार्क्ष्योसुविज्ञेयःसुशारदः परश्वधायुधोदेवो
अर्द्धनारीशपुंगवः तुंबवीणोमहाकोपऊर्ध्वरेताजलाशयः उग्रोवंशकरोवीरोवंशवादीह्यनिंदितः सर्वांगरूपोमाया
वीसुहृदोह्यनिलोनलः बंधनोबंधकर्ताचसुबंधनविमोचनः ससंज्ञाक्षपकोमारिर्महादंष्ट्रःसमोयुधि वाज
स्वनिर्मितःसर्वशंकरोथाप्यकोपनः अमरेशोमहामेघोविश्वमेघःसुरारिहा अहिर्बुध्न्योनिर्ऋतिश्चचेकितानो
हरिस्तथा अजैकपाच्चकापालीशंकुराजामहागिरिः धन्वंतरिर्धूमकेतुःसूर्योवैश्रवणस्तथा धाताविश्वश्चशक्रश्च
उग्रस्त्वष्टाधरोध्रुवः प्रभावःसर्वगोवायुरर्यमासविताखिः धृतिश्चैवविधाताचमांधाताभूतभावनः नीरंतीर्थश्चभी
मश्चसर्वकर्मागुहावहः पद्मगर्भोमहागर्भश्चंद्रवक्त्रोनभोनघः फलवांश्चपुराणश्चपुण्यकृत्पुण्यकृत्तमः क्रूर

लिंग॰
पु॰रा॰
८८

४४

कर्म्मीक्रूरवासीक्रूरस्ततोमहौषधः सर्वाशयःसर्वचारीप्राणेशःप्राणिनांपतिः देवदेवःसुखोत्सिक्तःसदसत्सर्वरत्नवित्
कैलासस्थोगुहावासीहिमवद्गिरिसंश्रयः कूलहारीकूलावर्त्तीनिश्चलःसवितर्भवः आद्याद्यःसंशयोत्थश्चपौगंडःआ
शाधारकः धृतिमान्मतिमान्दक्षःसत्कृतिश्चयुगांपतिः गोपालोगोपतिर्ग्रामोगोचर्मवसनोहरः हिरण्यपालश्च त
थागुहापालःप्रवेशिनां महामनामहाकायोमहापाणिर्विजितेंद्रियः संस्थानस्सरगायश्चवज्रवीजोवज्रभृन्नः वणि
जोवदनोनित्योनकुलश्चंदनच्छदः पानपात्रोमहाबलः वसुभृत्सर्वभूतात्मासर्वकर्मपरोहू
हरः महायोगीतोभूतसंहाद्योप्सरोगणसेवितः महाकेतुर्मनोधातुर्नैकतानरतःस्वरः आवेदनीयआवेशःसर्व
गंधसुखावहः तारणोधारणोधातापरवाधनिवारकः संयोगोवर्द्धनोवृद्धोमहावृद्धोगुणाधिकः नित्योस्थायी
सहायश्चदेवासुरपतिःपतिः युक्तश्चयुक्तबाहुश्चदेवोदिविसुपर्वणः आषाढश्चसुषाढश्चध्रुवदोहरिदोवरः व
सुरावर्त्तमानान्योवपुश्रेष्ठोमहापथः शिरोविमर्शनःसर्वःसर्वलक्षणभूषितः अक्षीवसर्वयोगीचसर्वक्रीडीम
हाबलः साम्राजोथमहाग्रासर्वतीर्थदेवोमहातपाः जीवनोविमन्त्रभगोग्रनिंद्योवज्रककर्कशः रत्नभूतोथसर्वां
गोमहार्णवनिनादवान् मूलंविशालोह्यमृतोव्यक्ताव्यक्तस्तपोनिधिः आरोहणोविरोहश्चशीलधारीमहातपाः
महाकल्पोयुगंयोगीयुग्योयुग्यहरोहरिः युगरूपोमहारूपोवनवागहरोयुगः न्यायनिर्वचनःपादःपंडितोत्सव
लोचनः वज्रमालोमहामालः सुलोचनः निस्तटोलवणःकूपःसुसमंगःफलोदयः ऋषभोवृषभो
भंगोमणिवीजीजटाधरः इंदुर्विसर्गःसर्वांगःस्वरःसर्वायुधःसहः विभेदनःसुजाजातःसर्गद्वारोमहाधनः गिरो

सम्बरः=

सारोविसर्गश्चसर्वलक्षणकालवित् गंधमालीचभगवानंतकःसकर्मणः संध्यानीवाहुलोवाहुःसकलःसर्वपाव
नः तलस्थालीकरस्थालीऊर्द्धसंहननोवटुः यंत्रतंत्रसुविख्यातोलोकसर्वाश्रयोद्विजः मुंडोविरूपोविकृतोदंडीकुं
डीविकुर्वणः हर्यक्षःककुभोवीजीदीप्ततेजःसहस्रपात् सहस्रमूर्द्धादेवेंद्रःसर्वदेवमयोगुरुः सहस्रबाहुःसर्वांगः
शरण्यःसर्वलोककृत् कलाकाष्ठालवामात्राःमुहूर्ताहःक्षपाक्षणः पवित्रंत्रिमधुर्मंत्रःकनिष्ठःकृष्णपिंगलः ब्रह्म
दंडविनिर्माताशतघ्नीशतपाशकृत् विश्वक्षेत्रप्रदोवीजंलिंगमाद्यस्त्वनिर्मलः सदसद्व्यक्तमव्यक्तंपितामातापिता
महः सर्गद्वारंपितृद्वारंमोक्षद्वारंत्रिविष्टपं निर्वाणंहृदयंचैवब्रह्मलोकःपरागतिः देवासुरविनिर्मातादेवासुरप
रायणः देवासुरगुरुर्देवोदेवासुरनमस्कृतः देवासुरमहामात्रोदेवासुरगणाश्रयः देवासुरगणाध्यक्षोदेवासुरग
णाग्रणीः देवादिदेवोदेवर्षिर्देवासुरवरप्रदः देवासुरेश्वरोविश्वोदेवासुरमहेश्वरः सर्वदेवमयोचिंत्योदेवतात्मात्म
संभवः दुर्मदास्त्रिक्रमोवैद्योवरदोवरजावरः द्वीपीहस्तीतथाव्याघ्रोदेवःसिंहोमहर्षभः विबुधाग्रवरःश्रेष्ठःसर्व
देवोत्तमोत्तमः गुरुकांतोनिजःसर्वःपवित्रःसर्ववाहनः प्रयुक्तःशोभनोवज्रईशानःप्रभुरव्ययः शृंगीशृंगप्रियो
बभ्रूराजराजोनिरामयः अभिरामःसुरगणोविरामःसर्वसाधनः ललाटाक्षोविश्वदेहोहरिणोब्रह्मवर्चसी
स्थावराणांपतिश्चैवनियमेंद्रियवर्द्धनः सिद्धार्थःसर्वभूतात्मानित्यसत्यव्रतःशुचिः व्रताधिपःपरंब्रह्मभक्तानां
परमागतिः विमुक्तोदीप्ततेजाश्चश्रीमान्श्रीवर्द्धनोजगत् यथाप्रसादभगवानितिभुक्त्यास्तुतोमया पितातेनम
योवाचस्वपाकैःसहवर्द्धय इतस्मात्सनिराक्रामन्नगराद्वनान्वितः सततंसत्यव्रतोधीमान्स्वपाकावसथांतिके

पित्रात्यक्तोवसिष्ठोरःपिताचास्यवनंययौ सत्यव्रतोलोकेविख्यातस्त्रिशंकुरितिविश्रुतः वसिष्ठकोपात्तपसात्मा राजासत्य
व्रतःपुरा विश्वामित्रोमहातेजास्त्रिशंकुंन्तपसंस्थितं राज्येभिषिच्यतंपित्र्येयाजयामासतंपुनः मिषतांदेवतानां
चवसिष्ठस्यचकौशिकः सशरीरंतदातंवैदिवमारोपयत्प्रभुः तस्यसत्यरथानामभार्याकैकेयवंशजा कुमारंज
नयामासहरिश्चंद्रमकल्मषं हरिश्चंद्रस्यचसुतोरोहितोनामवीर्यवान् रोहितस्याप्यथचुंचुर्हरितश्चोच्यतेऽथः विज तनयो=
यश्चसुदेवश्चचुंचुपुत्रौबभूवतुः जेताक्षत्रस्यसर्वस्यविजयस्तेनसस्मृतः रुरुकस्तस्यतनयोराजापरमधार्मिकः
रुरुकस्यवृकःपुत्रस्तस्माद्बाहुःप्रजज्ञिवान् सगरस्तस्यपुत्रोभूत्राजापरमधार्मिकः द्वेभार्येसगरस्यापिप्रभाभानु
मतीतथा ताभ्यामाराधितःपूर्वमौर्वोग्निःपुत्रकाम्यया और्वस्तुष्टस्तयोःप्रादाद्यथेष्टंवरमुत्तमं एकाषष्टिसहस्राणि
सुतमेकंतथापरा अगृह्णाद्वंशकर्तारंप्रभागृह्णात्सुतान्बहून् एवंभानुमतीपुत्रमगृह्णादसमंजसं ततःषष्टि
सहस्राणिसुषुवेयादवीप्रभा खनंतःपृथिवींदग्धाविष्णुनासत्वमार्गिणा असमंजस्सुतनयःसोंशुमान्नामविश्रु
तः तस्यपुत्रोदिलीपस्तुदिलीपात्तुभगीरथः येनभागीरथीगंगातपःकृत्वावतारिता भागीरथसुतश्चापिश्रुतो
नामबभूवह नाभगस्तस्यदायादोभवभक्तःप्रतापवान् अंबरीषःसुतस्तस्यसिंधुद्वीपस्ततोभवत् नाभागेनां
बरीषेणसिंधुद्वीपेनपालिता बभूवप्रजात्यर्थंतापत्रयविवर्जिता अयुताश्वःसुतस्तस्यसिंधुद्वीपस्यवीर्यवान्
पुत्रोऽयुतायुषोधीमानृतुपर्णोमहायशाः दिव्याक्षहृदयज्ञोसौराजानलसखोबली नलोद्वावेवविख्यातौपुराणे
दृढव्रतौ वीरसेनसुतश्चान्योयश्चेक्ष्वाकुकुलोद्भवः ऋतुपर्णस्यपुत्रोभूत्सर्ववर्णोद्विजोत्तमः सुदासस्तस्यतन

योराजाग्निंद्रसमोभवत् सुदासस्यसुतःप्रोक्तः सौदासोनामपार्थिवः ख्यातःकल्माषपादोवैनाम्नामित्रसहेतिसः
वसिष्ठस्तुमहातेजाःक्षेत्रेकल्माषपादके अश्मकंजनयामासतमिक्ष्वाकुकुलोद्भवं अश्मकस्योत्कलायांतुमूल
कस्ततोभवत् सहिरामभयाद्राजास्त्रीभिःपरिवृतोवसत् नारीकवचइत्येवंततःख्यातिमुपागमत् मूलकस्यापिधर्मा
त्माराजादशरथःसुतः तस्माच्चतस्योजज्ञेराजाविलीविलोवली आसीदैलविलिःश्रीमान्नवधर्माप्रतापवान्
पुत्रोविश्वसहस्तस्यपित्रभ्यस्त्राप्यजायत दिलीपस्तस्यपुत्रोभूत्खट्वांगइतिविश्रुतः येनस्वर्गादिहागत्यमुहूर्तंप्रा
प्यजीविते त्रयोभिसंधितालोकाबुद्ध्यासत्येनचैवहि दीर्घोनामसुतस्तस्यरघुस्तस्मादजायत अजःपुत्रोरघोश्चापि
तस्माज्जज्ञेतिवीर्यवान् राजादशरथोनामश्रीमानिक्ष्वाकुवंशकृत् रामोदाशरथिर्वीरोधर्मज्ञोलोकविश्रुतः भरतोल
क्ष्मणश्चैवशत्रुघ्नश्चेतिवैसुताः तेषांज्येष्ठोमहातेजाःरामोराजीवलोचनः रावणंसगणंहत्वायज्ञैरिष्ट्वाचधर्मवित्
एकादशसहस्राणिराज्यंकृत्वागमद्दिवि रामस्यतनयोजज्ञेकुशइत्यभिविश्रुतः लवश्चसुमहातेजाःसर्वतत्त्वार्थ
वित्सुधीः अतिथिश्चकुशाज्जज्ञेनिषधस्तस्यचात्मजः नभसःपुंडरीकातःक्षेमधन्वाततःस्मृतः तस्यपुत्रोभवद्वीरो
देवानीकःप्रतापवान् अहीनगुःसुतस्तस्यसहस्राश्वस्ततःपरः शुभश्चंद्रावलोकश्चतारापीडस्ततोभवत् तस्या
त्मजश्चंद्रगिरिर्भानुमित्रस्ततोभवत् श्रुतायुरभवत्तस्माद्बृहद्रकइतिस्मृताः भारतेयोमहातेजाःसौभद्रेणनिपा
तितः एतेइक्ष्वाकुदायादाराजानःप्रायशःस्मृताः वंशेप्रधानेएतस्मिन्प्राधान्येनप्रकीर्तिताः सर्वेपाशुपतंज्ञानम
धीत्यपरमेश्वरं समभ्यर्च्ययथान्यायमिष्ट्वायज्ञैर्यथाविधि दिवंगतामहात्मानःकेचिन्मुक्तात्मयोगिनः नृगोब्रा
ह्मणशापेनकृकलासत्वमागतः धृष्टश्चधृष्टकेतुश्चमूनायश्चवीर्यवान् रणधृष्टस्यतेपुत्रास्त्रयःपरमधार्मि

लिंग॰ पु॰ ९॰

90

कः आनर्तो नाम शर्यातिः सुकन्या चैव दारिका । आनर्तस्याभवत्पुत्रो रोचमानः प्रतापवान् । रोचमानस्य रेवोऽभूद्रेवा
द्रैवत एव च । ककुद्मी चापरो ज्येष्ठः पुत्रः पुत्रशतस्य तु । रेवती यस्य सा कन्या भार्या रामस्य विश्रुता । नरिष्यन्तस्य पुत्रोऽभू
त्तत्त्वो नाम महाबलः । भागवत्यां बरीषस्य विष्णुभक्तः प्रतापवान् । कृतं तस्य सुतः श्रीमान्सर्वधर्मविशारदः । ततः क्ष
त्तस्य कार्यार्थं रक्षितो भविता त्वतः । पृषध्रो हिंसयित्वा तु गुरोः प्राय स कल्मषं । शापाच्छूद्रत्वमापन्नो च्यवनस्येति संस्मृ
तः । तस्य पुत्रोऽतिविक्रान्तो राजासीद्राज्यवाहनः । एते समासतः प्रोक्ता मनुपुत्रा महानुजाः । इक्ष्वाकोः पुत्रपौत्राश्च इलस्या
पि वदामि वः । सूत उवाच । ऐलः पुरूरवा नाम भवभक्तः प्रतापवान् । चक्रे त्वकंटकं राज्यं देशे पुण्यतमे द्विजाः । उत्तरे य
मुनायास्तु प्रयागे मुनिसत्तमाः । प्रतिष्ठानमिति ख्यातः स तत्रैव प्रतिष्ठितः । तस्य पुत्रा बभूवुर्हि षडिंद्रसमतेजसः । त्रै
लोक्यवंदिताः सर्वे भवभक्ता महाबलाः । आयुर्धीमानमावसुर्विश्वायुश्चैव वीर्यवान् । शतायुश्च श्रुतायुश्च दिव्याश्चै
वोर्वशीसुताः । आयुषस्तनया वीराः पंचैवासन्महौजसः । स्वर्भानुतनयायां ते प्रभायां जज्ञिरे नृपाः । नहुषः प्रथमस्ते
षां धर्मज्ञो लोकविश्रुतः । नहुषस्य तु दायादाः षडिंद्रसमतेजसः । उत्पन्नाः पितृकन्यायां विरजायां महौजसः । यतिर्य
यातिः संयातिः शर्यातिस्तु तथांधकः । यतिर्मोक्षं समास्थाय ब्रह्मभूतोऽभवत्प्रभुः । तेषां ययातिः पंचानां ज्येष्ठो राजा म
हाबलः । देवयानीमुशनसः सुतां भार्यामवाप सः । शर्मिष्ठामासुरीं चैव तनयां वृषपर्वणः । यदुं च तुर्वसुं चैव देवया
नी व्यजायत । तौ शुभौ शुभौ शुभकर्माणौ शुभौ विशावि चेरतुः । द्रुह्युं चाणुं च पूरुं च शर्मिष्ठा वृषपर्वणः । अस्त्राणि च
रथं तस्मै ददौ शुक्रः प्रतापवान् । तोषितस्तेन विप्रेन्द्राः प्रीतः परमभास्वरः । असंगं कांचनं दिव्यमक्षये च महेषुधी । यु
क्तं मनोजवैरश्वैर्येन कन्यां समुद्वहन् । स तेन रथमुख्येन षड्रात्रेणाजयन्महीं । ययातिर्युधि दुर्धर्षो देवदानवमानवैः

भवभक्तः सुपुण्यात्मा धर्मनिष्ठो गतक्लमः यज्ञयाजी जितक्रोधः सर्वभूतानुकंपनः पौरवाणां च सर्वेषां सोभवद्वंशसत्तमः
यावत्त्रैंदृप्रवरः कौरवो जनमेजयः कुरोः पुत्रस्य राजस्य राज्ञः पारीक्षितस्य ह जगाम स तथा नाशं शापाद्गर्गस्य धीमतः
गर्गस्य हिंसितं बालं स राजा जनमेजयः अक्रूरं हिंसयामास ब्रह्महत्यामवाप सः स लोहगंधी राजर्षिः परिधावन्नितस्त
तः पौरजानपदैस्त्यक्तो न लेभे शर्म कर्हिचित् ततः स दुःखसंतप्तो न लेभे संविदं क्वचित् जगाम शौनकं ऋषिं शरणं
व्यथितो तिव्यथः इंद्रोतिनाम विख्यातो यो सौ मुनिरुदारधीः याजयामास कारुण्याच्छौनको जनमेजयं अश्वमेधेन राजा
नं पावनार्थं द्विजोत्तमाः स लोहगंधाद्विमुक्तस्तमसश्च महायशाः तस्यावभृथमासाद्य स च दिव्यो रथः शुभः तस्मा
द्वंशात्परिभ्रष्टो वसोश्चेदिपतेः पुनः दत्तः शक्रेण तुष्टेन लेभे तस्माद्बृहद्रथः ततो हत्वा जरासंधं भीमस्तं रथमुत्तम
म्प्रददौ वासुदेवाय प्रीत्या कौरवनंदनः सूत उवाच अभिषिंचन्नरे पुत्रं ययातिर्नाहुषः प्रभुः कृतोपकारस्तेनैव पुरु
णा हि द्विजपुंगवाः तेनाभिषेक्तुकामे च नृपं पुरुं कनीयकं ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् कथं शुक्रस्य नप्तारं
देवयान्याः सुतं प्रभो ज्येष्ठं पुत्रमतिक्रम्य कनीयान् राज्यमर्हति ययातिरुवाच ब्राह्मणप्रमुखा वर्णाः सर्वे शृण्वं
तु मे वचः ज्येष्ठं प्रति यथा राज्यं न मे देयं कथंचन मम ज्येष्ठेन यदुना नियोगो नानुपालितः प्रतिकूलं पितुर्यश्च न स
पुत्रः सतां मतः स पुत्रः पुत्रवद्यस्तु वर्तते पितृमातृषु यदुनाहमवज्ञातस्तथा तुर्वसुनापि च द्रुह्युना चानुना चैवम
प्यवज्ञा कृता भृशं पूरुणा च कृतं वाक्यं मानितश्च विशेषतः कनीयान्मम राज्यार्हो जरा येन धृता मम शुक्रेण मे स
मादिष्टा देवयान्याः कृते नृप पार्थिवेन पुनस्तेन जरा संचारिणी भृता शुक्रेण च वरो दत्तः प्रार्थितेन मया स्वयं पुत्रो य
स्त्वानुवृत्तेयः स ते राज्यभवानिति भवतामप्यनुज्ञातः पुत्रं राज्येभिषिंचय प्रकृतय ऊचुः यः पुत्रो गुणसंपन्नो माता

लिं॰ पु॰
पू॰ भा॰
६१

पित्रोर्हितस्तदा सर्वमर्हतिकल्याणांकनीयानपिसत्तमः श्रेष्ठंत्वपिनविदंराज्यंसयदाप्रियकृत्तदा यदानाज्ञांकुरुतेस्य
नशाक्यंकर्तुमन्यथा ततउवाच पौरजानपदैस्तुष्टैरिस्तुकोनाहुषस्तदा अभिषिच्यनदाहर्षं स्वतेराज्येमहामनाः १
दिशिदक्षिणस्यांवसुंचपुत्रमादिशत् दक्षिणस्यांततोराजायदुंश्रेष्ठंन्ययोजयत् प्रतीच्यामुत्तरायांतुद्रुह्युंचानु
श्रुतावुभौ सप्तद्वीपांययातिस्तुजित्वापृथ्वींससागरां व्यभजत्पंचधाराजापुत्रेभ्योनाहुषस्तदा तेविधंपृथिवीसर्वा
सप्तद्वीपाससागरा यथाप्रदेशमद्यापिधर्मेणप्रतिपाल्यते एवंविभज्यपृथिवींपुत्रेभ्योनाहुषस्तदा प्रीतिमानभवद्राजा
भारमावेश्यवंधुषु पुत्रसंक्रामितश्रीस्तुहर्षनिर्भरमानसः तेनगाथामहाराजोहर्षाद्गीताययातिना योभिसत्याहरेत्
कामान्सर्वशोंगानिकूर्मवत् सोतिभातिनरःश्रीमान्नान्यथाकोटिकर्मभिः नजातुकामःकामानामुपभोगेनशा
म्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते यत्पृथिव्यांव्रीहियवाहिरण्यंपशवःस्त्रियः एकस्यापिनपर्याप्तमिति
मत्वाशमंव्रजेत् यदानकुरुतेभावंसर्वभूतेषुदारुणं कर्मणामनसावाचाब्रह्मसंपद्यतेतदा यादुस्त्यजादुर्मतिभि
र्जीर्यतेयानजीर्यतः योसौप्राणांतिकोरोगस्तांतृष्णांत्यजतःसुखं जीर्यंतिजीर्यतःकेशादंताजीर्यंतिजीर्यतः चक्षुः
श्रोत्रेचजीर्येतेतृष्णैकानिरुपद्रवा जीर्यंतिदेहिनःसर्वेस्वभावादेवनान्यथा जीविताशाधनाशाचजीर्यतोपिनजीर्य
ते यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखं तृष्णाक्षयसुखस्यैवकलांनार्हतिषोडशीं एवमुक्त्वासराजर्षिःसदा
रःप्राविशद्वने भृगुतुंगेतपःकृत्वातत्रैवचमहायशाः साधयित्वाव्रनशनेसदारःस्वर्गमाप्तवान् तस्यवंशपास्तुपंच
मेपुण्यादेवर्षिसत्कृताः येर्व्याप्तापृथिवीकृत्स्नासूर्यस्येवमरीचिभिः धनीप्रजावानायुष्मान्कीर्तिमांश्चभवेन्नरः
ययातिचरितंपुण्यंपठन्शृण्वन्सबुद्धिमान् ॥ इत्यादिमहापुराणेलैंगेसोमवंशेययातिचरितंषट्षष्टितमोऽध्यायः ६६

सूतउवाच यदोर्वंशंप्रवक्ष्यामिज्येष्ठस्योत्तमतेजसः संक्षेपेणानुपूर्व्याच्चगदतोमेनिबोधत यदोःपुत्राबभूवुर्हिपंचदेवसुतो
पमाः सहस्रजित्सर्वजिच्चक्रोष्टुनीलाजिनिर्लघुः सहस्रजितस्तैवपुत्रःसत्राजिन्नामविश्रुतः सुताःसत्राजितःख्यातास्त्र
यःपरमकीर्तयः हैहयश्चहयश्चैवराजावेणुहयश्चयः हैहयस्यतुदायादोनेत्रइतिश्रुतः धर्मनेत्रस्यपुत्रस्तुसंज्ञितस्त
स्यचात्मजः संज्ञितस्यतुदायादोमहिष्मान्नामधार्मिकः आसीन्माहिष्मतःपुत्रोभद्रश्रेण्यःप्रतापवान् भद्रश्रेण्यस्तुदा
यादोदुर्मदोनामपार्थिवः दुर्मदस्यसुतोधीमांश्चरकोनामपार्थिवः चरकस्यतुदायादाश्चत्वारोलोकसंमतः कृतवीर्यः
कृताग्निश्चकृतवर्मातथैवच कृतौजाश्चचतुर्थोभूत्कार्तवीर्यस्तुसोर्जुनः जज्ञेबाहुसहस्रेणसप्तद्वीपेश्वरःप्रभुः तस्यराम
स्तदात्वासीन्मृत्युर्नारायणांशकः तस्यपुत्रशतान्यासन्पंचतत्रमहारथाः कृतास्त्राबलिनःशूराःधर्मात्मानोमनस्विनः
शूरश्चशूरसेनश्चधृष्टःक्रोष्टुस्तथैवच जयध्वजश्चराजाभूत्तालजंघोमहाबलः संहतास्तालजंघस्यतालजंघाइतिस्मृ
ताः तेषांज्येष्ठोमहावीर्योवीतिहोत्रोभवन्नृपः वृषप्रभृतयश्चान्येयादवाःपुण्यकर्मणः वृषोवंशकरस्तेषांतस्यपुत्रोभवन्म
धुः मधोःपुत्रशतंत्वासीद्वृषणस्तस्यवंशभाक् वृषणाद्वृष्णयःसर्वेमधोर्वैमाधवाःस्मृताः यादवायदुवंशेननिरुच्यंतेच
हैहयाः तेषांपंचगणाःख्याताहैहयानांमहात्मनां वीतिहोत्राश्चभोजाश्चतथापर्वततःपरे तुंडिकेराश्चविख्यातास्तालजं
घास्तथैवच शूरश्चशूरवीरश्चशूरसेनश्चदानव शूरसेनाइतिख्याताद्देशास्तेषांमहात्मनां वीतिहोत्रसुतश्चापिविश्रुतोनर्त
इत्युत दुर्जयस्तस्यपुत्रस्तुबभूवामित्रकर्षितः क्रोष्टुश्चशृणुराजर्षेर्वंशमुत्तमपौरुषं यस्यान्ववायेसंभूतोविष्णुर्वृष्णिकु
लेविभुः क्रोष्टोरेकोभवत्पुत्रोवृजिनीवान्महायशाः तस्यपुत्रोभवद्राजाविशंकुर्वदतांवरः विशंकोऋषभःपुत्रःऋषभोऽयुत्र
जात्मकः महाक्रतुभिरीजासौविविधैराप्तदक्षिणैः लेभेचित्ररथंपुत्रंचित्रकर्मभिरन्वितं अथचैत्ररथिर्वीरोयज्वाविपुलदक्षि
णः शशिबिंदुःसवैराजाअन्वयाद्व्रतमुत्तमं चक्रवर्तीमहासत्त्वोमहावीर्योमहाप्रजः शशिबिंदोस्तुपुत्राणांसहस्राणामभू

लिं॰ ग॰
पु॰ ग॰
६८

क्रते शोसंतीह पुराणज्ञास्तस्यात्मजमनेनकं अनेनकात्तु यज्ञस्तु यज्ञस्य तनयो धृतिः उशनास्तस्य यस्तस्य संप्राप्यसमहीमिमाम्
आजहाराश्वमेधानां शतमुत्तमधार्मिकः स्मृतश्चोशनसः पुत्रशतेषु जितपार्थिवाः मरुतस्तस्य तनयो राजर्षिर्वंशवर्द्धनः वीरः
कंबलवर्हिषो मरुतस्तनयः स्मृतः पुत्रस्तु रुक्मकवचो वीरः कवचिनो रणे धन्विनो निशितैर्बाणैरवाप श्रियमुत्तमां अश्वमे
धे तु धर्मात्मा स्मृतिभ्यः पृथिवीं ददौ जज्ञिरे रुक्मकवचात्पुत्रा वत्स्य वीरहा जज्ञिरे पंच पुत्रास्तु महासत्वपरायणाः पुरुमेधु पृथु
पुरुमस्त्वथामघः परिघो हरिः परिघं च हरिं चैव विदेहेषु पितावसत् पुरुमेधुरभवद्राजा पृथुपुरुमस्तथाश्रयात् तेभ्यः संप्राप्ति
ते राज्ये ज्यामघः स्मृत आश्रमे प्रशांते शनकैर्भेजे प्रसन्नो ह्यस्मापसः जगामधनुरादाय देशमन्यं ध्वजी रथी नर्मदाकूलमेकाकी
मेखलामृतिकावतीं ऋक्षवंतं गिरिं गत्वा शुक्लवर्णमुवास सः ज्यामघस्याभवद्राजा सैव्या बलवती सती साचैव तपसोग्रेण शैव्या
वै समसूयत पुत्रं विदर्भ सुभगा वयः परिणता सती राजपुत्रसुतायोत विद्वांसो क्रथकौशिकौ पुत्रौ विदर्भराट् जज्ञे शूरौ रण
विशारदौ रोमपादस्तृतीयस्तु वत्सस्तस्यात्मजः प्रियः अमीवतनयास्तस्य द्विजाः परमधार्मिकाः कौशिकस्य सुताश्चेदिर्यस्मा
चैद्या नृपाः स्मृताः क्रथो विदर्भस्य सुताः कुंतस्तस्यात्मजो भवत् कुंताद्वृष्णिसुता जज्ञे रणधृष्टः प्रतापवान् रणधृष्टसुतो जज्ञे
निर्वृतिः परवीरहा दशार्हो वै नृतश्चामिनाम्नारिगणसूदनः दशार्हस्य सुतो व्योम्नो व्योम्नो जीमूत उच्यते जीमूतात्द्विकृतिस्तस्य
सुतो भीमरथः स्मृतः अस्य भीमरथस्यासीत्पुत्रो नवरथः किल दानधर्मरतो नित्यं सत्यशीलपरायणः तस्य चासीद्दृढरथः
शकुनिस्तस्य चात्मजः तस्मात्करंभः संभूतो देवराजो भवन्नदा देवराजोभवद्राजा देवगर्भो महायशाः देवगर्भाच्च सोयज्ञे म
धुस्तस्मादजायत मधोश्च वंशजः कन्या प्रख्यातः पुरुषः प्रभुः आसीत्पुरुषपुत्रस्य तमणी पुरुषोत्तमः जज्ञेतमणि देहात्तु
रुद्राया चप्रतर्दनः ऐक्ष्वाकीत्यभवद्भार्या तस्यां जज्ञे प्रतर्दनात् सत्वावानगुणसंपन्नः सात्वतः कुलवर्द्धनः पुरुषः मरुत्वान्प्र
तर्दनः भद्रायां राजा सात्वतः ज्यामदस्य मया प्रोक्ता सृष्टिर्वै विस्तरेणतु यः पठेच्छृणुयाद्वापि श्रावयेद्वा श्येत यः प्रजावान्वित

मान्धीमान्भवेज्जन्मनिजन्मनि इत्यादिमहापुराणेलैंगेसोमवंशेअष्टषष्टितमोध्यायः सूतउवाच सात्वतःसत्वसंपन्नः
प्रजज्ञेचतुरःसुतान् कुक्कुरंभोजमानंचदिव्यंवैशाह्वयंनृपं अंधकंचमहाभागंवृष्णिंचयदुनंदनः तेषांनिसर्गश्चतुरो
शृणुध्वंविस्तरेणैव भोजमानस्यसृंजय्यांभजमानाविजज्ञिरे प्रयुतायुःसहस्रायुर्बलवान्देशकःपरः तथादेवा
वृधोराजाचचारपरमंतपः पुत्रःसर्वगुणोपेतोममभूयादितिस्पृहा जातोवभ्रुरितिख्यातःपुण्यश्लोकोन्तयोत्तमः ।
पुरुषाःपंचषष्टिश्चषट्सहस्राणिचाष्टकः येमृतत्वमनुप्राप्ताबभ्रोर्दैवावृधादिति जज्ञेदानपतिर्वीरोबभ्रुसुतःसुदा
न्वापुत्रःकीर्तिमांश्चमहातेजाःसात्वतानांमहारथः तस्यान्वयेसंभूताःयादवादेवतोपमाः गांधारीचैवमाद्रीच
वृष्णिभार्येवभूवतुः गांधारीजनयामाससुमित्रंमित्रनंदनं माद्रीयुधाजितंपुत्रंततस्तंदेवमीढुषं अनमित्रंसुतंचैव
प्रसूतापुरुषोत्तमः अनमित्रसुतोनिघ्नोनिघ्नस्यद्वौवभूवतुः प्रसेनश्चमहाभागःसत्राजिच्चसुतावुभौ तस्यसत्राजित
स्यासीत्सूर्यःप्राणसमःसखा स्यमंतकंददौतस्मैसस्वाख्येनचकर्मणा कदाचिन्मृगयांयातःसहतेनप्रसेनजित् वने
प्राप्तोसहासस्यसिंहाद्देवसुदारुणात् अनिमित्तात्सरिजितेकनिष्ठोवृष्णिनंदनात् सएवपरमात्मासौदेवदेवोजना
र्दनः हलायुधश्चभगवाननंतोपराजितःप्रभुः भृगुशापाच्छलेनैवमानयन्मानुषीप्रभुः वभूवतस्यादेवक्यांवसु
देवाज्जनार्दनः उमादेहसमुद्भूताकौशिकीयोगनिद्रया नियोगाद्देवदेवस्ययशोदातनयाह्यभूत् साचैवप्रकृतिःसा
क्षात्सर्वलोकनमस्कृता पुरुषोभगवान्कृष्णोधर्ममोक्षफलप्रदः तांकन्यांजगृहेधीमान्कंसभीत्यासुतेनया चत
र्भुजंविशालाक्षंश्रीवत्सांकितवक्षसं शंखचक्रगदापद्मंधारयंतंजनार्दनं यशोदायैप्रदत्तात्मनिहतानकदुंदुभिः
दत्वेनंनंदगोपस्यरक्षतामितिचाब्रवीत् रत्नस्वजगतोविस्मयेख्याभूतविग्रहः प्रसादाद्देवदेवस्यभवस्यामिततेज

लिं॰ ग॰
पु॰ रा॰
९४

94

सः रामेणसार्द्धंदत्वातेवरंदेवाविजेतारं भूमिभारनिग्रहार्थंचावतीर्णोजगद्गुरुः अतोवैसर्वकल्याणंयादवानांभवि-
ष्यति अस्यगर्भोदेविकायाःसनःक्लेशान्हरिष्यति उग्रसेनात्मजायाथकंसायानकदुंदुभिः निवेदयामासतदाकन्येति
शुभलक्षणा अस्यास्त्वष्टमोगर्भोदेवक्याःकंसस्यव्रताः म्रत्युवैंतेनसंदेहइतिवाणीपुरातनी ततस्तांहंतुमारेभेकंसः
सोहंतव्यावांवरं उवाचाष्टभुजादेवीमेघगंभीरयागिरा रक्तसैवकस्यकंदेहमायातोमृत्युरेवते स्मरत्वंयद्धितेमृत्युंदेवि
क्यास्तनयोष्टमः एतेप्रतिकृतंयत्नंभोजराजस्ययाहरौ प्रभावादितिचोक्त्वासाव्योम्निरन्तरधीयत कंसोपिनिहतस्ते
नकृष्णेनाक्लिष्टकर्मणा निहतावहवश्चान्येदेवब्राह्मणघातिनः अस्यकृष्णस्यतनयाःप्रद्युम्नप्रमुखाद्विजाः वहवो
परिसंख्याताःसर्वायुधविशारदाः अयुतानिदशाष्टौचकृष्णेनसहस्रशःशुभाः पुत्रेषुतेषुसर्वेषुचारुदेष्णादयोहरेः विशि
ष्टाबलवंतश्चरौक्मिणेयारिसूदनाः षोडशस्त्रीसहस्राणिशतमेकंतथाधिकं कृष्णस्यतासुसर्वासुमुख्याश्चाष्टौचरुक्मि
णी यत्नोद्वादशवर्षाणिकृष्णेनाक्लिष्टकर्मणा शुश्रूषिताबाहुभक्तेनपुत्रार्थंपूजितोहरः चारुदेष्णःसुचारुश्चचारुवेगो
यशोधरः चारुश्रवश्चारुयशाःप्रद्युम्नःशांवएवच एतेलब्धाश्चकृष्णेनप्रसादाच्छूलपाणिनः तान्दृष्ट्वातनयान्सर्वान्
रौक्मिणेयान्जनार्दनात् जांववत्यब्रवीत्कृष्णंभार्याकृष्णस्यधीमतः ममत्वंपुंडरीकाक्षविशिष्टंगुणवत्तरं सुरेशसंमितं
पुत्रंप्रसन्नोदातुमर्हसि जांववत्यावचःश्रुत्वाजगन्नाथस्ततोहरिः तपस्तप्तुंसमारेभेतपोनिधिररिंदमः सोपिनारायणः
कृष्णःशंखचक्रगदाधरः व्याघ्रपादस्यचमुनेर्गत्वाचैवाश्रमोत्तमं दृष्ट्वोपमन्युंशिरसाप्रणिपत्यजनार्दनः दिव्यंपाशुप
तंयोगंलब्धवांस्तस्यचाज्ञया मलमयमश्रुकेशाश्छन्नाक्तोमुंजमेखली दीक्षितोभगवान्कृष्णस्तताप च तपःस्वयं ऊ
र्ध्वबाहुर्निरालंबःपादांगुष्ठेनधिष्ठितः फलान्यनिलभोजीचऋतत्रयमधोक्षजः तपसातस्यसंतुष्टोददौरुद्रोवरान्वहू

न् सांबं जांबवतीपुत्रं कृष्णायचमहात्मने लब्ध्वाजांबवतीचैवसांबंभार्याहरेःसुतं प्रद्युम्नमतुलंलेभेलब्ध्वादित्येयथादितिः
बाणस्यचतदातेनछेदितंमुनिपुंगवाः भुजानांवैसहस्रंतुशापाद्रुद्रस्यधीमतः सूर्यदैत्यवधंचक्रेहलायुधसहायवान्
तथाद्रुष्टात्मतीक्ष्णानांलीलयैवरणाजिरे सहत्वादैत्यसंघातंनरकंदैत्यपुंगवं ब्रह्मणश्चवाहस्योक्रश्चवरदानेनमहात्म
ने स्त्रीपभोग्यानिपुण्यानिषोडशातुलविक्रमः शताधिकानिजग्राहसहस्राणिमहाबलः शापव्याजेनविप्राणामुप
संहृतवान्कुलं संहृत्यस्वकुलंचैवप्रभासेतिष्ठदच्युतः यदास्वयमेवतुगतंसर्वाणामाधिकंशते कृष्णस्यद्वारिकांचैवभ
ग्नाह्लार्णवोंभसि विश्वामित्रस्यकण्वस्यनारदस्यचधीमतः शापपिंडारकेरत्नान्दुर्वासावचसस्तथा त्यक्त्वाचमानुषंदे
हं लुब्धकस्यछलेनतु प्रगृह्यचततःकृष्णोलब्धकंप्रययौदिवं अष्टावक्रस्यशापेनभार्याकृष्णस्यधीमतः चौरैरुपहृताःस
र्वास्तस्यमायाबलेनच बलभद्रोपिसंचिंत्यसोमोश्वाजगामह महिष्यस्तस्यकृष्णस्यरुक्मिणीप्रमुखाःशुभाः सहाः
ग्निंविविशुःसर्वाःकृष्णेनाक्लिष्टकर्मणा रेवतीचतदादेवीबलभद्रेणधीमता प्रविष्टापावकंविप्राःसाचतेनरतागता प्रे
तकार्यंहरेःकृत्वापार्थःपुरंजयः रामस्यचतथान्येषांवृसीनामपिसत्रती कंदमूलफलैस्तस्यबलिकार्यंचकारसः
द्रव्याभावात्त्वयंपार्थोभ्रातृभिश्चदिवंगतः एवंसंक्षेपतःप्रोक्तंकृष्णस्याक्लिष्टकर्मणः प्रभावोविमलंचैवस्वेच्छयैवमहा
त्मनः इत्येतत्सोमवंशानांनृपाणांचरितंद्विजाः यःपठेच्छृणुयाद्वापिब्राह्मणान्श्रावयेत्तिवा सयातिविष्णुसालोक्यं
नात्रकार्याविचारणा इत्यादिमहापुराणेलैंगेसोमवंशयदुवंशकीर्तनेवासुदेवबलभद्रकथाचंडिकोत्पत्तिकंसवध
द्वारिकाजलप्लावप्रदर्शितमोध्यायः ६९ ऋषयऊचुः आदिसर्गस्त्वयासूतसूचितोनप्रकाशितः सांप्रतंविस्तरे
णैववक्तुमर्हसिसुव्रत सूतउवाच महेश्वरोमहादेवःप्रकृतेःपुरुषस्यच परतोसंस्थितोदेवःपरमात्मामहेश्वरः
प्रकृत्याचैश्वरात्मस्मादभवत्कारणंपरं प्रधानंप्रकृतिंचैतियदाहुस्तत्त्वचिंतकाः गंधवर्णरसैर्हीनंशब्दस्पर्शविवर्जितं

लिं॰ ग॰
पु॰ ग॰
९५

95

अव्यक्तं ध्रुवमक्षय्यं नित्यंस्वात्मन्यवस्थितं जगद्योनिर्महाभूतंपरंब्रह्मसनातनं विग्रहंसर्वभूतानामीश्वरात्ताप्रचोदितं अनाद्यंत
मजंसूक्ष्मंत्रिगुणंप्रभवाप्ययं असांप्रतमविज्ञेयंब्रह्माग्रेसमवर्तत अस्यात्मनासर्वमिदंव्याप्तमासीच्छिवेच्छया गुणसाम्ये
तदातस्मिन्नविभागेतमोमये सर्वकालेप्रधानस्यक्षेत्रज्ञाधिष्ठितस्यवै प्रभावाद्व्यज्यमानोवैमहान्प्रादुर्बभूवह सूक्ष्मेण
महताचाथअव्यक्तेनसमावृतं सत्वोद्रिक्तोमहानग्रेसत्तामात्रप्रकाशकः मनोमहांस्तुविज्ञेयमेकंतत्कारणंस्मृतं समु
त्पन्नंलिंगमात्रंतुक्षेत्रज्ञाधिष्ठितंतुतत् धर्मादीनिचरूपाणिलोकतत्वार्थहेतवः महान्सृष्टिंविकुरुतेचोद्यमानःसिसृक्षया
मनोमहान्मतिर्ब्रह्मापूर्बुद्धिःख्यातिरीश्वरः प्रज्ञाचितिःस्मृतिःसंविद्विपुरंचोच्यतेस्मृते मनुतेसर्वभूतानांयस्माच्चेष्टा
फलंप्रभुः सूक्ष्मत्वेनविभक्तंतुयेनतन्मनउच्यते तत्वानामग्रजोयस्मान्महांश्चपरिमाणतः विशेषेभ्योगुणेभ्यस्तेभ्योमहा
नितिततःस्मृतः विभर्तिमानंमनुतेविभागंमन्यतेपिच पुरुषोभोगसंबंधात्तेनचासौमतिःस्मृता बृहत्वाद्बृंहणत्वाच्च
भावानांसलिलाश्रयात् यस्माद्बृंहयतेभावान्ब्रह्मातेननिरुच्यते आपूरयतियस्माच्चकृत्स्नान्देवाननुग्रहैः तत्वभावेन
नयतेतेनपूरितिचोच्यते बुध्यतेपुरुषश्चात्रसर्वान्कामान्हिताहितान् यस्माद्बोधयतेयत्रबुद्धिस्तेननिरुच्यते ख्यातिःप्रत्य
यभोगश्चयस्मात्संवर्ततेयतः भोगस्यज्ञाननिष्ठत्वात्तेनख्यातिरितिस्मृता ख्यायतेतद्गुणैर्वापिज्ञानादिभिरनेकशः तस्मा
च्चमहतःसंख्याख्यातिरित्यभिधीयते महत्सर्वंविजानातिमहात्मातेनचेश्वरः यस्माज्ज्ञानग्रहाच्चैवप्रज्ञातेनसउच्यते ज्ञा॰
नादीनिचरूपाणिकृतकर्मफलानिच चिनोतियस्माद्भोगार्थंतेनासौचितिरुच्यते वर्तमानान्यतीतानितथैवानागता
न्यपि स्मरतेसर्वकार्याणितेनासौस्मृतिरुच्यते कृत्स्नंचविंदतेज्ञानंयस्मान्माहात्म्यमुत्तमं तस्माद्वेदैर्वदश्चैवसंविदित्य
भिधीयते विद्यतेचापिसर्वस्मिंस्तस्मिन्सर्वंचविद्यते तस्मात्संविदितिप्रोक्तामहान्वैबुद्धिसत्तमाः जानीतेज्ञानमित्याहु
र्भगवान्ज्ञानसंनिधिः भावानांविपरीभावाद्विपुरंप्रोच्यतेबुधैः पर्यायवाचकैःशब्दैस्तत्वमाद्यमनुत्तमं व्याख्यातंतत्व॰

भावैस्तैरेवंसद्भावविंतकैः महान्सृष्टिंविकुरुतेचोद्यमानःसिसृक्षया संकल्पोध्यवसायश्चतस्यवृत्तिद्वयंस्मृते त्रिगुणाःस
तुविज्ञेयःसत्त्वराजसतामसाः त्रिगुणाद्राजसोद्रिक्तादहंकारस्ततोभवत् महताकृतसर्गोभूद्भूतादिर्वाय्यतस्तसः तस्मा
देवतमोद्रिक्तादहंकारादजायत भूततन्मात्रसर्गस्तुभूतादिस्तामसस्तुसः भूतादिस्तुविकुर्वाणःशब्दमात्रंससर्जह आ
काशंसुषिरंतस्मादुत्पन्नंशब्दलक्षणं आकाशंशब्दमात्रंतुभूतादिश्चावृणोत्ततः शब्दमात्रंतथाकाशंस्पर्शमात्रंससर्ज
ह बलवानभवद्वायुस्तस्यस्पर्शोगुणोमतः आकाशंशब्दमात्रंचस्पर्शमात्रंसमावृणोत् वायुश्चापिविकुर्वाणोरूपमात्रंस
सर्जह ज्योतिरुत्पद्यतेवायोस्तद्रूपगुणमुच्यते स्पर्शमात्रस्तुवैवायूरूपमात्रंसमावृणोत् ज्योतिश्चापिविकुर्वाणोरस
मात्रंससर्जह संभवंतिततोह्यापस्तावैसर्वरसात्मकाः रसमात्रस्तुताह्यापोरूपमात्रोग्निरावृणोत् आपश्चापिविकु
र्वाणागंधमात्रंससर्जिरे संघातोजायतेयस्मात्तस्यगंधोगुणोमतः तस्मिंस्तस्मिंस्तुतन्मात्रंतेनतन्मात्रतास्मृता अविशे
षवाचकत्वादविशेषस्तुपद्यते प्रशांतघोरमूढत्वादविशेषस्ततःपुनः भूततन्मात्रसर्गोयंविज्ञेयस्तुपरस्परात् वै
कारिकादहंकारात्सत्वोद्रिक्तात्तुसात्विकात् वैकारिकःससर्गस्तुयुगपत्संप्रवर्तते बुद्धींद्रियाणिपंचैवपंचकर्मेंद्रिया
णिच साधकानींद्रियाणिस्युर्देवावैकारिकादश एकादशंमनस्तत्रस्वगुणेनोभयात्मकं श्रोत्रंत्वक्चक्षुषीजिह्वानासि
काचैवपंचमी शब्दादीनामवाप्त्यर्थंबुद्धियुक्तानिवक्ष्यते पादौपायुरुपस्थंचहस्तौवाक्चमीभवेत् गतिर्विसर्गोह्यानं
दःशिल्पंवाक्यंचकर्मतत् आकाशंशब्दमात्रंयत्स्पर्शमात्रंसमाविशत् सहितागंधमात्रेणआविन्वंतिमहीमिमां
तस्मात्पंचगुणाभूमिःस्थूलाभूतेषुशब्द्यते द्विगुणास्तुततोवायुःशब्दस्पर्शात्मकोभवेत् रूपंतथैवाविशतःशब्दस्प
र्शगुणावुभौ त्रिगुणस्तुततस्त्वग्निःशब्दस्पर्शश्चरूपवान् शब्दःस्पर्शश्चरूपंचरसमात्रंसमाविशत् तस्माच्चतुर्गुणा
ह्यापोविज्ञेयास्तरसात्मिकाः शब्दःस्पर्शश्चरूपंचरसश्चगंधमाविशत् प्रशांतघोरमूढाश्चविशेषास्तेनतेस्मृताः गु

णो ह्यसर्वस्य सर्वस्य प्राग्भवं तत्र तेजोऽतरं । एवं परस्परोत्पन्ना धारयंति परस्परं । भूमेरंशास्त्विदं सर्वं लोकालोकं घनावृतं । विशे
लिं. पु. षांश्चेंद्रियग्राह्यान्नियतत्वाद्वृताः स्मृताः । एवं सर्वस्य सर्वस्य प्राग्भवं तत्र तेजोऽतरं । तेषां यावच्च यावच्च तत्तन्मात्रा गुणाः स्मृतं । अ
पू. भा. लब्ध्वाप्सु च ये गंधं केचिद्ब्रूयुरनैपुणाः । पृथिव्यामेव तं विद्यादपां वायोश्च संश्रयात् । एते सप्त महात्मानो ह्यन्योन्यस्य
९६ समाश्रयात् । पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्रहेण च । महदादिविशेषांता ह्यंडमुत्पादयंति ते । एककालसमुत्पन्नं ज
लबुद्बुदवच्च तत् । विशेषादंडमभवद्बृहत्तदुदकेशयं । अद्भिर्दशगुणाभिस्तु बाह्यतोंऽडं समावृतं । आपो दशगुणेनैव तत्ते
जसा बाह्यतो वृताः । तेजो दशगुणेनैव बाह्यतो वायुनावृतं । भूतादिर्महता वापि अव्यक्तेनावृतो महान् । एवं स्वांडकपा
लस्थो भवश्चांभसि संवृताः । रुद्रोऽग्निमध्ये भगवान् उग्रो वायुर्महेश्वरः । भीमश्चाकाशमध्यस्थस्त्वहंकारे महेश्वरः । बुद्धौ च
भगवानीशः सर्वज्ञः परमेश्वरः । एतैरावरणैरंडं सप्तभिः प्राकृतैर्वृतं । एवमावृत्य चान्योन्यमष्टौ प्रकृतयः स्मृताः । प्रसर्ग
काले स्थित्वा तु ग्रसंत्येताः परस्परं । एवं परस्परोत्पन्ना धारयंति परस्परं । आधाराधेयभावेन विकारास्ते विकारिषु । महेश्वरः
परोऽव्यक्तादंडमव्यक्तसंभवं । अंडाज्जज्ञे च देवेशः पुरुषोऽर्कसमप्रभः । तस्मिन्कार्यस्य करणं संसिद्धिः स्वेच्छयैव तु । स वै शरी
री प्रथमः स वै पुरुष उच्यते । तस्य वामांगजो विष्णुः सर्वदेवनमस्कृतः । लक्ष्म्या देव्याश्च भूदेवमिच्छया परमेष्ठिनः । दक्षि
णांगभवो ब्रह्मा सरस्वत्या जगद्गुरुः । तस्मिन्नंडे त्विमे लोका अंतर्विश्वमिदं जगत् । चंद्रादित्यौ सनक्षत्रौ सग्रहौ सह वायुना
लोकालोकद्वयं किंचिदंडे ह्यस्मिन्समर्पितं । यद्वक्ष्यामि तु संख्यानं मया लोकांतरे द्विजाः । एतत्कालांतरं ज्ञेयमहर्वै
पारमेश्वरं । रात्रिश्चैतावती ज्ञेया परमेशस्य कृत्स्नशः । अहस्तस्य तु या सृष्टिः रात्रिश्च प्रलये स्मृता । अहर्न विद्यते तस्य न रा
त्रिरिति धारयेत् । उपचारः क्रियते लोकानां हितकाम्यया । इंद्रियाणींद्रियार्थाश्च महाभूतानि पंच च । तन्मात्राण्यधि
भूतादिर्बुद्धिश्च सह देवतैः । अहस्तिष्ठंति सर्वाणि परमेशस्य धीमतः । अहरंते प्रलीयंते रात्र्यंते विश्वसंभवः । स्वात्मन्यव ।

96

स्थितेव्यक्तेविकारेप्रतिसंचरते स्वधर्मेणावतिष्ठेतेप्रधानपुरुषावुभौ तमःसत्वगुणोपेतौसमत्वेनव्यवस्थितौ अनुद्रिक्ता
वुभौतौतैतंतुसमौतौपरस्परं गुणसाम्येलयोज्ञेयोवैषम्येसृष्टिरुच्यते तिलेषुवायथातैलंघृतंपयसिवास्थितं तथा
तमसिसत्वेचरजोप्यनुसृतंस्मृतं उपास्यरजनींकृत्स्नांपरांमाहेश्वरींतदा अहर्मुखेप्रवृत्तस्तुपरःप्रकृतिसंभवः क्षोभ
यामासयोगेनपरमेणमहेश्वरं प्रधानंपुरुषंचैवप्रविश्याशुमहेश्वरः महेश्वरात्त्रयोदेवाजज्ञिरेजगदीश्वराः शाश्व
तीपरमागुह्याःसर्वात्मानःशरीरिणः एतएवत्रयोवेदाएतएवत्रयोगुणाः एतएवत्रयोलोकाएतएवत्रयोग्नयः प
रस्पराश्रिताह्येतेपरस्परमनुव्रताः परस्परेणावर्ततेधारयंतिपरस्परं अन्योन्यमिथुनाह्येतेह्यन्योन्यमुपजीविनः
क्षणंवियोगोनह्येषांनत्यजंतिपरस्परं ईश्वरस्तुपरोदेवोविसृष्टमहतःपरः ब्रह्मातद्रजसायुक्तःसर्गादौहिप्रवर्तते
परःसपुरुषोज्ञेयःप्रकृतिश्चापरास्मृता अधिष्ठितासाहिमहेश्वरेणप्रवर्ततेचोद्यमानासमंतात् अनुप्रवर्तेतिमा।
ह्यंतमेतद्विश्वस्थितत्वात्हिविषयप्रियत्वात् प्रधानगुणवैषम्यात्सर्वकालंप्रवर्तते ईश्वराधिष्ठितात्पूर्वंतस्मात्सदसदा
त्मकात् संसिद्धकार्यकरणोविस्तुतस्मात्प्रवर्तते तेजसाप्रतिमोधीमानव्यक्तःसंप्रकाशकः सवैशरीरीप्रथमःस
वैपुरुषउच्यते ब्रह्माचभगवांस्तस्माच्चतुर्वक्त्रःप्रजापतिः संसिद्धिकार्यकरणेतथावैसमवर्तत एकएवमहादेव।
स्त्रिदैवत्यव्यवस्थितः अप्रतीपेनज्ञानेनऐश्वर्येणसमन्वितः धर्मेणाचाप्रतीपेनवैराग्येणचतेद्विजाः अव्यक्ताज्जायते
तेषांमनसायद्यदिच्छताम् वशीकृतत्वात्त्रैगुण्यात्सापेक्षत्वात्स्वभावतः चतुर्मुखस्तुब्रह्मत्वेकलनेचांतकःस्मृतः स
हस्रमूर्द्धापुरुषस्तिस्रोवस्थाःस्वयंभुवः ब्रह्मत्वेसृजतेलोकान्कालत्वेसंहरत्यपि पुरुषत्वेप्युदासीनस्तिस्रोवस्थाः
प्रजापतेः ब्रह्माकमलगर्भाभोरुद्रःकालाग्निसंनिभः पुरुषःपुंडरीकाक्षस्तस्यैवपरमात्मनः एकधासद्विधाचैववि

लिं॰ग॰
पु॰ग॰
९०

97

धात्वाच्चधातापुनः महेश्वरःशरीराणिकरोतिविकरोतिच नानाकृतिक्रियारूपोनानावृत्तिःस्वलीलया त्रिधायद्वर्ततेलो
केतस्मात्त्रिगुणउच्यते चतुर्द्धाचविभक्तत्वाच्चतुर्व्यूहःप्रकीर्तितः यदाप्नोतितदादत्तेयच्चात्तिविषयात्मनः यच्चास्यसत
तंभावात्तस्मादात्मानिरुच्यते ऋषिःसर्वगतत्वाच्चशरीरेष्वस्ययत्प्रभुः स्वामित्वमस्ययत्सर्वंविष्णुःसर्वप्रवेशनात् भग
वान्भगवद्भावान्निर्मलत्वात्सदाशिवः परमःसप्रकृष्टत्वादवनात्त्वोमितिस्मृतः सर्वज्ञःसर्वविज्ञानात्सर्वःसर्वमयोयतः
त्रिधाविभज्यचात्मानंत्रैलोक्येसंप्रवर्तते सृजतेग्रसतेचैववीक्षतेचत्रिभिःस्वयं आदित्वादादिदेवोसावजातत्वादजःस्मृ
तः पातियस्मात्प्रजाःसर्वाःप्रजापतिरितिस्मृतः देवेषुचमहादेवोमहादेवस्ततःस्मृतः सर्वेशत्वाच्चलोकानामवश्य
त्वात्तथेश्वरः बृहत्वाच्चस्मृतोब्रह्माभूतत्वाद्भूतउच्यते नोत्पादितःसपूर्वत्वात्स्वयंभूरितिसस्मृतः याज्यत्वादुच्यतेय
ज्ञःकविर्विक्रांतदर्शनात् क्रमणःक्रमणीयत्वात्पालकश्चाभिपालनात् आदित्यसंज्ञःकपिलस्त्वग्रजोग्निरितिस्मृतः
हिरण्यमस्यगर्भोभूत्हिरण्यस्यापिगर्भजः तस्माद्धिरण्यगर्भोसौपुराणेस्मिन्निरूप्यते तावच्छेषोस्यकालोन्यत्
तस्यांतेप्रतिसृज्यते कोटिकोटिसहस्राणिस्वहर्भूतानियानिवै समतीतानिकल्पानांतावच्छेषाःपरेहिये यश्चायंव
र्ततेकल्पोवाराहस्तन्निबोधत प्रथमेसांप्रतेतेषांकल्पोयंवर्ततेद्विजाः तस्मिन्स्वायंभुवाद्यास्तुमनवस्तेचतुर्दश प्र
तीतावर्तमानाश्चभविष्यायेचवैपुनः तैरियंपृथिवीसर्वासप्तद्वीपासपर्वता॥ पूर्णंयुगसहस्रंवैपरिपाल्यानरेश्व
रैः प्रजाभिस्तपसाचैवतेषांशृणुतविस्तरं मन्वंतरेणचैकेनसर्वाण्यंवंतराणिवै भविष्याणिभविष्यैश्चकल्पोक
ल्पेनचैवहि अतीतानितुकल्पानिसंप्रोक्तानिचतानिवै अनागतेषुतद्वच्चतर्कःकार्योविजानता आपोह्यग्रेसमभवत्
नष्टेस्थावरजंगमे तदासंभवतिब्रह्मासहस्राक्षःसहस्रपात् सहस्रशीर्षापुरुषोरुक्मवर्णस्त्वतींद्रियः ब्रह्मानारा

यगात्यमस्तस्तथापसलिलेतदा सलोदेकात्मवृहत्लशून्यलोकमदेतत इमंचोदाहरंत्यत्रश्लोकंनारायणंप्रति आपोनारा
तिप्रोक्ताइत्यपांनामशुश्रुम: आपर्ष्यताभिरनयेकृतवानात्मनोयत: अप्सुशेतेयततस्मात्तेननारायण:स्मृत: तत्संयुग
सहस्रस्यनैशंकालमुपास्यसः शर्वर्यतेप्रकुरुतेब्रह्मत्वंसर्गकारणात् ब्रह्मातसलिलेतस्मिन्विज्ञायांतर्गतांमहीं अनुमा
नादसंमूढोभूमेरुद्धरणंपुनः अकरोत्सतनूमन्याकल्पादिषुयथापुरा ततोमहात्मामनसादिव्यंरूपमचिंतयत् सलिले
विप्लुतांभूमिंदृष्ट्वासतसमंततः किंनुरूपमहंकृत्वाउद्धरेयमहीमिमां जलक्रीडासुसदृशंवाराहंरूपमस्मरन् अधृष्यंस
वेदभूतात्मनेवाङ्मयंब्रह्मसंज्ञितं पृथिव्युद्धरणार्थायप्रविवेशरसातलं अद्भिःसंछादितामुर्वींसकामांचप्रजापतिः
उपगम्योज्जहारैनामापस्ताःसर्गविन्यसत् समुद्रावैसमुद्रेषुनादीयासुनदीषुच रसातलतलेमग्नारसातलपुटेगतां
प्रभुर्लोकहितार्थायदंष्ट्रयाभ्युज्जहारतां ततःस्वस्थानमानीयपृथिवींपृथिवीधरः मुमोचधारयंस्त्वमनसाधारयित्वाधरा
धरां तस्योपरिजलौघस्यमहतीनौरिवास्थिता विततत्वाच्चदेहस्यनमहीयातिसंप्लवं ततःसमांक्षितिंदेवोजगतःस्था
पनेछया पृथिव्यांप्रविभागायमनश्चक्रेंबुजेक्षणः पृथिवींतुसमांकृत्वापृथिव्यांसोचिनोद्गिरीन् प्राक्सर्गेदह्यमाने
तुतदासंवर्तकाग्निना विशीर्णास्तेदह्यमानाःपर्वताभुविसर्वशः शैत्यादेकार्णवेतस्मिन्वायुनाथस्तुसंहताः निषि
क्तायत्रासंस्तत्रतत्राचलोभवत् स्कंदाचलत्वादचलाःपर्वभिःपर्वताःस्मृताः गिरयोभिनिगीर्णत्वाच्चयनाच्चशिलो
च्चयाः ततस्तेषुविशीर्णेषुलोकादाद्यगिरिष्विति विश्वकर्मातत्वभजत्कल्पादिषुपुनःपुनः ससमुद्रामिमांपृथ्वींस
मद्वीपांसपर्वतां भूराद्यांश्चतुरोलोकान्पुनःस्तुविविधाःप्रजाः ससर्जसृष्टिंतद्रूपांकल्पादिषुयथापुरा तस्याभिध्या
यतःसर्गंतदावैबुद्धिपूर्वकं प्रद्युम्नप्रधानकालोवैप्रादुर्भूतस्तमोमयः तमोमोहोमहामोहस्तामिस्रश्चांधसंज्ञितः अ
विद्यापंचपर्वैषाप्रादुर्भूतामहात्मनः पंचधावस्थितःसर्गोध्यायतःसोभिमानिनः संवृतस्तमसाचैवबीजांकुरवदा

लिं॰ पु॰ ५८

९८

वृतः बहिरंतश्चाप्रकाशस्तथा निःसंज्ञ एव च तस्मात्तेषां वृता बुद्धिर्दुःखानि करणानि च तस्मात्ते संवृतात्मानो नगमुख्याः
प्रकीर्तिताः मुख्यसर्गं तदा दृष्ट्वा ब्रह्मा सर्गं तथाविधं तस्याभिध्यायतोथान्यः सात्विकः समवर्तत ऊर्द्धस्रोतास्तृतीयस्तु स वै चो
र्द्धव्यवस्थितः तस्माद्व्यवर्ततोर्द्धं तदूर्द्धस्रोतास्ततः स्मृतः ते सुखप्रीतिबहुला बहिरंतश्च संवृताः प्रकाशा बहिरंतश्च ऊर्द्ध
स्रोतोभवाः स्मृताः ते तदूर्द्धस्रोतसो ज्ञेयास्तुष्टात्मानो बुधैः स्मृताः ऊर्द्धस्रोतास्तृतीयो वै देवसर्गस्तु स स्मृतः ऊर्द्धस्रोतः
सु सृष्टेषु देवेषु स तदा प्रभुः प्रीतिमानभवद्ब्रह्मा ततोन्यं सोभ्यमन्यत ससर्ज सर्गमन्यं च साधकं प्रभुरीश्वरः ततोभिध्या
यतस्तस्य सत्याभिध्यायिनस्तदा प्रादुर्बभौ तदाव्यक्तादर्वाक्स्रोतास्तु स स्मृतः यस्मादर्वाग्व्यवर्तंत ततोर्वाक्स्रोतसस्तु
वै ते च प्रकाशबहुलास्तमःस्पृष्टा रजोधिकाः तस्मात्ते दुःखबहुला भूयोभूयश्च कारिणः संवृता बहिरंतश्च मनुष्याः सा
धकास्तु ते लक्षणैस्तारकाद्यैश्च अष्टधा च व्यवस्थिताः सिद्धात्मानो मनुष्यास्ते गंधर्वाः सहधर्मिणः इत्येष तैजसः स
र्गो ह्यर्वाक्स्रोताः प्रकीर्तितः पंचमोनुग्रहः सर्गश्चतुर्द्धा संव्यवस्थितः विपर्ययेन शक्त्या च तुष्ट्या सिद्ध्या तथैव च
निवृत्तिं वर्तमानं च तेषां जानंति वै पुनः भूतादिकानां भूतानां षष्ठः सर्गः स उच्यते ते परिग्राहिणः सर्वे संविभागरताः पु
नः खादनाश्चाप्यशीलाश्च ज्ञेया भूतादिकाश्च ते विपर्ययेण भूतादेः शक्त्या च व्यवस्थिताः प्रथमो महतः सर्गो विज्ञे
यो ब्रह्मणस्तु सः तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते वैकारिकस्तृतीयस्तु सर्गो ह्यैंद्रियकः स्मृतः इत्येवं प्राकृ
तः सर्गः संभूतो बुद्धिपूर्वकः मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः तिर्यक्स्रोतास्ततः सर्गस्तिर्यग्योन्यः स
पंचमः ततोर्द्धस्रोतसः षष्ठो देवसर्गस्तु स स्मृतः ततोर्वाक्स्रोतसां सर्गः सप्तमः स तु मानुषः अष्टमोनुग्रहः सर्गः सा
त्विकस्तामसः स्मृतः पंचैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः प्राकृता
स्तु त्रयः सर्गाः प्रवृत्ता बुद्धिपूर्वकाः बुद्धिपूर्वं प्रवर्तंते षट्स्रोतो ब्रह्मणस्तु ते विस्तारानुग्रहं सर्गं कीर्त्यमानं निबोधत

वेतुर्थ्यावस्थितःसोयंसर्वभूतेषुकृत्स्नशः इत्येतेप्राकृताश्चैववैकृताश्चततःस्मृताः सर्गाःपरस्परस्येहकारणात्तेषुवैस्मृताः
अग्रेससर्जवैब्रह्मामानसानात्मनःसुतान् सनंदंसनकंचैवविद्वांसंचसनातनं विज्ञानेननिवृत्तास्तेनिवर्तितेमहौजसः
संबुद्धाश्चैवनानातेप्रप्रवृत्तास्तयोपिते असृष्ट्वैवप्रजासर्गंप्रतिसर्गंगताःपुनः ततस्तेषुव्यतीतेषुततोन्यान्साधकान्सुता
न् मानसानसृजद्ब्रह्मापुनःस्थानाभिमानिनः प्राकृताःसंभवान्स्थानाह्वदतस्तन्निबोधत आपोग्निपृथिवीवायुमंत
रिक्षंदिवंतथा ससमुद्रान्नदीश्चैवतथाशैलवनस्पतीन् ओषधीनांतथात्मानोह्यात्मनोवृक्षवीरुधां कलाकाष्ठालवा
श्चैवमुहूर्तान्यपिराम्यहान् अर्द्धमासांश्चमासांश्चअयुतान्ययुतानिच स्थानाभिमानिनःसर्वेस्थानाख्याश्चैवतेस्मृताः
देवान्षीश्चमहत्तायैरियंवृर्द्धितामही मरीचिंभृत्वंगिरसंपुलस्त्यंपुलहंक्रतुं दक्षमत्रिंवसिष्ठंचसोसृजज्ज्ञानविद्यया
नवब्रह्माणइत्येतेपुराणेनिश्चयंगताः तेषांब्रह्मात्मकानांवैसर्वेषांब्रह्मवादिनां ततोसृजच्चसंकल्पंधर्मंभूतेसमावाव
ह सोसृजद्व्यवसायंतधर्मंदेवोमहेश्वरः संकल्पंचैवसंकल्पात्सर्वलोकपितामहः मानसःसरुचिर्नामविजज्ञेब्रह्मणः
प्रभोः प्राणाद्ब्रह्मासृजद्दक्षंचक्षुर्भ्यांचमरीचिनं भृगुश्चहृदयाज्जज्ञेऋषिःसलिलजन्मनः शिरसोंगिरसंचैवश्रोत्रा
दत्रिंतथैवच पुलस्त्यंचतथोदानात्व्यानाच्चपुलहंपुनः समानजोवसिष्ठश्चअपानान्निर्ममेक्रतुं जगतस्तुष्टयेसृ
ष्टानेवैतेब्रह्मवादिनः धर्मःप्रवर्तितस्तैश्चपुराणेर्हमेधिभिः क्रियावंतोप्रजावंतोमहर्षिभिरलंकृताः ऋभुःसन
त्कुमारश्चद्वावेतावूर्द्धरेतसौ सर्वोत्पन्नौपुराणेभ्यःसर्वेषामपिपूर्वजौ तावुभौमानसधर्माणावारोप्यात्मानमात्मनि
प्रजाधर्मंचकामंचत्यक्त्वावैराग्यमास्थितौ यथोत्पन्नःसएवेहकुमारःसइहोच्यते तस्मात्सनत्कुमारेतिनामास्येह
प्रतिष्ठितं ततोभिध्यायतस्तस्यजज्ञिरेमानसीःप्रजाः तच्छरीरसमुत्पन्नैःकार्यैस्तैःकारणैःसह क्षेत्रज्ञाःसमवर्तंत
गात्रेभ्यस्तस्यधीमतः ततोदेवासुरपितृन्मानुषांश्चचतुष्टयं सिसृक्षुरंभस्येतानिस्वमात्मानमयूयुजत् युक्तात्मनः

लिं॰ग॰
पु॰वा॰
९९

99

ततस्तस्यतमोमात्रसमुद्भूतं तमभिध्यायतःसर्गःप्रयत्नोभूत्प्रजायतेः ततोस्यजघनात्पूर्वमसुराजज्ञिरेसुताः असुःप्राणः
स्मृतोविप्रैस्तज्जन्मानस्ततोसुराः ययासृष्टाःसुरास्तन्वा स्तांतनुंसोप्यपोहत सापविद्धा तनुस्तेनसद्योरात्रिरजायत सा
तमोबहुलायस्मात्ततोरात्रिस्त्रियात्मिका आवृतास्तमसारात्रौप्रजास्तस्मात्स्वयंततः दृष्ट्वासुरांस्ततोसौवैतनुमन्यमगृ
ह्णात अव्यक्तांसत्वबहुलांततस्तांसोभ्ययुंजत ततस्तांयुंजतस्तस्यप्रियमासीत्प्रभोःकिल ततोस्यवक्त्रात्समुत्पन्नादी
व्यतस्तस्यदेवताः देवान्सृष्ट्वाथदेवेशस्तनुमन्यांप्रपद्यत उत्सृष्टासातनुस्तेनसद्योहःसमजायत तस्मादहोधर्मयुक्ता
देवताःसमुपासते सत्वमात्रात्मिकामेवततोन्यांसोभ्यपद्यत पितृवन्मन्यमानस्तांपुत्रांश्चध्यायतःप्रभुः पितरोभ्यप
क्षाणांरात्र्यह्नोरंतरेसृजत् तस्मात्तेपितरोदेवाःपितृत्वंतेषुतेनतत् ययासृष्टास्तुपितरस्तनुस्तांसव्यपोहत सापवि
द्धातनुस्तेनसद्यःसंध्याव्यजायत तस्मादहस्तुदेवानांरात्रिर्यासासुरीस्मृता तयोर्मध्येतुवैपैत्रीयातनुःसातुगरीयसी।
यस्माद्देवाःसुरासर्वेऋषयोमानवास्तथा उपासतेसदायुक्तारात्र्यह्नोर्मध्यमांतनुं ततोन्यांपुनर्ब्रह्मातनुंवैसमगृ
ह्णत रजोमात्रात्मिकायांतुमनसःसोसृजत्प्रभुः रजःप्रजांस्ततोसोथमानसानसृजत्सुतान् मानसान्सृजता
स्तस्यप्रजानांजज्ञिरेसुताः दृष्ट्वापुनःप्रजाश्चापिस्वांतनुंतामपोहत सापविद्धाततस्तेनज्योत्स्नासद्यस्त्वजायत तस्मा
द्भवंतिसंहृष्टाज्योत्स्नायामुद्भवेप्रजाः इत्येतास्तनवस्तेनह्यपविद्धामहात्मना सद्योरात्र्यहनीचैवसंध्याज्योत्स्नाचज
ज्ञिरे ज्योत्स्नासंध्याअहश्चैवसत्वमात्रात्मकंत्रयं तमोमात्रात्मिकारात्रिःसावैतस्मात्त्रियामिका तस्माद्देवादिकाल
न्वा```हाःसृष्टामुखात्तुवै यस्मात्तेषांदिवाजन्मबलिनस्तेनतेदिवा तन्वापयासुरान्रात्रौजघनादसृजत्प्रभुः प्राणि
भ्योसविजन्मानोह्यजय्यानिशितेनते एतान्येवभविष्याणांदेवानामसुरैःसह पितॄणांमानवानांचअतीतानागतेषुवै
मन्वंतरेषुसर्वेषुनिमित्तानिभवंतिहि ज्योत्स्नारात्र्यहनीसंध्याचत्वारिभासितानिवै भांतियस्मात्ततोभांसिभाशब्दोयं

मनीषिभिः भाविर्भूतो निगदितः पुनश्चायं प्रजापतिः सोभांस्येतानि सृष्ट्वा तु देवमानुषदानवान् पितॄंश्चैवासृजत्सोन्याना
त्मनो विविधा पुनः तामसत्त्यजतु ज्योत्स्नां ततोन्यां प्राप्य स प्रभुः मूर्तिं तमोरजःप्रायां पुनरेवाभ्ययुयुजत् अंधकारेक्षु
धाविष्टांस्ततोन्यान्सोसृजत्प्रभुः तेन सृष्टाः स्वयात्मानो ह्यंभांस्यादातुमुद्यताः अंभांस्येतानि रक्षाम उक्तवंतस्तु ते भवे
येवात्समाः स्मृतास्तस्मात्त्वथात्मानो निशाचराः ते ब्रुवन्रक्षसंभोसि नेषां हृष्टाः परस्परं तेन ते कर्मणा यज्ञा गुह्यकाः
क्रूरकर्मिणः रक्षेति पालने चापि धातुरेष विभाव्यते एवं जनपतिर्धातुर्भक्षणे समनिरूप्यते तान्दृष्ट्वा त्वप्रियेणास्य के
शाः शीर्णाः स्वधीमतः ते शीर्णाः स्वोच्छ्रिता ऊर्ध्वं न तत्रारूरुहुः प्रभो हीनास्तांश्चिरसो वालाय स्माच्चैवापसर्पिणः वालात्मा
नः स्मृता व्याला हीनत्वादहयः स्मृताः पतनात्पन्नगाश्चैव सर्पाश्चैवापसर्पणात् तस्य क्रोधोद्भवो भावो वह्निगर्भः सुदारु
णः स तत्सर्पान्सहोत्पन्नानाविवेश विषात्मकान् सर्पान्सृष्ट्वा ततः क्रुद्धः क्रोधात्मानो विनिर्ममे वर्णेन कपिशेनोग्रास्ते भू
ताः पिशिताशनाः भूतत्वात्ते स्मृता भूताः पिशाचाः पिशिताशनाः ध्यायतो गायतस्तस्य गंधर्वा जज्ञिरे तदा धयतीत्येष धा
तुर्वै पानार्थे परिपठ्यते पिबंतो जज्ञिरे वाचं गंधर्वास्तेन ते स्मृताः अष्टास्वेतासु सृष्टासु देवयोनिषु स प्रभुः ततः स्वच्छंदतो
न्यानि वयांसि वयसोसृजत् स्वच्छंदतस्तानि छंदांसि वयसो हि वयांसि च गावश्चैवोदराद्ब्रह्मा पार्श्वाभ्यां च विनिर्ममे पद्भ्यां
मश्वान्समातंगान् रासभान्गवयान्मृगान् उष्ट्रानश्वतरांश्चैव न्यंकूनन्याश्च जातयः औषध्यः फलमूलिन्यो रोमभ्यस्तस्य
जज्ञिरे एवं पश्वौषधीः सृष्ट्वा त्वयुजत्सोध्वरे प्रभुः गौरजः पुरुषः मेषोश्वोश्वतरगर्दभौ एतान्ग्राम्यान्पशूनाहुरा
रण्यान्मे निबोधत श्वापदं द्विपदं हस्ती वानराः पक्षिपंचमाः औदकाः पशवः सृष्टाः सप्तमस्तु सरीसृपाः महिषा गवयः
ऋक्षप्लवंगाः शरभा वृकाः सिंहस्तु सप्तमो ह्येषामारण्याः पशवः स्मृताः गायत्रीं च ऋचश्चैव त्रिवृत्साम रथंतरं अग्निष्टो
मं च यज्ञानां निर्ममे प्रथमान्मुखात् यजूंषि त्रिष्टुभं छंदः स्तोमं पंचदशं तथा बृहत्साम तथो··· दक्षिणादसृजन्मुखा

लि॰ ग॰
पु॰ रा॰
१००

100

त विष्णुनाशनिमेवांश्चरोहितेदथन्नेषिव वयांसिचससर्जादौ कल्पस्य भगवान्प्रभुः उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञि
रे ब्रह्मणस्तु प्रजाः सर्गं सृजतो हि प्रजापतेः सृष्ट्वा चतुष्टयं सर्वं देवासुरपितॄन्प्रजाः ततोऽसृजत्स भूतानि स्थावराणि चराणि
च यक्षान्पिशाचान्गंधर्वांस्तथैवाप्सरसांगणान् नरकिन्नररक्षांसि वयःपशुसरीसृपान् अव्ययं च व्ययं चैव यदिदं स्थाणु
जंगमं तेषां ये यानि कर्माणि प्राक्सृष्ट्या प्रतिपेदिरे तान्येव प्रतिपद्यंते सृज्यमानाः पुनः पुनः हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृ
ते तद्भाविताः प्रपद्यंते तस्मात्तत्तस्य रोचते महाभूतेषु नानात्वमिंद्रियार्थेषु मूर्तिषु विनियोगं च भूतानां धातैव व्यदधात्स्व
यं केचित्पुरुषकारं तु प्राहुः कर्म च मानवाः दैवमित्यपरे विप्राः स्वभावं पूर्वचिंतकाः पौरुषं कर्म दैवं च फलवृत्तिः स्वभावतः
न चैकं न पृथग्भावमधिकं न ततो विदुः एतदेकं न चैकं च नोभे चैकं तथापि तूभे कर्मस्था विषयं ब्रूयुः सत्वस्थाः समदर्शिनः
नामरूपं च भूतानां कृत्यानां च प्रपंचनं वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः ऋषीणां नामधेयानि याश्च देवेषु दृष्टयः
शर्वर्यंते प्रसूतानां तान्येवेभ्यो ददाति सः एवंविधाः सृष्टयस्तु ब्रह्मणोऽव्यक्तजन्मनः शर्वर्यंते प्रपद्यंते सिद्धिमाश्रित्य मानसी
एवं भूतानि सृष्टानि स्थावराणि चराणि च यदास्य ताः प्रजाः सृष्टा न वर्द्धंते स्य धीमतः तमोमात्रावृतो ब्रह्मा तदासावतिदुः
खितः ततः स विदधे बुद्धिमर्थनिश्चयगामिनीं अथात्मनि तदाद्राक्षीत् तमोमात्रां नियामिकां रजःसत्वं परित्यज्य वर्तमानां
स्वभावतः ततः स तेन दुःखेन दुःखं चक्रे प्रजापतिः तमश्चाप्यनुदत्पश्चाद्रजसा तच्च समावृणोत् तत्तमः प्रतिनुन्नं वै मिथुनं स
मजायत अधर्मस्तमसो जज्ञे हिंसा शोकाद्व्यजायत ततस्तस्मिन्समुद्भूते मिथुने दारुणात्मिके गतासुर्भगवानासीत्प्रीति
श्चैनमशिश्रियत् स्वां तनुं स ततो ब्रह्मा तामपोहत भास्वरां द्विधाकरोत्स तं देहमर्द्धेन पुरुषोऽभवत् अर्द्धेन नारी सा तस्य श
तरूपा व्यजायत प्रकृतिं भूतधात्रीं तां कामाद्वै सृष्टवान्प्रभुः सा दिवं पृथिवीं चैव महिम्ना व्याप्य धिष्ठिता। धात्रं हि देहः सम
तो नारी शतरूपा व्यजायत सा देवी नियुतं तप्त्वा तपः परमदुश्चरं भर्तारं दीप्तयशसं पुरुषं प्रत्यपद्यत स वै स्वायंभुवः पूर्वं

देवगणम् कालीनदा कालनिशाप्रकाशं शूलं कपालाभरणा करेण प्रकम्पयंतीव तदा सुरेंद्रान्महासुरास्त्रस्तवपुःप्रमत्ता
मत्तेभगामी मधुलोलनेत्रा मत्तैः पिशाचैश्च गणैश्च मत्तैः मत्तेभवान्नाम्बरवेष्टितांगी ययौ पुरस्ताच्च गणेश्वरस्य तां सिंहगां
पर्वे पिशा वयता विधायपराहीं द्रस्वरेंद्रमुख्याः प्रणेमुरुद्रैरभितष्टुवुश्च जयेति देवीं हिमशैलपुत्रीं मानरंस्वरवरारिसूदनाः
मातृरंस्वरगणैः मदजिताः कालिकायपुरःप्रयानुवाहनैः स्वैर्गणैर्ध्वजबलैः समंततः उग्रोग्रघंटागणपादुशषि गारोदंड दं
दैः शिवाविभागं जगा शूलपाशुपरशुंचक्रासिशंखायुधं प्रोच्चादित्यसहस्रवह्निसदृशं नेत्रैर्दहंती ययौ बालाबाल
कुष्पापरा भगवती देवदानवप्रहर्षे ययौ तदेवमीशं त्रिपुरं निहंतुं तदा तदेवं द्रविप्रकाशः गजैर्हयैः सिंहवनैः रथैश्च वृषैर्ययौ पु
रंगणराजमुख्याः हलैश्च शूलैर्मुसलैश्च पाशैर्गिरींद्रकूटैर्गिरिसन्निभास्ते ययुः पुरस्ताद्धि महेश्वरस्य उपेंद्रपद्मयोनवाविशुश्चमु
ख्याः जयेति वाग्भिर्भगवंतमूचुः किरीटदंताजलयः समेताः नृत्यंति नेयः सर्वे दंडहस्ताः स्फुरज्जटाः ववर्षुः पुष्पवर्षाणि
दिव्यानि महद्वारणाः पुरत्रये घप्रविप्रेंद्राः सर्वे प्रविनाणौः सह गणेश्वरैर्देवगणैश्च भृंगी समाहतः सर्वगणेंद्रवर्यः जगाम
वेगात्त्रिपुरं निहंतुं विमानमारुह्य यथा महेंद्रः केशो विगतवासाश्च महाकेशो महाकरः सोमवल्लीसवर्णश्च सोमपः सन
कस्तथा सोमधृक्सूर्यवर्चाश्च सूर्यप्रेषणकस्तथा सूर्याक्षः सूरिनामा च सुरः संदरः प्रवणप्रकंदः कुंडदंतश्च कंपनश्च प्रकं
पनः इंद्रश्चेंद्रजवश्चैव यमद्राभीर्निमेषकस्तथा शतान्तश्चैव पंचालः सहस्रानोमहोदरः यमजिह्वः शतानश्च कठनाकंठ
कालदनः द्विशिरश्चिशिरश्चैव तथा पंचशिखो द्विजः सहंडोर्ध्वमहंडो दीर्घः पिशाचास्यः पिनाकधृक् पिप्पलायतनश्चैव
तथांगारकाशनः शिथिलः शिथिलास्यश्च अक्षपादोऽजकुंजलः अजवक्रो हयवक्रो गजवक्रोऽर्धवक्त्रकः इत्याद्या

परीवार्यैरालतलतणावर्जिताः हंदशलक्षसाहस्रजग्मुः सोमगणोहिताः सहस्राणांसहस्राणिरुद्राणामूर्ध्वरेतसां समावृत्य
लिं महादेवं देवदेवमहेश्वरं दग्धुंपुरत्रयंजग्मुः कोटिकोटिगणैर्हिताः त्रियस्त्रिंशत्सहस्रंचैवत्रयस्त्रिदशाः तथा त्रयस्त्रिंशत्सहस्रा
गपु. णिजग्मुर्देवाः समंततः मातरः सर्वलोकानांगणानांचैवमातरः भूतानांमातरश्चैवजग्मुर्देवस्यपृष्ठतः भातिमध्येगणानांच
९८ रथमध्येगणेश्वरः नभस्यमलनक्षत्रेताराणामध्येध्रुवोयथा रराजदेवीदेवस्यगिरिजापार्श्वसंस्थिता तदाप्रभावतीगौरीभवस्ये
वजगन्मयी प्रभावतीतदादेवीपार्श्वसंस्थाविभाविता चामराग्रकरहस्ताग्रागृहीतांबुजचक्रिका अथविमानविभोर्विष्टरंवपुर्दे
101 सितभासितमंबिकयातदा सितमिवाभ्रमहोसितविद्युतानभसिदेवपतेपरमेष्ठिनः भातींदुप्रभ्रुघाकामंमेरुणाचयथाज
गत् हिरण्यपत्रपात्रोसौम्यवपुः शंभोः शशिद्युति सितातपत्ररत्नांशुनिर्मलंपरमेष्ठिनः यथारथोशशांकस्यविभात्येवोडुमंड
ले मटुरस्थूलाणिवेशकालेविनाभातिमालिका ब्रवत्रांतरांतराकाशान्यंतेनीवसविह्वरा अथमहेंद्रविरिंचशिवावसप्रभृतिभि
र्नतपापहरोहरः सहतदापिजगामतयाविभुः सकललोकहितायपुरत्रयम् दग्धुंसमर्थोमनसातदाणानचराचरंसर्वसिद्धं
त्रिशूली किमत्रदग्धुंत्रिपुरंपिनाकीस्वयंगतस्तत्रगणेश्वसार्थं रथेनकिंविग्रहशरेणातस्यगणेशकिंदेवगणेश्वशंभोः पुर
त्रयंदग्धुमलमणकेः किमेतदरिन्याद्गरजेंद्रमुख्याः मन्येचतूनंभगवान्पिनाकीलीलार्थमेतत्सकलंप्रकर्त्तुं व्यवस्थितस्त्वेतिन
वाम्यथावेदाद्वेरेणास्यफलेकिमन्यत् पुरत्रयस्यास्यसमीपवर्तीसुरेश्वरेनंदिमुखेश्वनंदी गणेगिणेशेश्वरराजदेवाजग
द्रघोमेरुगिरवाघशृंगैः अथनिरीक्ष्यसुरेश्वरमीश्वरंसुगणामद्रिसुतासहितंतदा त्रिपुरंगतलोपरिसंस्थितंसुरगणानुजगा
दजयंतथा जगत्त्रयंसर्वमिवापरंतत्पुरत्रयंतत्रविभातिसम्यक् नरेश्वरेरेवगणेश्वदेवैः सुरेतरेश्वत्रिविधेश्चनीतेः अथस ९८

ॐ पतुह्मनाघ्रार्वः सेधायतंशारं मुक्तापाशुपतास्त्रेण त्रिपुरं समचिंतयत् तस्मिंस्थिते महारुद्रे देवे वितनकार्मुके पुराणि तेन का
लेन जग्मुरेकत्वमाशु वै एकीभावं गते चैव त्रिपुरं समुपागते बभूव तमुलो हर्षो देवतानां महात्मनां ततो देवगणाः सर्वे सिद्धा
श्च परमर्षयः जयेति वाचो मुमुचुः संस्तुवंतोऽष्टमूर्तिनं अथाह भगवान् ब्रह्मा लालग्रेस्तु भत्रे हे प्रीते पुष्ययोगेपि संग्रामे लीला
लवस्तुमापतिं स्थानेत्व महादेव वैश्यंहि परेश्वर सर्वदेवाश्च देवाश्च समामस्तवयतः प्रभोः यथाहि देवाधर्मिष्ठाः सर्वदेवाश्च
पापिनः यतस्तस्माज्जगन्माय लीलात्मकमिहार्हसि किंरघेन ध्वजिनेरुत्तव दग्धुं पुरत्रयं रथुणाभूतसंघैश्च विस्मनाचमया
प्रभो पुष्ययोगे त्वग्रामे पुरं दग्धुमिहार्हसि यावन्नयाति देवेश वियोगं वपुराणि वै अथ देवो महादेवः सर्वज्ञस्तद्दैवतत
पुरत्रयं विरूपाक्षस्तत्क्षणाद्दवदेत्क्कतम सोमश्च भगवान् विष्णुः कालाग्निर्वायुरेव च शरे व्यवस्थिताः सर्वे देवमूचुः प्रणम्य
ते दग्धमप्यद्य देवेश वीतशोकेन पुरत्रयं अत्र त्रयार्थे देवेश शरं मोक्तुमिहार्हसि अथ संपूज्य धनुषा ज्याहसं त्रिपुरार्दनः
मुमोच वाणं विप्रेंद्रा व्याकृष्याकर्णमीश्वरः तत्क्षणात्त्रिपुरं दग्ध्वा त्रिपुरांतकराः शराः देवदेवं समासामाय नमस्कृत्वाथ व
स्थितः दैत्यपुरत्रयं दग्धुं दैत्यकोटिशतैर्वृतं रथुणा तेन कल्पांते रुद्रेणैव जगत्त्रये ये पूजयंति तत्रापि देत्याः रुद्रं सर्वाथवाः
गणाः पंचतदा शंभोः यस्तुः पूजाविधेर्बलात् न किंचिदभवन्देवाः सेंद्रोपेंद्रा गणेश्वराः भवानीं तां निरीक्ष्यैव देवीं हिमवा
ता सुतां च दृष्ट्वा भीमं तदा नंदी देवानां देवपुंगवः किंचित्माहननदादेवान्मेणप्रस्तैः समंततः ववंदिरे नंदिनमिंदुभूषणां ववा
दिरे पर्वतराजसंभवा ववंदिरे चापि शिवासुतं प्रभुं ववंदिरे भूतगणा महेश्वरं तुष्टाव मुदितो ब्रह्मा देवैः सह समाहितः वि
स्त्रनाथ भवं देवं त्रिपुरारातिमीश्वरं पितामह उवाच प्रसीद देवदेवेश प्रसीद परमेश्वर प्रसीद जगतांनाथ प्रसीदानंददायि

लिं· गपु· १०२ च पंचास्यरुद्ररूपायपंचाशत्कोटिमूर्तये अनंतेशप्रतिष्ठायविद्यातत्त्वायतेनमः शिवायशिवतत्त्वायअघोरायनमोनमः
अघोराष्टकतत्त्वायद्वादशात्मस्वरूपिणे ब्रह्मकारंसमाहृत्यसंस्थितायस्वशक्तिभिः अनिर्देश्यायनित्यायविद्युज्ज्वलयरूपि
णे विद्युत्कोटिप्रतीकाशमष्टकोणंसुशोभनं रूपमास्थायलोकेस्मिन्संस्थितायमहात्मने अग्निवर्णायदेवायअविकार्य·
शरीरिणे धवलश्यामरक्तानांमुक्तिवसामरायच ज्येष्ठायरुद्ररूपायसोमायवरदायच त्रिलोकायत्रिदेवायवह्नाकारायवै
नमः मध्येगगनरूपायगगनस्थायतेनमः अष्टक्षेत्रायविरूपायअष्टतत्त्वायतेनमः चतुर्धाचचतुर्धायचचतुर्धासंस्थितायच
१०२ पंचधापंचधाचैवपंचमंत्रशरीरिणे चतुः षष्टिप्रकारायअकारायनमोनमः द्वात्रिंशत्तत्त्वरूपायओंकारायनमोनमः षोड
शात्मस्वरूपायउकारायनमोनमः अष्टतत्त्वात्मरूपायमकारायनमोनमः ओंकारायनमस्तुभ्यंचतुर्धासंस्थितायच गगने
शायदेवायसर्वगेशायनमोनमः सत्यलोकायपातालनरकेशायवैनमः सहस्रपादयुक्तायशर्वायपरमेष्ठिने नवात्मनः
तत्त्वरूपायनवाष्टात्मात्मशक्तये पुनरष्टप्रकाशायतथाष्टाष्टकमूर्तये चतुःषष्ट्यात्मतत्त्वायपुनरष्टविधायते गुणाष्टक
वृतायैवगुणिनेनिर्गुणायते मूलस्थायनमस्तुभ्यंशाश्वतस्थानवासिने नाभिमंडलसंस्थायहृदिनिःस्वनकारिणे कं·
ठरंध्रस्थितायैवतालरंध्रस्थितायच भ्रूमध्येचस्थितायैवनादमध्येस्थितायच चंद्रबिंबस्थितायैवशिवायशिवरूपिणे व
ह्निसोमार्करूपायषट्त्रिंशच्छक्तिरूपिणे सदाशिवायशांतायमहेशायपिनाकिने सर्वज्ञायशरण्यायसद्योजातायवैनमः
अघोरायनमस्तुभ्यंवामदेवायतेनमः तत्पुरुषायनमस्तुभ्यंईशानायनमोनमः नमस्त्रिंशत्प्रकाशायशांतातीतायतेन १०२
मः अनंतेशायसूक्ष्मायउत्तमायनमोस्तुते एकाक्षायनमोस्तुभ्यमेकरुद्रायतेनमः नमस्त्रिमूर्तयेतुभ्यंश्रीकंठायशिखंडिने

अनंतासनसंस्थायअनंतायांतकारिणे विमलायविशालायविमलाङ्गायतेनमः विमलासनसंस्थायविमलार्थार्थ
रूपिणे योगपीठांतरस्थाययोगिनेयोगदायिने योगिनांयोगसंस्थाययोगगम्यायतेनमः प्रत्याहारायतेनित्यंप्रत्याहारर
तायते प्रत्याहाररतानांतप्रतिष्ठानास्थितायच धारणायनमस्तुभ्यंधारणाभिरतायते धारणाभ्यासयुक्तानांपुरस्थात्संस्थि
तायच ध्यानायध्यानरूपायध्यानगम्यायतेनमः ध्येयाययोगगम्यायध्येयाध्येयायतेनमः ध्येयानामपिध्येयायनमोध्ये
यतमायते समाधानाभिगम्यायसमाधानायतेनमः समाधानरतानांतनिर्विकल्पार्थरूपिणे दग्धोद्धतेसर्वमिदंतयाप्य
जगत्त्रयेरुद्रपुरत्रयंहिकः सोतुमिच्छेत्कथमीदृशंत्वांनमोहिरुण्यायशिवायतुभ्यं त्यामवत्पादमदर्शनात्वमत्सोत्रमर्त्या
पुपिदेवदेवाः पतेगणाः सिद्धगणाः प्रणामंकुर्वंतिदेवपुरारेणशातुभ्यं निरीक्षणादेवविभोत्वयेदंपुरत्रयंदग्धमहोजगद्ध
लीलालेसेनाविकयात्वतोनदग्धंकिलेनत्वनथापिमुक्तं त्वतोरथस्वेभुवस्स्वसुदंप्रणाशनेनेत्रिपुरत्वयाय अनेकयत्नेकव
मयाहतभ्यंफलेनदृष्टंस्मरसिद्धसंघैः रथोरथीदेववरोरथस्थरुद्रः स्वयंशक्रपितामहोच त्वमेवसर्वंभगवान्कथंतुस्तोष्य
वतोहप्रणिपत्यमूर्धा त्वमष्टमूर्तिस्त्वमनेकमूर्तिस्त्वमिष्टदंसर्वसुरासुराणां अभीष्टदृष्टस्वविमर्दनस्वस्तोष्येतुहोप्यकथ
मीदृशंत्वांनमोनमः सर्वविदेशिवायरुद्रायशर्वायभवायतुभ्यं स्थूलायसूक्ष्मायचसूक्ष्मसूक्ष्मसूक्ष्मायसूक्ष्मार्थविदेविधा
त्रे नमोस्तुनमः सर्वसुरासुराणांभर्त्रेप्रथत्रेजगतांविधात्रे नेत्रेसुराणामसुरेश्वराणांहर्त्रेप्रशास्त्रेसमसर्वशास्त्रे वेदांतविद्या
यस्तुनिर्मलायवेदार्थविद्भिःशतसंस्तुताय वेदात्मरूपायभवायतुभ्यंमंत्रायमंत्रार्थसमर्पणाय आद्यंतशून्यायचसंस्तुता
यतथ्यातत्स्वरूपायचलिंगिनेच त्रिलिंगिनेलिंगसमायतुभ्यंलिंगायवेदायमयायसाक्षात् रुद्रायसूर्यायचनर्तनायसमाध्य

लिं.
गपु.
९२

१०३

वशायच यत्तन्मूर्तं दृष्ट्वैवभूमौ करजाग्रकोट्याग्रहोविविर्त्रैन वदेवचेष्टितं विभातिवैसर्वसुरासुरेशादेहीवदेवैः सहदेवकार्यमु-
कार्यमनेनैवसुरासुरेशाकरिष्यसे निर्गुणाद्रूपतन्न एकंस्थूलंसूक्ष्ममेकं सुसूक्ष्मंमूर्तामूर्तंमूर्तमेकं ह्यमूर्तं एवंदृष्ट्वाद्भुतंचैव
निवेदयेत् भवाय देवदेवाय शर्वाय परमेष्ठिने स याति मुनिशार्दूल वाह्नेयं लोकमुत्तमं भुक्त्वा स विपुलान्भोगान्सोऽत्रैव समहीय

ते माघमासेतु संपूज्य यः कुर्यान्नक्तभोजनं हृमसं च घृतसंयुक्तं भुंजानः संयतेंद्रियः सोपवासस्तु तद्दर्शं पापाभवेद्भयपत्तयोः रुद्राय
पौर्णमास्यां तु दद्याद्धि घृतकंबलं क्रमसं गोमिथुनं दद्यात्पूजयेच्च वशंकरं भोजयेद्ब्राह्मणांश्चैव यथाविभवविस्तरं सोमस्यासाद्य वै
लोकं सोमेन सह मोदते फाल्गुणे चैव संप्राप्ते कुर्याद्दिनक्तभोजनं श्यामाकान्नं घृतं क्षीरैर्वर्जितक्रोधो जितेंद्रियः तत्र दर्शे पापामथा
ष्टम्यां तु उपवासं च कारयेत् पौर्णमास्यां महादेवं स्नाप्य संपूज्य शंकरं दद्याद्गोमिथुनं चापि तिलांश्चाभ शूलपाणये ब्राह्मणान्भोजयित्वा
तु प्रार्थयेत्परमेश्वरं सयाति चंद्रसायुज्यं नात्र कार्या विचारणा चैत्रे पितृद्रुमम्भ्यर्च्य कुर्याद्दिनक्तभोजनं शाल्यन्नं पयसायुक्तं घृतेन
च यथाशक्ति गोष्ठशायी मुनिश्रेष्ठाः तिस्रो निशि भवं स्मरेत् पौर्णमास्यां शिवं स्नाप्य दद्याद्गोमिथुनं सितं ब्राह्मणान्भोजयेच्चैव ते
रं तं स्थानमाप्नुयात् वैशाखे च तथा मासे कृत्वा चैव नक्तभोजनं पौर्णमास्यां भवं स्नाप्य पंचगव्यघृतादिभिः श्वेतं गोमिथुनं दत्त्वा सो
श्वमेधफलं लभेत् ज्येष्ठमासे च देवेशं भवशर्वमुमापतिं संपूज्य श्रद्धया भक्त्या कृत्वा चैव नक्तभोजनं रक्तशाल्यन्नमधाच्च श्राद्धैः पू
तं घृतादिभिः वीरासनी निशार्धं च गवां शुश्रूषणे रतः पौर्णमास्यां तु संपूज्य आदिदेवमुमापतिं स्नाप्य शक्त्या यथान्यायं वृषं द
याच्च शूलिने ब्राह्मणान्भोजयित्वा च यथाविभवविस्तरं शुभ्रं गोमिथुनं दत्त्वा वायुलोके महीयते आषाढे मासि चाप्येवं नक्तभो
जनं नरः भ्रीरविंडाभिः समिश्रं सक्तुभिश्चैव गोरसं पौर्णमास्यां घृतनीयैस्तु स्नाप्य पूज्य यथाविधि ब्राह्मणान्भोजयित्वा च श्रोत्रि
या वेदपारगान् दद्याद्गोमिथुनं गौरं वारुणं लोकमाप्नुयात् श्रावणे वाद्धिनामासे कृत्वा चैव नक्तभोजनं क्षीरषाष्टिकभक्तेन संपूज्य
ज्य वृषभध्वजं पौर्णमास्यां घृतनीयैस्तु स्नाप्य पूज्य यथाविधि ब्राह्मणान्भोजयित्वा च श्रोत्रियान्वेदपारगान् श्वेताग्रपादं पौंड्रं च ११२
दद्याद्गोमिथुनं पुनः सयाति वायुसायुज्यं वायुवत्सर्वगो भवेत् प्राप्ते भाद्रपदे मासि कृत्वैवं नक्तभोजनं हुतशेषं च विप्रेंद्रान्व

117

मृत्ताश्रितोदिवा पौर्णमास्यां तदेवेशं स्नाप्य संपूज्य शंकरं नीलस्कंदं वृषं गां च दत्त्वा भक्त्या यथाविधि ब्राह्मणान्भोजयित्वा
वेदवेदांगपारगान् यत्तल्लोकमनुप्राप्य यत्ताजो भवेन्नरः नक्तस्त्वाषाढ्युजे मासि कृत्वैवं नक्तभोजनं सचन्नं शंकरं पूज्य
पौर्णमास्यां च पूर्ववत् ब्राह्मणान्भोजयित्वा तु शिवभक्तान्सदाशुचीन् वृषभं नीलवर्णाभं सुरोदेशे समुन्नतं गां च दत्त्वा य
थान्यायं मैशानं लोकमाप्नुयात् कार्तिके च तथा मासे कृत्वा वै नक्तभोजनं क्षीरोदनेन साज्येन संपूज्य वृषभध्वजं पौर्णमास्यां
च विधिवत्स्नाप्य दत्त्वा चरुं पुनः ब्राह्मणान्भोजयित्वा तु यथाविभवविस्तरं दत्त्वा गोमिथुनं चैव कपिलं द्विजसत्तमाः सूर्य
सायुज्यमाप्नोति नात्र कार्या विचारणा मार्गशीर्षे च मासे पि कृत्वा वै नक्तभोजनं शुद्धान्नेन यथान्यायमाज्यदुग्धादिभिः सम
पौर्णमास्यां च पूर्वोक्तं कृत्वा नाश वीयपोभवे ब्राह्मणान्भोजयित्वा तु दरिद्रान्वेदपारगान् दत्त्वा गोमिथुनं चैव पांडुरं विधिपूर्वकं
सोमलोकमनुप्राप्य सोमेन सह मोदते अर्द्धं मासस्य मस्थेयं ब्रह्मचर्यत्त माद्या त्रिस्नानं चाग्निहोत्रं च भूशय्या नक्तभोजनं प
तत्र यो हृपवासं च चतुर्दश्यष्टमीषु च इत्येतदखिलं प्रोक्तं प्रतिमासं शिवव्रतं कुर्याद्दर्षक्रमेणेव मक्रमेणापि वा द्विजाः सया
ति शिवसायुज्यं ज्ञानयोगमवाप्नुयात् इति श्रीलैंगे उपरिभागे शिवव्रतकथनं नामाशीतितमोध्यायः ८० सूत उवाच उमा
महेश्वरं वक्ष्ये व्रतमीश्वरभाषितं नरनार्यादिजंतूनां हिताय मुनिसत्तमाः पौर्णमास्याममावस्यां चतुर्दश्यष्टमीषु च नक्तम
हे प्रकुर्वीत हविष्यैः पूजयेद्भवं उमामहेश प्रतिमां हेम्नाकृत्वा सुशोभनां राजतीं वाथ वर्षान्ते प्रतिष्ठाप्य यथाविधि ब्राह्मणा
न्भोजयित्वा च यथाशक्त्या च दक्षिणां रथायैस्थापि देवेशानीता भद्रालयं प्रति सर्वातिशय संयुक्तैः छत्रचामरभूषणैः निवे
दयद्व्रतं चैव शिवाय परमेष्ठिने सयाति शिवसायुज्यं नारी देव्याय दिप्रभोः अष्टम्यां च चतुर्दश्यां नियता ब्रह्मचारिणी वर्ष

ति
गपु॰
११८

मेकं न भुंजीत कन्या वा विधिना वापि वा वर्षांते प्रतिमां कृत्वा पूर्वोक्तविधिनापि वा प्रतिष्ठाप्य यथान्यायं दत्वा हद्रालयं विका
ब्राह्मणान्भोजयित्वा च भवान्या सह मोदते अथवापि चरेद्व्रतं मासमेकं चतुर्दशी वर्षांते प्रतिमां कृत्वा येनकेनापि वा द्विजाः
पूर्वोक्तमखिलं दत्वा भवान्या सह मोदते अमावस्यां निराहारा भवेद्व्रतमयंत्रिता त्रिशूलं विधिना कृत्वा वर्षांते विनिपातयेत्
स्नाप्येशानं जपेद्रुद्रक्या सहस्रैः कमलैः सितैः राजतं कमलं चैव जातरूपस्य कर्णिकम् दत्वा भवाय विप्रेभ्यः प्रदद्याद्दक्षिणामपि
कामतोपि कृतं पापं भ्रूणहत्यादिकं च यत् तत्सर्वं स्थूलदानेन नभिंयात्रारी न संशयः सायुज्यं चैवमाप्नोति भवान्या द्विजसत्तमाः ऊ
र्यादद्वा नरः सोपि भद्रं सायुज्यमाप्नुयात् पौर्णमास्याममावस्यां वर्षमेकमतंद्रिता उपवासरता नारी नरो वापि द्विजसत्तमाः नि
यमादेवतत्कार्यं भर्तृणां द्विजसत्तमाः जपं स्नानं तथा दानं मस्वतं त्रानवेस्मियः वर्षांते सर्वगंधाढ्यां प्रतिमां संनिवेदयेत् सभा
वान्या च सायुज्यं सारूप्यं वापि सुव्रता लभते नात्र संदेहः सत्यं सत्यं वदामि ते कार्तिक्यां प्रतिपन्नारी एकभक्तेन वर्तते तमाहिं
सारिनियमेः संयुता ब्रह्मचारिणी दद्यात्प्रस्थतिलानां च भारमेकमतंद्रिता सघृतं सगुडं चैव मोदनं परमेष्ठिने दत्वा च ब्राह्म
णेभ्यश्च यथाविभवविस्तरं अष्टम्यां च चतुर्दश्यामुपवासव्रताय या भवान्या मोदते सार्धं सारूप्यं प्राप्य सुव्रता तमासत्ये
दयादानं शौचमिंद्रियनिग्रहः सर्वभूतेषु यो धर्मः सामान्यं रुद्रपूजनं समासाद्धः प्रवक्ष्यामि प्रतिमासमनुक्रमात् मार्ग।
शीर्षकमारभ्य कार्तिकांतं यथाक्रमं व्रतं सविपुलं पुण्यं नंदिना परिभाषितं मार्गशीर्षके मासे न ह्वषयोत्र गसुन्नमंत्र्यलंकृ
त्य यथान्यायं शिवाय विनिवेदयेत् सा च सार्धं भवान्या वै मोदते नात्र संशयः पौषमासे तु वै स्थूलं प्रतिष्ठाप्य निवेदयेत् पूर्वो ११८
क्तमखिलं कृत्वा भवान्या सह मोदते रथं माघेथ्यमाघेयमासे तु सर्वलक्षणसंयुतं दद्यात्संपूज्य देवेशं ब्राह्मणांश्चैव भोजये

त् सार्धंदेव्यामहाभागामोदतेनात्रसंशयः फाल्गुणेप्रतिमांकृत्वाहिरण्मयेनयथाविधि रजतेनापिताम्रेणयथाविभववि
स्तरं प्रतिष्ठाप्यसमभ्यर्च्यस्थापयेच्छंकरालये सोपिसार्धंमहादेव्यामोदतेनात्रसंशयः चैत्रेभवंकुमारंचभवानींचयथाविधि
ताम्रैर्यैर्विधिवत्कृत्वाप्रतिष्ठाप्ययथाविधि भवान्यामोदतेसार्धंरत्नाकरद्वायशंभवेत् कृत्वालयंहिकौबेरंराजतंरजतेनवै
ईश्वरंमानसमायुक्तंगणेशोस्वसमंततः सर्वरत्नसमायुक्तंप्रतिष्ठाप्ययथाविधि स्थापयेत्परमेशस्यभवस्यायतनेशुभे वैशा
खेवरददेवंकैलासाद्यंविप्रतोन्नमं कैलासंपर्वतंप्राप्यभवान्यासहमोदते ज्येष्ठेमासिमहादेवंलिंगमूर्तिमुमापतिं कृत्वांज
लिपुटैनैवब्रह्मणाविष्णुनानया मध्येभवेनसंयुक्तंलिंगमर्चितदिजोत्तमाः हंसेनचवराहेणकृत्वानानाम्बरादिभिः शुभैः प्रति
ष्ठाप्ययथान्यायंब्राह्मणान्भोजयेत्ततः शिवायशिवमासायशिवस्थानेयथाविधि ब्राह्मणैः सहितंस्थाप्यदेवीसायुज्यमा
प्नुयात् आषाढेवस्तुभेमामेसगृहेकृत्वासप्तभौमं पञ्चेष्टकाभिर्विधिवद्यथाविभवविस्तरं सर्वबीजरसैःस्थापितंपूर्णंसर्वशो
भनैः गृहोपकारणैःसर्वैर्वस्त्रतोल्लवलादिभिः दासदासादिभिःसर्ववशयूनेरासनादिभिः संपूर्णंचगृहंदत्सेराजायचसम
मंततः देवंकृत्वादिभिःस्थाप्यमहादेवंउमापतिं ब्राह्मणानांसहस्रेणभोजयित्वायथाविधि विद्याविनयसंपन्नंब्राह्मणंवेदपा
रगं प्रथमाश्रमिणांभक्त्यासंपूज्यचयथाविधिकन्यासुमध्यमांयावत्कालजीवनसंयुतं देवंगोमिथुनंचैवगृहंतत्रनिवेद
येत् सयातिविविधैर्दिव्यैर्मेरुपर्वतसन्निभैः गोलोकंसमवाप्यभवान्यासहमोदते भवान्यासहशीभूत्वासर्वकल्पेषु
सायया भवान्याश्चैवसायुज्यंलभतेनात्रसंशयः सर्वधान्यसमाकीर्णंविचित्रध्वजशोभितं निवेदयेनविप्रायश्चोश्रावणे
तिलपर्वतं विनाचध्वजवस्त्राद्यैर्धान्यमिश्रंनिवेदयेत् ब्राह्मणान्भोजयित्वाच पूर्वोक्तमखिलंभवेत् कृत्वाभाद्रपदेमासि

लिं॰
पु॰
११९

शोभनं शालिपर्वतं ब्राह्मणान्भोजयित्वा च दापयेत्स्वयथाविधि सा च सूर्यांशुसंकाशा भवान्या सह मोदते हेममावाश्चतुर्जेमा
मिविपुलं तथान्यपर्वतं सर्वाणि च समंयुक्तं दत्वा संपूज्य शंकरम् ब्राह्मणान्भोजयित्वा च पूर्वोक्तमखिलं लभेत् सर्वधान्यसमा
युक्तं सर्ववीजरसादिभिः सर्वधान्यसमायुक्तं सर्वरत्नोपशोभितं शृंगैस्त्वनेभिः संयुक्तं विमानच्छत्रशोभितं गंधमाल्यैस्त्ता
पाधूपैर्दीपैश्च वस्त्रादिभिः शोभितं रविचित्रैश्च ततो गेयैश्च शंखवीणादिभिस्तथा ब्रह्मघोषैर्महापुण्यैर्मंगलैश्च विशेषतः महा
पूजादिसंयुक्तो विविधैः कुसुमोज्ज्वलैः नगेंद्रं मेरुनामानं त्रैलोक्याधारमुत्तमं तस्मात्प्रीणिवं कुर्यान्मध्ये नाथानेवहि द
क्षिणे च यथान्याये ब्रह्माणं च चतुर्मुखं उत्तरे देवदेवेशं नारायणमनामयं इंद्रादिलोकपालांश्च कनाभक्त्या यथाविधि प्र
19 तिष्ठाप्य तथाप्येवं समभ्यर्च्य महेश्वरं देवस्य दक्षिणे हस्ते शूलं त्रिदशपूजितं वामपाणौ भवान्याश्च कमलं हेमभूषितं विलो
चनं च शंखचक्रं दंडञ्चाप्रयत्नतः ब्रह्मणश्चाक्षसूत्रं च कमंडलमत्रतम इंद्रस्य वज्रमग्नेश्च शक्तिं चापि परमायुधं यमस्य दंडं नि
ऋतेश्च खड्गं निशितं वरुणस्य च वरुणस्य महापाशं नागाख्यं गोत्रमद्भुतं वायोर्वा यष्टिं कुबेरस्य गदां लोकप्रपूजिताम् टंकं वेशानदेव
स्यानिवेद्यैवं क्रमेणात्र शिवस्य महतीं पूजां कृत्वा च हसमन्वितां पूजयेत्सर्वदेवांश्च यथाविभवविस्तरं ब्राह्मणान्भोजयित्वा
च पूजां कृत्वा प्रयत्नतः महामेरुव्रतं कुर्यान्महारुद्राय दापयेत् महामेरुव्रतं कृत्वा महादेव्या प्रमोदते चिरात्सायुज्यमाप्नो
ति महादेवान्नसंशयः कार्त्तिकामप्रियानारीकृत्वा देवीमुमां शुभां सर्वाभरणसंपन्नां सर्वलक्षणसंयुतां हेमरत्नाद्यादिभिश्चै
व प्रतिष्ठाप्य विधानतः देवीं च कृत्वा देवेशं सर्वलक्षणसंयुतं तयोरग्रे कृतांशां च वस्तुवृषं लोपितामहं नारायणं च यथा तारेस ११९
र्वाभरणभूषितं लोकपालैस्तथा सिद्धैः संहतं प्राप्य यत्नतः रुद्रालये ब्राह्मणं तस्मा दापयेद्भक्तिपूर्वकं सा भवान्या स्तनं गतानाम

वेनसहमोदते एकभक्तव्रतंपुण्यंप्रतिमासमनुत्तमं मार्गशीर्षकमासाद्यकार्त्तिकांतंप्रवर्त्तितं नरनार्यादिजंतूनांहितायसु
निसत्तमाः नवः कृत्वाव्रतंचैवंशिवसायुज्यमाप्नुयात् नात्रदेवानसंदेहः शिवेनपरिभाषितं इतिश्रीमहापुराणेश्रीलैंगे उ
परिभागेउमामहेश्वरव्रतंकथनंनामैकाशीतितमोध्यायः ८१ सूतउवाच सर्वव्रतेषुसंपूज्यदेवदेवमुमापतिं जपेत्संवा
त्सरींविद्यांविधिनैवंद्विजोत्तमाः जपादेवनसंदेहोव्रतानांचविशेषतः समाप्तिर्नान्यथातस्माज्जपेत्पंचाक्षरींशुभाम् ऋष
य ऊचुः कथंपंचाक्षरीविद्याप्रभावोवाकथंवद क्रमोपायंमहाभागश्रोतंकौतूहलंहिनः सूतउवाच पुरादेवेनरुद्रेणदे
वदेवेनशंभुना पार्वत्यैकथितंपुण्यंप्रवदामिसमासतः श्रीदेव्युवाच भगवन्देवदेवेशसर्वलोकमहेश्वरः पंचाक्षरस्यमा
हात्म्यंश्रोतुमिच्छामितत्त्वतः श्रीभगवानुवाच पंचाक्षरस्यमाहात्म्यंवर्षकोटिशतैरपि नशक्यंकथितुंदेवितस्मात्संक्षेपतः
शृणु प्रलयेसमनुप्राप्तेनष्टेस्थावरजंगमे नष्टेदेवासुरेचैवनष्टेचोरगराक्षसे सर्वंप्रकृतिमापन्नंयतः संलयमेष्यति एको
हंसंस्थितोदेविनद्वितीयोस्तिकुत्रचित् तस्मिन्वेदाश्चशास्त्राणिमंत्रेपंचाक्षरेस्थिताः तेनाशंनैवसंप्राप्तामच्छक्त्यानुपालिताः
अहमेकोद्विधाप्यासंप्रकृत्यात्मादिविभेदतः यांभुनारायणाश्चैतदेवामायामयींतनुं आस्थाययोगपर्यंकेशयनेतोयमध्यगाः
तन्नाभिपंकजाज्जातःपंचवक्त्रःपितामहः सिसृक्षमाणोलोकांस्त्रीनशक्तोसहायवान् दशब्रह्मासृजीदौमानसानमि
तौजसः तेषांसृष्टिप्रवृद्ध्यर्थंमाप्रोवाचपितामहः मत्पुत्राणांमहादेवशक्तिंदेहिमहेश्वरः इतितेनसमादिष्टः पंचवक्त्रधरो
ह्यहं पंचाक्षराण्येवसूत्रैः प्रोक्तवान्पद्मयोनये तान्यंचवदनैर्गृह्णन्ब्रह्मालोकपितामहः वाच्यवाचकभावेनज्ञातवान्पर
मेश्वरं वाच्यः पंचाक्षरैर्देविशिवस्त्रैलोक्यपूजितः वाचकः परमोमंत्रस्तस्यपंचाक्षरः स्थितः ज्ञात्वाप्रयोगंविधिनावशि

द्विजश्रेष्ठा नद्यां पंचमुखो महात्मा प्रोवाच पुत्रेभ्यो जगद्धिताय मंत्रं महार्थं किल पंचवर्णं तेन लब्धा मंत्ररत्नं समासाल्लोकपितामहा
त् तमाराधयित्वा देवं परात्परतरं शिवं ततस्तुतोष भगवान्सर्वज्ञो नायकः शिवः ददौ वाचमखिलं ज्ञानमणिमादिगुणाष्टकं ते
पि लब्ध्वा वरान्विप्रास्तदा प्रभृति कांक्षिताः मेरोस्तु शिखरे रम्ये मुंजवान्नाम पर्वतः मत्प्रियः सततं श्रीमान्मद्भक्तैरुपलक्षितः त
स्याभ्यासे तपस्तीव्रं लोकरक्षैकसमुत्सुकाः दिव्यं वर्षसहस्रं तु वायुभक्षाः समाचरन् तिष्ठंतोत्र महार्थाय पैलभिरे ऋषयः पुरा
तेषां शक्तिं महद्दृष्ट्वा सर्वप्रत्यत्नतान्विते पंचाक्षरस्य विच्छंदो देवतं शक्तिबीजवान् न्यासं षडंगादिकं वै यद्विनियोगमशेषतः
प्रोक्तवानहमार्याणां लोकानां हितकाम्यया तच्छ्रुत्वा मंत्रमाहात्म्यमृषयस्ते तपोधनाः मंत्रस्य विनियोगं च कृत्वा सर्वमनुष्ठितं
तेह्येतस्मात्सदा लोकान्सदेवासुरमानुषान् वर्णान्वर्णविभागांश्च सर्वधर्मांश्च शोभनान् पूर्वकल्पे समुत्पन्नान् श्रुतवंतो यथा पु
रा पंचाक्षरप्रभावाच्च लोका वेदा महर्षयः तिष्ठंति शाश्वतं धर्म देवाः सर्वमिदं जगत् तदिदानीं प्रवक्ष्यामि शृणुध्वावहिताखिलं
अल्पाक्षरं महार्थं च वेदसारं विमुक्तिदं आज्ञासिद्धमसंदिग्धं वाक्यमेतच्छिवात्मकं नानासिद्धियुतं दिव्यं लोकचित्तानु
रंजकं सुनिश्चितार्थं गंभीरं वाक्यमेतत्पारमेश्वरं मंत्रं सुखमुखोच्चार्यमशेषार्थप्रसाधकं तद्बीजं सर्वविद्यानां मंत्रमाद्यं सुशो
भनं अतिसूक्ष्मं महार्थं च ज्ञेयं तद्वटबीजवत् वाच्यः शिवः प्रमेयत्वान्मंत्रस्तद्वाचकः स्मृतः वाच्यवाचकभावोयमनादिसंस्थि
तस्तयोः वेदेषु वागमे वापि यत्र यत्र षडक्षरः शिवार्कितस्य बहुभिर्मंत्रैः पामैर्वा बहुविस्तरे यस्य वै हृदि संस्थोयं मंत्रः स्या
त्परमेश्वरः तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितं यो विद्वान्वै जपेत्सम्यगधीत्यैव विधानतः एतावदेव विज्ञानमेतावत्परमं प १९
दं एतावद्ब्रह्मविद्या च तस्मान्नित्यं जपेद्बुधः पंचाक्षरः सप्रणवो मंत्रोयं हृदयं मम गुह्याद्गुह्यतरं साक्षान्मोक्षज्ञानमनुत्तमं अ

स्यमंत्रस्य वक्ष्यामि ऋषिश्छंदोऽधिदैवतं बीजं शक्तिं स्वरं वर्णं स्थानं चैवातत्वंप्रति वामदेवो नाम ऋषिः पंक्तिश्छंद उदाहृतः
देवता शिव एवाहं मंत्रस्यास्य वरानने नकारादीनि बीजानि पंचभूतात्मकानि च आत्मानं प्रणवं विद्धि सर्वव्यापिनमव्ययं श
क्तिस्त्वमेव देवेशि सर्वदेवनमस्कृते त्वदीयं प्रणवं केचिन्मदीयं प्रणवं तथा त्वदीयं देवि मंत्राणां शक्तिभूतं सनातनं अकारोर्क
र मकाराभ्यां मदीये प्रणवे स्थिताः उकारं च मकारं च अकारं च क्रमेण वै त्वदीयं प्रणवं विद्धि त्रिमात्रं प्लुतमुत्तमं उकारस्य स्वरोदा
त्त ऋषिर्ब्रह्मा स्मृतः प्रभुः छंदो देवी च गायत्री परमात्माधिदेवता उदात्तः प्रथमस्तद्वच्छ्वेतवर्णः स्याद्वितीयकः पंचमः स्व
रितश्चैव मध्यमो निषधः स्मृतः नकारः पीतवर्णश्च स्थानं पूर्वमुखं स्मृतं इंद्राधिदैवतं छंदो गायत्री गौतम ऋषिः मकारः कृ
ष्णवर्णः स्थानं वै दक्षिणामुखं छंदोऽनुष्टुप् ऋषिश्चात्रीरुद्रो देवतमुच्यते शिकारो धूम्रवर्णश्च स्थानं वै पश्चिमं मुखं विश्वा
मित्र ऋषिस्त्रिष्टुप्छंदो विष्णुस्तु दैवतं वाकारो हेमवर्णश्च स्थानं चैवोत्तरं मुखं ब्रह्माधिदैवतं छंदो बृहती चांगिरा ऋषिः य
कारो रक्तवर्णश्च स्थानमूर्ध्वमुखं विराट् छंदो ऋषिर्भरद्वाजः स्कंदो दैवतमुच्यते न्यासमस्य प्रवक्ष्यामि सर्वसिद्धिकरं शुभं
सर्वपापहरं चैव त्रिविधो न्यास उच्यते उत्पत्तिस्थितिसंहारभेदात्स त्रिविधः स्मृतः ब्रह्मचारिगृहस्थानां यतीनां क्रमशो भवे
त् उत्पत्तिर्ब्रह्मचारीणां गृहस्थानां स्थितिर्मता यतीनां संहृतिन्यासः सिद्धिर्भवति नान्यथा उत्पत्त्यादिविभेदेन वक्ष्यते ते वरान
ने न्यसेत्पूर्वकं न्यासं देहन्यासमनंतरं अंगन्यासस्ततः पश्चाद्दक्षिणादिविधिक्रमात् मूर्ध्नादिपादपर्यंतमुत्पत्तिन्यास उच्य
ते पादादिमूर्धपर्यंतं संहारो भवति प्रिये हृदयाद्यंगुलिन्यासः स्थितिन्यास उदाहृतः ब्रह्मचारिगृहस्थानां यतीनां चैव शा
म्भवे सशिरस्कं ततो देहं सर्वमंत्रेण संस्पृशेत् सदेहन्यास इत्युक्तः सर्वेषां समपवसः दक्षिणांगुष्ठमारभ्य वामांगुष्ठांतपर्वहि

लि
ग पु०
२१

यस्मिन्नेवन्तुत्पत्तिर्विपरीतं तस्य संहृतिः अंगुष्ठादिकनिष्ठांतं न्यसेत्तस्य तलयोर्द्वयोः अतीव भोगदो देवि स्थितिन्यासः कुटुंबिनां
करन्यासं प्रकुर्वादेहन्यासमनंतरं अंगन्यासं न्यसेत्पश्चादेव मायाशेषविधि ॐकारं संपुटीकृत्य स्थानेष्वंगेषु विन्यसेत् क
रयोरुभयोश्चैव दशस्वंगुलिषु क्रमात् प्रत्यास्यपादावाचमस्तु विभूतास्समाहितः प्राङ्मुखोदङ्मुखो वापि न्यासकर्म समा
रभेत् स्मरेत्पूर्वं ऋषिं छंदो देवतं बीजमेव च शक्तिं च परमात्मानं गुरुं चैव वरानने मंत्रेणायाणि संस्पृशन् तथा प्रणवं न्य
सेत् अंगुलीनां च सर्वासां तथा चायं तपर्वसु सबिंदुकानि बीजानि पंचमध्यमपर्वसु उत्पत्त्यादित्रिभेदेन न्यसेदाश्रमतः
पृथक् उभाभ्यामेव पाणिभ्यामापादतलमस्तकं मंत्रेण संस्पृशेद्देहं प्रणवेनैव संपुटं मूर्ध्नि वक्त्रे च कंठे च हृदये गुह्यके त
२१ था पादयोरुभयोश्चैव प्रणवादिन्यसेत्क्रमात् पादयोरुभयोश्चैव गुह्ये च हृदये तथा कंठे च मुखमध्ये च मूर्ध्नि च प्रणवादिके
हृदये गुह्यके चैव पादयोर्मूर्ध्नि वा विच कंठे चैव न्यसेद्देवं प्रणवादित्रिभेदतः कृतांगन्यासमेवं च मुखोनि परिकल्पयेत् पं
चादिचार्धपर्यंतेन कारादियथाक्रमं षडंगानि न्यसेत्पश्चाद्देवास्याने च शोभने हुं फट् वा अथ वषट्कारं नमः स्वाहा वषट् तथा च
श्रौषट् स्वाहा स्मृतस्तद्वद्वौषट् फट्कारकैः सह प्रणवं हृदयं विद्यान्नकारः शिर उच्यते शिखा मकारस्त्वाख्यातः शिकारः क
वचं तथा वाकारो नेत्रमस्त्रं तु यकारः परिकीर्तितः उक्तमंत्राणि विन्यस्य ततो देवं प्रपूजयेत् दिशः विदिशो मातरो दुर्गादेवाः क्षेत्रो देवता
दिग्गां आग्नेयादिषु कोणेषु च तथा पि यथाक्रमं अंगुष्ठतर्जन्यग्राभ्यां संस्पृश्य मस्तकं शुभे रक्षं मिति वोच्चाय नमस्कुर्यात्
पृथक् पृथक् तलमध्ये तथा पृष्ठे तर्जन्याद्यंगुलीषु च अंगुष्ठेन करन्यासं कुर्याद्देवि विचक्षणः एवं न्यासमिदं प्रोक्तं सर्वपापह ॥२१॥
रं शुभं सर्वसिद्धिकरं पुण्यं सर्वरत्नाकरं शिवं यस्मिन्मंत्रे च यः सम्यग्भगे शंकर प्रतिमो भवेत् जन्मांतरकृतं पापमपि नश्यति तत्क्षणात्

त् एवं विमृश्य मेधावी शुद्धकायो दृढव्रतः जपेन्मंत्रं वा ततः मंत्रं लब्ध्वाचार्यप्रसादतः अतः परं प्रवक्ष्यामि मंत्रसंग्रहणं शुभं यं
विनाऽनिष्फलं नित्यं येन वा सत्फलं भवेत् आज्ञाहीनं क्रियाहीनं श्रद्धाहीनं समानसं अज्ञाने दक्षिणाहीनं सदा जप्तं च निष्फ
लं आज्ञासिद्धं क्रियासिद्धं श्रद्धासिद्धं समानसं एवं दक्षिणासिद्धं सर्वसिद्धं यतस्ततः उपगम्य गुरुं विप्रं मंत्रतत्त्वार्थवेदिनं
ज्ञानिनं सद्गुणोपेतं ध्यानयोगपरायणं तोषयेत्तं प्रयत्नेन भावशुद्धिसमन्वितः वाचा च मनसा चैव कायेन द्रविणेन च आ
चार्यं पूजयेद्विद्वान् सर्वदाति प्रयत्नतः अथार्घ्यं रत्नानि हेमाणि च गृहादि च भूषणानि च वासांसि धान्यानि विविधा
नि च एतानि गुरवे दद्यादात्याच विभवे सति वित्तशाठ्यं न कुर्वीत यदीच्छेत् सिद्धिमात्मनः पश्चान्निवेदयेद्देवि आत्मनः स
परिच्छदं एवं संपूज्य विधिवद्यथाशक्ति तथार्चयेत् आददीत गुरोर्मंत्रं ज्ञानेनैव क्रमेण तु एवं तु शिष्यः शिष्यं पूजकं वत्स
रोषितं शुश्रूषुमनहंकारं सुपवासकृशं शुचिं स्नापयित्वा विशुद्धार्घ्यपूर्णेन कलशेन वै जलेन मंत्रितेनाथ शुभद्रव्ययुतेन च
अलंकृत्य सवेशं च वस्त्रचंदनभूषणैः पुण्याहं वाचयित्वा तु ब्राह्मणानभिपूज्य च समुद्रतीरे नद्यां वा गोष्ठे देवालयेऽपि वा शु
चौ देशे गृहे वापि काले तिथिकलेतियौ नक्षत्रे शुभयोगे च सर्वदोषविवर्जिते अनुग्रहस्ततो दद्याच्छिवज्ञानमनुत्तमं स्वैर
णोच्चारयेन्मंत्रमेकांते तिग्ममंत्रधीः उच्चार्योच्चारयित्वा तु आचार्यः सिद्धिदः स्वयं शिरो वक्त्रात् शुभं चास्य शोभनास्य प्रयो
स्यैति एवं लब्ध्वा परं मंत्रं ज्ञानेनैव गुरोस्ततः जपेन्नित्यं समं कल्पं गुरुस्मरणमेव च यावज्जीवं जपेन्नित्यमष्टोत्तरसहस्रकं अतः
स्तत्परमोक्षन्तास यान्ति परमां गतिं जपेद्दत्तं लब्ध्वैव व्रतं गणीतमादरात् नृक्काश्रो संयमी यश्च पौरस्मरणीकः स्ततः पुर
श्चरणजापी वा अथवा नित्यजापकः अविरामाद्विकान्तीनतयोः स्यात्ततो भवेत् यः पुरश्चरणकृन्नानित्यजापी भवेन्नरः न

श्री
तष:
१२२

स्वनास्ति समो लोके सिद्धास्ति द्विप्रदो वशी ग्रासनं च स्थिरं वद्धा मौनी चैकाग्रमानसः प्राङ्मुखो वापि जपेन्मंत्रमनुत्तमं ग्रायंतयो
र्जपस्यापि कुर्याद्वै प्राणसंयमान् तथा चांते जपे ह्नौ जे शतमष्टोत्तरं शुभे वर्णान्विशन्समावृत्ति प्राणानायम्य संस्मरेत् पूर्वोक्त
स्य मंत्रस्य प्राणायामो मुदाहृतः प्राणायामाः व्वेति प्रसर्वपापपरिक्षयः इंद्रियाणां विशिवत्व तस्मात्प्राणसंयमात् गृ
हे जपं समं विद्याद्गोष्ठे शतगुणं भवेत् नद्यां शतसहस्रं स्यादनंतं शिवसन्निधौ समुद्रतीरे देवहृदे गिरौ देवालयेषु च भ्रामा
श्रमेषु सर्वेषु जपः कोटिगुणो भवेत् शिवस्य सन्निधाने च सूर्यस्याग्रे गुरोरपि दीपस्य गोव्रजस्यापि जपकर्म प्रशस्यते अंगुली
जपसंख्यानमेकमेकं प्रशस्यते रेखाभिरष्टगुणं प्रोक्तं पुत्रजीवफलैर्दश शतं वै शंखमणिभिः प्रवालैश्च सहस्रकं स्फाटिकैर्द
शसाहस्रं मौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते कुशग्रंथ्या च रुद्राक्षैरनंतगुणमुच्यते पंचविंशति
मोक्षार्थं सप्तविंशति पौष्टिकं त्रिंशच्च धनसंपत्त्यै पंचदशाभिचारिकं तन्मूर्वाभिमुखं वश्यं दक्षिणं चाभिचारिकं पश्चिमं धन
दं विद्यादुत्तरं शांतिकं भवेत् अंगुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी मध्यमा धनदा शांतिं करोत्येषा ह्यनामिका कनिष्ठाकर
णीया सा जपकर्मणि शोभने अंगुष्ठेन जपेज्जप्यमन्यैरंगुलिभिः सह अंगुष्ठेन विना कर्म कृतं तदफलं यतः स्नाणश्च सर्वय
ज्ञेभ्यो जपयज्ञो विशिष्यते हिंसया ये प्रवर्तंते जपयज्ञो न हिंसया यावंतः कर्मयज्ञाः स्युः प्रदानानि तपांसि च सर्वे ते जपयज्ञ
स्य कलां नार्हंति षोडशीं माहात्म्यं वाचिकस्यैव जपयज्ञस्य कीर्तितं तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः यदुच्चनी
चस्वरितैः शब्दैः स्पष्टपदाक्षरैः मंत्रमुच्चारयेद्वाचा जपयज्ञः स वाचिकः स वाचिकः शनैरुच्चारयेन्मंत्रमीषदोष्ठौ चालयेत् १२२
किंचित्कर्णौ न तं विद्यादुपांशुः स जपः स्मृतः धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदं शब्दार्थं चिंतयेद्भूयः स उक्तो मानसो

122

जपः त्रयाणांजपयज्ञानांश्रेयान्स्यादुत्तरोत्तरः भवेद्येनविशेषेणवैशिष्ट्यंतत्फलस्यच जपेनदेवतानित्यंस्तूयमानाप्र
सीदति प्रसन्नाविपुलान्भोगान्दद्यान्मुक्तिंचशाश्वतीं यक्षरक्षःपिशाचाश्चग्रहाःसर्वाश्चभीषणाः जापिनंनोपसर्पंतिभय
भीताःसमंततः जपेनपापंशमयेदशेषंयत्कृतंजन्मपरम्परासु जपेनभोगाञ्जयतेचमृत्युंजपेनसिद्धिंलभतेचमुक्तिं
एवंलक्ष्याशिवत्तानंत्तानाजपविधिक्रमं सदाचारीजपन्भद्रंध्यायन्नित्यंसमश्नुते सदाचारंप्रवक्ष्यामिसम्यग्धर्मस्यसाधनं
यस्मादाचारहीनस्यसाधनंनिष्फलंभवेत् आचारःपरमोधर्मआचारःपरमंतपः आचारःपरमाविद्याआचारःपरमा
गतिः सदाचारवतांपुंसांसर्वत्राप्यभयंभवेत् नत्सदाचारहीनानांसर्वत्रैवभयंभवेत् सदाचारेणदेवत्वमृषित्वंचवरानने
उपयांतिश्रियोनित्यंनसदाचारलंघनात् आचारहीनःपुरुषोलोकेभवतिनिंदितः तस्मात्सिद्धिमभीप्सुस्सम्यगाचारवान्भ
वेत् उच्छिष्टोशुद्धशुद्धभ्रष्टविष्टोपापीयान् स्तानदूषकः वर्णाश्रमविधानोक्तंधर्मंनकुरुतेयतः यस्ययद्विहितंकर्मतत्कुर्यात
नित्यंसदा संध्योपासनशीलःस्यात्सायंप्रातःप्रसन्नधीः उदयास्तमयात्पूर्वमारभ्यविधिनाशुचिः कामात्मोहाद्भयाल्लो
भात्संध्यांनातिक्रमेद्द्विजः संध्यातिक्रमणाद्विप्रोब्राह्मण्यात्पतनेयतः असत्यंनवदेत्किंचिन्नसत्यंचपरित्यजेत् यत्सत्यंब्र
लङ्घ्याद्धरसत्यंचलहृत्पाणिअसत्यंपरुषंशाठ्यंपैशुन्यंपापहेतुकं परदारांपरद्रव्यंपरहिंसांचसर्वदा क्वचिन्नापिनकुर्वी
तवाचामनसातथा स्पृष्टान्नंशिवनैवेद्यंस्पृष्टस्याद्यमेवच गणान्नंसमुदायान्नंराजान्नंचविवर्जयेत् अन्नशुद्धौसत्त्वशुद्धि
र्नसदानजलेनवै सत्त्वशुद्धौभवेच्छुद्धिस्ततोन्नंपरिशोधयेत् राजप्रतिग्रहेदग्धान्ब्राह्मणान्ब्रह्मवादिनः चित्रानामपिवी
जानांपुनर्जन्मनविद्यते राजप्रतिग्रहोघोरामध्वक्तस्याग्निशिखोपमः बुधेनपरिहर्तव्यःश्वमांसवच्चवर्जयेत् अस्नानाचनंअ

लि॰
ग्रपु॰
१२२

जीयाजपेज्जमायाग्निमौनव पाणिगृहीतेनगुंजीयाद्यत्रौदैयंपविनाशिवभिन्नेभांडेवरथ्यायांपतितानांचसन्निधौ स्पृष्टशेषंनभुंजी-
यात्स्त्रद्वात्रेशिशुकैरपि शुद्धान्नेस्त्वयमश्नीयात्तस्मिन्नेवाग्निमंत्रितं मौनःकाशिवक्त्रनिस्सतन्नामौनीवैकाग्रमानसः आसेननतंपिबे-
नोयंतिष्ठन्वजलिनापिवा वामहस्तेननशय्यायांनपिबेद्वान्यकरेणवा विभीतकार्ककारंजस्नुहक्षायांनवाश्रयेत् लंभदीपमनु-
ष्याणांमध्येयायाग्रामाणांनांतथा पकोनगच्छेद्दर्भानंबाहुभ्यांनोत्तरेत्नदीं नावरोहेत्नकूपादिनारोहेद्वृक्षपादपे सूर्याग्निज-
लदेवानांगुरूणांविमुखः स्वपेत्नकुर्यादिहकार्याणिजपकर्मशुभानिवा अग्नौनतापयेत्पादौहस्तौपज्ञानसंस्पर्शेन स्व-
पैतनस्वयमासीनतापागोर्किंचित्सलंत्यजेत् नजलेमेदयेत्प्रज्ञानांभसंगामलंत्यजेत् मलंप्रक्षालयेत्तीरेप्रक्षाल्यस्नानमाच-
रेत् नचोग्रकेशानांनिर्धूतानांतथास्नानपटोदकं अग्नीकरंमनुष्याणामशुद्धंसंस्पर्शनाद्धि अजाश्वानरविरोष्ट्राणांमार्जनीनरव-
रेणुकाम् संस्पर्शोयदिमूढात्मानाश्रियंहंतिहरेरपि मार्जारश्चगृहेयस्यसोप्यंत्यजसमोभवेत् भोजयेद्यदिविप्रेंद्रान्मार्जारस्य
123 चसन्निधौ नचाण्डालसमंजेयंनात्रकार्याविचारणाखरवातः शूर्पवातः स्नानाग्नीमुखानिलः सुकृतानिहरंत्येतेसंस्पृष्टा
श्चापरस्य तु उष्णीषीकंचुकीनग्नोमुक्तकेशोगलावृतः अपवित्रकरःशुद्धः प्रलपन्नजपेत्क्वचित् क्रोधोमदःक्षुतंतंद्रीनि-
ष्ठीवनंविजृंभणं शुनीचदर्शनंनिद्राप्रलापास्तेजपद्विषः तेषांचसंभवेचापिकुर्यात्सूर्यादिदर्शनं सूर्योग्निश्चंद्रमाश्चैवग्रह-
नक्षत्रतारकाः एतेज्योतींषिप्रोक्तानिविद्वद्भिर्ब्राह्मणैस्तथा प्रसार्यपादौनजपेत्कुक्कुटासनमेवच अनासनशयानोवार-
थ्यायांशूद्रसन्निधौ रिक्तभूम्यांचखट्वायांनजपेज्जापकस्तथा आसनस्थोजपेत्सम्यक्मंत्रार्थगतमानसः कौशेयंवाथवाकां- २३
म्बलंमैणमथापिवा वासवंतालपर्णंवाआसनंपरिकल्पयेत् त्रिसंध्यंनगुरोःपूजाकर्तव्याहितमिच्छता योगुरुःसशि-

वः प्रोक्तोयः शिवः सगुरुः स्मृतः यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः शिवविद्यागुरूणां स्याद्भक्त्या च सदृशं फलं स
र्वदेवमयो देवः सर्वशक्तिमयो हि सः सगुणो निर्गुणो वापि तस्याज्ञां शिरसा वहेत् श्रेयोर्थी यस्तु पुरुषः सततं सदृढव्रतः गु
र्वाज्ञापालकः सम्यक् ज्ञानसंपत्तिमश्नुते व्रजंस्तिष्ठन्स्वपन्भुंजन्यद्यत्कर्म समाचरेत् समक्षं यदि तत्सर्वं कर्तव्यं गुर्वनुज्ञया
गुरोर्देवसमस्तं वा न यथेष्टासनो भवेत् गुरुर्देवायतनः साक्षात्तद्गृहं देवमंदिरं पापिनां च यथा संगात्तत्पापैः पतनं भवेत् त
द्वदाचार्यसंगेन तत्कर्मफलभाग्भवेत् यथैव वह्निसंपर्कान्मलं त्यजति कांचनं तथैव गुरुसंपर्कान्मलं त्यजति मानवः यथा
वह्निसमीपस्थो घृतकुंभो विलीयते तथा पापं विलीयेत आचार्यस्य समीपतः यथा प्रज्वलितो वह्निर्विष्टाकाष्ठं च निर्दहेत्
गुरुस्त्वष्टो दहत्याद्यं पापं तन्मंत्रतेजसा ब्रह्मा हरिस्तथा रुद्रो देवाश्च मुनयस्तथा कुर्वंत्यनुग्रहं तुष्टाः गुरौ तुष्टे न संशयः कर्मणा
मनसा वाचा गुरोः क्रोधं न कारयेत् तस्य क्रोधेन दह्यंते आयुः श्रीज्ञानसत्क्रियाः तत्क्रोधं ये करिष्यंति तेषां यज्ञाश्च निष्फलाः
जपाश्च नियमाश्चैव नाज्ञाकार्या विचारणा गुरोर्विरुद्धं यद्वाक्यं न वदेत्तत्प्रयत्नतः वदेद्यदि महामोहाद्रौरवं नरकं व्रजेत् वित्ते
नैव वित्तेन तथा वाचा वा च सव्रताः मिथ्या न कारयेद्देवि क्रियया वा गुरोः सदा उद्गीर्णो ल्पोपितेनस्य नैर्गुण्यशतभाग्भवेत् गुणा
ख्यापितेनस्य सर्वपुण्यफलं लभेत् गुरोर्हितं प्रियं कुर्यान्मनोवाक्कायकर्मभिः कुर्यात्यतनथोगतातैवपरिवर्तते सततस्मात्
वेदोपास्योवंदनीयश्च सर्वदा समीपस्थोप्यनुज्ञाप्य वंदयेद्धि गुरोर्गुरुं एवमाचारवान्भक्तो नित्यं जपपरायणः गुरुप्रियकृत्क
रो मंत्रं विनियोक्तुं ततोर्हति विनियोगं प्रवक्ष्यामि सिद्धमंत्रप्रयोजनं दोषं लभ्यातितन्मंत्रे विनियोगं विनाकृतः यस्य येन वि
युंजीत कार्येण तु विशेषतः विनियोगः स विज्ञाय ऐहिकामुष्मिकं फलं विनियोगजमायुष्यमारोग्यं तन्त्रानित्यया राज्यैश्वर्यं

लि. गपु. १२४

वानिर्वीर्यांतस्वर्णैर्वितानमेव च प्रोत्सारणाभिषेकं वनयाकर्षणमेव च स्नानेनसंधयोश्चैव कुर्यादेकादशेन वै शुचिपर्वनि माह
त्यजपेल्लक्षमतंद्रितः महानद्यां हि लक्षं तु दीर्घमायुरवाप्नुयात् दूर्वांकुरतिलावाणीनतथ्रीपदिकानथा तेषांतु दशसाहस्रं
होममायुष्यवर्धनं अश्वत्थवृक्षमाश्रित्य जपेल्लक्षद्वयं सुधीः शनैश्चरदिने स्पृष्ट्वा दीर्घमायुर्लभेन्नरः शनैश्चरदिने स्वांश्वत्थपाणि
भ्यां संस्पृशेत्सुधीः जपेदष्टोत्तरशतं सोपमृत्युहरो भवेत् आदित्याभिमुखो भूत्वा जपेल्लक्षमनन्यधीः अर्के रष्टशतं नित्यं जु
हुयाद्व्याधिविमुच्यते समस्तव्याधिशांत्यर्थं पलाशसमिधैर्नरः कुर्यादशसहस्रं तु नीरोगी मनुजो भवेत् नित्यमष्टशतं जप्त्वा
पिबेत्कांगुरु सन्निधौ उदरव्याधिभिः सर्वैः मासेनैकेन मुच्यते एकादशेन तु जीयाद्द्वैवाभिमंत्रिते भस्मं चान्यतथा येयं वि
षमध्यस्तं भवेत् जपेल्लक्षं तु पूर्वाह्णे कृत्वा चाष्टशतेन वै सूर्यं नित्यमुपस्थाय समग्रारोग्यवान्भवेत् नदीं भवेन संपूर्णां तटे तो
येन यो भवे जप्त्वाष्टशतं तेनैः स्नायाद्रोगाणां भेषजं भवेत् अष्टाविंशं जपित्वा तु मंत्रमेयस्तारं सुचिकृत्वा च तावत्पलापो रेवं वा
रोग्यवान्भवेत् चंद्रसूर्यग्रहे स्पृष्ट्वा मुपोष्य विधिना शुचिः यावद्ग्रहणमोक्षं तु तावत्तत्र यासमाहितः जपेत्समुद्रगामिन्यां वि मो
ते ग्रहणे स्नात्वा अष्टोत्तरसहस्राणि विद्याश्लोकसंद्विजः ऐहिकीं लभते मेधां सर्वशास्त्रार्थसंशुभां सरस्वती भवेद्देवी तस्य वा गति
मानुषी ग्रहनक्षत्रपीडासु जपेद्रक्तात्र तेन नरः कृत्वा चाष्टसहस्रं तु ग्रहपीडां व्यपोहति ऊः समदर्शने स्नात्वा जपेच्चैवायुतं तत
ः हुतेनाष्टशतं कृत्वा सद्यः शांतिर्भविष्यति चंद्रसूर्यग्रहे लिंगं समभ्यर्च्य यथाविधि यत्किंचित्प्रार्थयेद्देवि जपेदयुतमादरा
त् सन्निधौ तस्य देवस्य शुचिः संयतमानसः सर्वान्कामानवाप्नोति पुरुषो नात्र संशयः राज्ञां नांतरगानांच गोयतनानां विशेष १२५
तः व्याध्याणामेशुचिर्भूत्वा जप्त्वा कृत्वा यात्तामिथा कृतीः मांसमभ्यर्च्य विधिना युक्तं भक्तिसमन्विताः तेषामृद्धिप्रशांतिश्च भविष्यति न सं

णायः तस्मात्ते शान्तुवाधार्थं जप्त्यादयुतं सुधिः पलाशसमिधैर्देवि तस्य शान्तिर्भविष्यति आभिचारिकवाधायामेतद्देवि
समाचरेत् प्रत्यहं भवति त्वद्भक्तिः शत्रोः पीडा भविष्यति आभिचारिकवाधायामेतद्देवि समाचरेत् प्रत्यहं भवति तद्भ-
क्तिः शत्रोः पीडा भविष्यति विज्वराहे स्वर्वंडालेऽर्जिने जकूटेरपि मृष्टमन्त्रं नमुंजीनद्भक्त्वा चाष्टशतं जपेत् ब्रह्महत्या-
विशुद्ध्यर्थं जपेल्लक्षायुतं नरः विद्वेषणार्थं जप्त्यादेभौनसमयाष्टकं अन्तरमाति लोम्यन आर्द्रेण रुधिरेण वा विशेण
रुधिरणार्थी विद्वेषकरं रणं प्रायश्चित्तं प्रवक्ष्यामि सर्वपापविशुद्धये पापात् शुद्धिं यतः सम्यः कर्तुमभ्युद्यतो नरः पाप
शुद्धिर्यतः सम्यग्ज्ञानसंपन्निहेतुका पापशुद्धिर्न वेत्स्युमः क्रियाः सर्वा स्वनिष्फलाः ज्ञानं च हीयते यस्मात् कर्तव्यं पापशोध
ने विद्यालक्ष्मीविशुद्ध्यर्थं मां ध्यानांजलिना शुभे शिवेन वजलेनाद्रि राभिषिंचेन्मनमनतः अष्टोत्तरशतेन वस्त्रायात्मा पविशु
द्धये सर्वतीर्थफलेन त्वं सर्वपापहरं शिवे संध्योपासनविच्छेदे जपेदष्टशतं नरः पानकानां विनाशः स्यान्नात्र कार्याविचा
रणा उपपातकउत्पानातदर्थं परिकीर्तितं शेषाणामपि पापानां जपेन्मंत्रसहस्रकं आत्मबोधकरं गुह्यं शिवबोधप्रका
शकं शिवमात्मजपेन्मंत्रं पंचलक्षमनाकुलः पंचायुतं जपेद्दृद्धं प्राप्नोति मनुतः स्यात् जपेत् पंचलक्षं तन्निग्रहोत्तेन्द्रियाः शु
चिः पंचेंद्रियाणां विजयो भविष्यति वशात्तेन ध्यानयुक्तो जपेत् पंचलक्षमनाकुलः विषयाणां तत्पंचानां जयं प्राप्नोति
मानवः चतुर्भक्षं तत्संयम्य योजपेद्भक्तिसंयुतः भूतानामिह पंचानां जयं प्राप्नोति मानवः चत्वलक्षं तत्संयम्य यो जपेद्भक्ति
संयुतः अयुतानामादि पंचानां विजयो मनुजो भवेत् चत्वलक्षं जपेद्यस्तु मनः संयम्य यत्नतः सम्यग्विजयमाप्नोति काशाणा-
नां वशात्तेन पंचविंशतिलक्षाणां विजयो मनुजो लभेत् समरात्सुदिनो तेन जपेदयुतमादरात् ब्रह्मसिद्धिमवाप्नोति त्वं तेना

लिं·
उ·
१२५

नेनसंदरी जपेलक्षमनालसोनिर्वातेथनिर्वर्जिते मध्यरात्रेशिवस्याग्रेतां पश्यतेनात्रसंशयः अंधकारविनाशाय दीपसे
वप्रकाशाने हृदयांतर्बहिर्वापि भविष्यति न संशयः सर्वसंपत्समृद्ध्यर्थं जपेदष्टसमाहितः शिवादिपरमंमंत्रं शतल
तंजपेद्बुधः मत्सायुज्यमवाप्नोति भक्तिमानेकमनोपरं इतिते सर्वमाख्यातं पंचाक्षरविधिं क्रमात् यः पठेच्छृणुयाद्वा
पि सत्यायाविपरमांगतिं यः श्रावयेद्द्विजान् शुद्धान्पंचाक्षरविधिक्रमं दैवे कर्मणि पित्र्ये च शिवलोके महीयते इत्यादिमहा
पुराणे श्रीलिंगे उपरिभागे पंचाक्षरमाहात्म्यं नाम द्व्यशीतितमोध्यायः ८२ ऋषय ऊचुः जपाश्लेष्टन संप्राप्त ब्रह्मणादग्धयाकि
त्विषः विरक्तानां प्रबुद्धानां ध्यानयज्ञमशोभनं तस्मात्ते ब्रूहि सूताय ध्यानयज्ञमशेषतः विस्तरात्सर्वयत्नेन विरक्तानां म
हात्मनां तेषां तद्वचनं श्रुत्वा मुनीनां दीर्घसत्रिणां रुद्रेणाकथितो प्राह गुहां प्राप्य महात्मना संग्रस्य कालकूटाख्यं विघ्नेशो वि
श्वकर्मणा सूत उवाच गुहां प्राप्य सुखासीनं भवान्या सह शंकरं मुनयः संशितात्मानः प्रणेमुस्तं गुहाश्रयं अस्तुवंश्च ततः स
र्वे नीलकंठमुमापतिं अमृतं कालकूटाख्यं संहृतं भगवंस्त्वया अतः प्रतिष्ठितं सर्वं त्वया देव वृषध्वज तेषां तद्वचनं श्रुत्वा भग
वान्नीललोहितः सह संप्राह विश्वात्मा सनंदनपुरोगमान् किमनेन न द्विजश्रेष्ठा विषं वक्ष्ये सुदारुणं संहरेत द्विषयस्त्व संसम
र्पीड्येनेन किं न विषं कालकूटाख्यं संसारो विष उच्यते तस्मात्सर्वप्रयत्नेन संहरेत्तं सुदारुणं संसारो हि द्विविधः प्रोक्तः स्वा
र्थिकापरागृहपतः पुत्रसंस्पृष्टविनानां असंतीणाः सुदारुणाः पद्मणा रागदोषाणां रागो ज्ञानेन सत्वना नश्यत्येव सर्वे
षां यमीथमैनं संशयः अस्मात्त्रिकष्टेन दुष्पिशास्त्रेन तत्त्वणात्मनां बुद्धिमुत्पादयत्येवं संसारो विदुषां द्विजाः तस्मात्सदा तु
अविवेकं उष्टमित्तु भयात्मकं संत्यजेत्सर्वयत्नेन विरक्तः सोभिधीयते शास्त्रमित्यतः भोगश्चतः कर्मसतद्विजाः मूर्धा १२५

25

नैव्रह्मणः प्रारब्धक्षीणांकर्मणः तन्मं नसत्स्वभावः सर्वः प्राक्कर्मदृष्टेनचान्यथा स्मृतिः प्रवर्तिकानेयांश्चतिकर्मणएतद्विदः
निर्हृतिलक्षणाधर्मः समर्थानामिहोच्यते तस्मादज्ञानमूलो हि संसारः सर्वदेहिनां सकलंशोकमायातिकर्मणान्यासमभावतः
सकलस्त्रिविधोजीवोज्ञानहीनस्तविषया नारकीपापफलत्स्वर्गीपुण्यफलत्पुण्यगौरवात् व्यतिक्रमेणावैजीवस्त्वनर्थासंव्यव-
स्थितः उद्भिदः स्वेदजश्चैवं अण्डजोवैजरायुजः एवंव्यवस्थितेदेहेकर्मणाज्ञोत्यनिर्हृतः प्रज्ञयाकर्मणास्मुक्तिर्थनेनचसतांनहि
त्यागेनैकेनमुक्तिः स्यात्तदभावात्स्रमन्यसौ एवमज्ञानदोषेणनानाकर्मवशेनच षट्कोशकंसमुद्भूतंभजत्येषकलेवरं ग
र्भेदुःखान्यनेकानियोनिमार्गेनिर्गमेतथैवच कौमारेयौवनेचैववार्धकेमरणेतथा विचारतः स्मृतदुःखंस्त्रीसंसर्गादिभिर्द्विजाः
दुःखैनैकैर्नवैदुःखंप्रशाम्यतीहदुःखिनः नजातुकामः कामानामुपभोगेनशाम्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्ध
ते तस्माद्विचारतोनास्तिसंयोगादपिचैनृणां अर्थानामर्जनेप्येवंपालनेचव्ययेतथा पैशाचेराक्षसेदुःखंविवाहैश्चैवविचार
तः गान्धर्वेचतथाब्राह्मेसोमलोकेतथैवच प्राजापत्येतथाब्राह्मेशाकेवैचार्षकेतथा तयःशान्तितथायेस्तदुःखैःखैदुःखानिसर्व
ताः तानिभोगान्यनुष्ठानिसमस्तेष्वथनानिच तस्मादष्टगुणायोगेनतथाषोडशधास्थितं चतुर्विंशप्रकारेणसंस्थितंचापिसर्वतः
द्वात्रिंशद्देवयोस्त्वचनाविंशद्गुणापुनः तथाष्टचत्वारिंशत्वषट्पंचाशात्मकारतः वायव्यंचतथासोममानेसचयथाक्रमं
प्राभिमानिकमप्येवंदोःहंप्राकृतमेवच दुःखमेवनसंदेहोयोगिनांब्रह्मवादिनां गौणानांगतोसुराणांचदुःखमेवविचारतः
आदौमध्येतथाचान्तेसर्वलोकेषुसर्वदा वर्तमानानिदुःखानितस्मात्तान्ययथातथं दृष्टदोषेषुदेशेषुदुःखानिविविधानिच
येभावयन्तितानानियत्नात्तेन्ननमानिनः इच्छादेः परित्यागार्थेनस्वात्मायनमुक्तये यथेनरेषांरागाणामौषधंनसेवायतत

शीतोष्णवातवर्षाद्यैस्तत्कालेषु वेदितं दुःखमेव न संदेहो नराणां नित्यपंडिताः स्वर्गेप्येवं मुनिश्रेष्ठाः सत्यविशुद्धिः स्तयादिभिः
लि॰ रोगैर्नानाविधैर्ग्रस्ता रागद्वेषभवादिभिः छिन्नमूलस्तरुर्यद्वदवशः पतति क्षितौ पुण्यक्षयात्तथा तद्वद्धा पतंति दिवौकसः स्वस्था
ग पु॰ भिलाषनिष्ठानां दुःखं भोगादिसंपदां अस्मात्पतनतो दुःखं कंस्वर्गादिसंपदां नरके दुःखमेवात्र नरकाणां निविवृणात् विहित
१२९ ताकरणाच्चैव वर्णिनां मुनिसत्तमाः यथामृगो मृत्युभयाद्भीतो ह्युद्विग्नवासो न लभेत निद्रां एवं यतिः ध्यानपरो महात्मा संसा
रभीतो न लभेत निद्रां कीटपक्षिमृगादीनां पशूनां गजवाजिनां दृष्टमेवासुखं तस्मात्यजतः सत्वसत्तमं वैमानिकानामप्येवं
दुःखं कल्पाधिकारिणां स्थानाभिमानिनां चैव मन्वादीनां च सत्तमाः देवानां चैव दैत्यानामन्योन्यं विजिगीषया दुःखमेव नृपा
णां च दातृमानां जगत्त्रये आश्रमाद्यमाश्रमस्यापि वर्णिनां परमार्थतः आश्रमैश्च वर्णैर्देहयंते सांख्ययुक्तैस्तथा उग्रैस्तपोभिर्वि
विधैर्दानैर्नानाविधैस्तथा न लभंते तथात्मानं लभंते ज्ञानिनः स्वयं तस्मात्सर्वप्रयत्नेन चरेत्पाशुपतं व्रतं भस्मशायी भवेन्नित्यं
व्रते पाशुपते बुधः पंचार्थज्ञानसंपन्नः शिवतत्वसमाहितः वैकल्पकरणं योगं विधिकर्मच्छिदं बुधः पंचार्थयोगसंपन्नो दुः
खांतं व्रजते सुधीः परया विद्यया वेद्यं विदंत्यपरया नहि द्वे विद्ये वेदितव्ये हि परा चैवापरा तथा अपरा तत्र ऋग्वेदो यजुर्वेदो
द्विजोत्तमाः सामवेदस्तथाथर्ववेदः सर्वार्थसाधकः शिक्षा कल्पो व्याकरणं निरुक्तं छंद एव च ज्योतिषं च परा विद्या परा
क्षरमतं स्थितं तददृश्यं तदग्राह्यमगोत्रं तदवर्णकं तदचक्षुस्तदश्रोत्रं तदपाणिनपादकं तदजातमभूतं च तदशब्दं हि द्विजो
त्तमाः अस्पर्शं तदरूपं च रसगंधविवर्जितं अव्ययं चाप्रतिष्ठं च तं नित्यं सर्वगं विभुं महांतं तद्बृहंतं च तदजं चिन्मयं द्विजाः अप्रा १२९
णममनस्कं च तदह्रस्वमलोहितं अप्रमेयं तदस्थूलमदीर्घं तदनल्पकं अह्रस्वं तदपारं च तदानंदं तदच्युतं तथा तद्धृतम

126

द्वैतं तदद्वैतमगोचरं असंख्यं तदात्यैव पराविधानवान्यथा परापरेति कथितं नैवेह परमार्थतः अहमेव जगत्सर्वं म-
य्येव सकलं जगत् मत्त उत्पद्यते विश्वं मय्येव प्रविलीयते मत्तो नान्यदिति ध्यायेन्मनो वाक्याणिभिस्तथा सर्वमात्मनि सं-
पश्येत्सत्त्वं सर्वं समाश्रितः सर्वमात्मनि संपश्येन्न वाह्ये कुरुते मनः अथो वितस्तिमात्रं तु नाभ्यामुपरि तिष्ठति हृदयं तद्धि
जानीयाद्विश्वस्यायतनं महत् हृदयस्य मध्ये तु पुंडरीकमवस्थितं कर्मकर्मात्समुद्भूतं ज्ञाननालं सुशोभनं ऐश्वर्याष्टदलं
श्वेतं परं वैराग्यकर्णिकं छिद्राणि च दशाप्यस्य प्राणा यत्र प्रतिष्ठिताः प्राणाद्यैश्चैव संयुक्ताः पश्यंति वहुधा क्रमात् दश
प्राणवहा नाड्यः प्रत्येकं मुनिपुंगवाः द्विसप्ततिसहस्राणि नाड्यः संपरिकीर्तिताः नेत्रस्थं जाग्रतं विद्यात्कंठे स्वप्नं समादिशे-
त् सुषुप्तं हृदयस्थं तु तुरीयं मूर्ध्नि संस्थितं जाग्रत्स्वप्नावविस्वप्नस्वप्ने चैव यथाक्रमं ईश्वरः साक्षि सुषुप्ते तु तुरीये च महेश्वरः
वहिःस्येव मघान्येपि समस्तकरणैः पुमान् वर्तमानस्तदा तस्य जाग्रदित्यभिधीयते मनोबुद्धिरहंकारश्चित्तं चेति चतुष्टयं
यदा स्ववासितस्तैः स्वप्न इत्यभिधीयते कारणानि विलीनानि यदा स्वप्नताः सुषुप्तः करणोर्भिन्नस्तुरीयः परिकीर्तितः
तुरस्तुरीयातीतोसौ शिवः परमकारणं जाग्रत्स्वप्नसुषुप्तिस्तु तुरीयं चाधिभौतिकं अध्यात्मिकं च विज्ञेयं आधिदैविकमे-
व च तत्सर्वमहमेवेति विदितं च विजानता बुद्धींद्रियाणि विप्रेंद्रास्तथा कर्मेंद्रियाणि च मनोबुद्धिरहंकारश्चित्तं चेति चतु-
ष्टयं आध्यात्मिकमेवेदं चतुर्दशविधं स्मृतं द्रष्टव्यं चैव श्रोतव्यं घ्रातव्यं च यथाक्रमं रसितव्यं मुनिश्रेष्ठाः स्पर्शितव्यं तथै-
व च मंतव्यं चैवमित्येतन्न त्याधिभूतमनुक्रमात् आदित्यश्च दिशश्चैव पृथिवी वरुणस्तथा वायुश्चंद्रस्तथा ब्रह्मा रुद्रः क्षेत्र-
ज्ञ एव च अग्निरिंद्रस्तथा विष्णुर्मित्रो देवः प्रजापतिः आधिदैवतमेवं हि चतुर्दशविधं क्रमात् रात्रौ स्वदर्शनाद्वै वाजिना।

सौम्याय यथाक्रमं सोवानंदाम्रतास्तन्नामध्यमावद्विजोत्तमाः नाडीवालंबुकाचैव अग्रस्वराचैवक्रमात्तिका भास्वतीनाडयश्चैता
लि श्चतुर्दशाभिवंधनाः पवनानानाडिमध्यस्थावाहकाश्चचतुर्दश प्राणोऽपानस्तथाव्यानस्त्वउदानश्चसमानकः वैरंभश्चतथाश्च
गपु. १२२ क्लिरात्यंतर्यामः प्रभंजनाः कार्मिकश्चतथाश्वेषनश्चैनः कूसस्तथांतिकः नागरश्चैतिकश्चिनावायवश्चैचतुर्दश यश्चदत्त
स्तथाटहेतथादित्यवसूवनाः नायाप्राणेशविज्ञानेमांतवैदयथाक्रमं हृद्याकाशायपतास्मिन्सर्वस्मिन्ननरेश्वरः एकस्मा
त्मावदवरानुपासीतमांप्रभुं अजरंचमनंतंनमशोकममृतंध्रुवं चतुर्दशविधेष्वेवसंचरत्येकएवसः लीयंतेनानानिनेत्रे
वृतदव्यग्रालिवद्द्विजाः एकएवहिसर्वज्ञः सर्वेशास्त्वेकएवसः एषसर्वाधिपोदेवेषांतर्यामीमहाद्युतिः उपास्यमानः स
वस्यसर्वसौख्यः सनातनः उपास्यतेनचैवेहसर्वसौख्यद्विजोत्तमाः उपास्यमानोवैदेवः शास्त्रैर्नानाविधैरपि नवेहवेद
१२२ शास्त्राणांसर्वज्ञंतत्रास्यमिप्रभुं यस्यचात्रमिदंसर्वंनसोत्वंभवतिस्वयं आत्मनारचितंवायादन्नभूतंनकुत्रचित् सर्वत्रप्रा
णिनोमंत्रंप्राणानांग्रंथिरस्यहं प्रशास्तानयनश्चैवपंचात्माशीलभागशः अनामयोसोभूतात्माप्राप्यैवेनेनशोच्यते प्रा
णायामश्चेंद्रियात्मासंकल्पात्मामनोमयः कालात्मासौसएवेहविज्ञानमयउच्यते यदानंदमयोभूतामहेशः शिवईश्व
रः सोहमेवंजगत्सर्वमध्येचसकलंस्थितं परतंत्रेस्वतंत्रेपितदभावादिवारतः एकत्वमपिनास्त्येवद्वैतंतन्नत्रकुतस्त्विह
एवंनास्त्यघसत्यंवकुतोन्तनभेजोद्भवान् नांतः प्रज्ञोवहिः प्रज्ञोनचोभयमतस्तथा नप्रज्ञानघनस्त्वेवनप्रज्ञोज्ञानए
वकः विदितंनास्तिवेद्यंचनिर्वाणंपरमार्थतः निर्वाणंचैवकैवल्यंगतिः श्रेयसमनामयं अमृतंचाक्षरंब्रह्मपरमात्मा १२२
परात्परं निर्विकल्पंनिराभासंज्ञानपर्यायवाचकं प्रसंगेचयदेकाग्रेनदात्तानमितिस्मृतं अज्ञानमितरत्सर्वंनात्रकार्या

विचारणा इत्येवं प्रसन्नं विज्ञानमात्मसंपर्कितं ध्रुवं रागद्वेषावृतं क्रोधकाममत्सरादिभिः सदा अपरामृष्टरागं च विज्ञेयं मु
क्तिरं विदं अज्ञानमलपूर्णानां पुरुषो मलिनः स्मृतः तत्त्वयादि भवेन्मुक्तिर्नान्यथा कर्मकोटिभिः ज्ञानमेकं विना ना
स्ति पुण्यपापपरिक्षयः ज्ञानमेवाभ्यसेत्तस्मान्मुक्त्यर्थं मुनिसत्तमाः ज्ञानाभ्यासाद्धि वै पुंसां बुद्धिर्भवति निर्मला तस्मादे
वाभ्यसेज्ज्ञानं नित्यं तत्परायणः ज्ञानेनैकेन तत्त्वस्य त्यक्तसंगस्य योगिनः कर्तव्यं नास्ति तस्यैव विप्रेंद्राः शास्त्रे चेह तथावि
न च इहलोके परे वापि कर्तव्यं नास्ति तस्यैव जीवन्मुक्तो यतस्तस्माद्ब्रह्मवित्परमार्थतः ज्ञानाभ्यासरतो नित्यं ज्ञानात्तस्मा
र्थवित्त्वयं कर्तव्याभ्यासमुत्सृज्य ज्ञानमेवाधिगच्छति वर्णाश्रमाभिमानी यो त्यक्त्वा क्रोधो द्विजोत्तमाः अयं च रमते मूढः सो
ज्ञानी नात्र संशयः संसारहेतुर्ज्ञानं संसारस्तेन संग्रहः मोक्षहेतुस्तथा ज्ञानं मुक्तः स्वात्मन्यवस्थितः अज्ञाने सति विप्रेंद्राः
क्रोधयानात्र संशयः क्रोधो हर्षस्तथा लोभो मोहो दंभो द्विजोत्तमाः धर्माधर्मौ द्विजेषां च तद्गुणास्तेन संग्रहः शरीरे सति
वै क्लेशः सर्वेषामात्मजेर्ध्रुवं अविद्याविषयाहिमानस्थितस्यैव योगिनः क्रोधादयो नाशमायांति धर्माधर्मौ च वै द्विजाः
नश्यत्तथा शरीरेण न पुनः संप्रयुज्यते स एव मुक्तः संसाराद्दोषत्रयविवर्जितः एवं ज्ञानं विना नास्ति ध्यानं ध्यानाद्द्विजर्षभाः
ज्ञानेन रागादि संपर्कं च वाचा परमार्थतः ब्रह्मैवाहमिति ज्ञानं ज्ञानान्नु ध्यानं समभ्यसेत् सहजागतं केचैव पापपरिप्लुतं भवेत्
या ज्ञानाग्निर्दहेत्तत्र प्रभूतं कर्म इंधनमिवानलः ज्ञानात्परं नास्ति सर्वपापविनाशनं अभ्यसेत्तु सदा ज्ञानं सर्वसंगविवर्जितं
ज्ञानिनः सर्वपापानि जीर्यंते नात्र संशयः क्रीडन्नपि न लिप्येत पापैर्नानाविधैरपि ज्ञानं यथा तथा ध्यानं तस्माद्ध्यानं समभ्य
सेत् ध्यानं निर्विषयं प्रोक्तं मेध्या सविषयं तथा ब्रह्माकारं समुपस्थितः षड्दशभिस्तथा तथा द्वादशधा योऽस्यैव पुनः षोडश

लिं
पु.
१२८

128

धाद्भमात्र द्विधाभ्यसेव योगींद्रो मुच्यते नात्र संशयः स्फटिकं चूतदाकारं विधूमांगारसन्निभं पीतं रक्तं सितं तं विद्युत्कोटिकोटि
समप्रभं अथवा वालसूर्याभं संवितं क्रमात्प्रयत्नतः न सितं वा सितं पीतं न स्मरेद्धूलविद्धवेत् अहिंसकः सत्यवादी अस्तेयः स
र्वयत्नतः परिग्रहविनिर्मुक्तो ब्रह्मचारी दृढव्रतः संतुष्टः शौचसंपन्नः स्वाध्यायनिरतः सदा मद्भक्त्याभ्यसेज्ज्ञानं गुरुसंप
र्कजं ध्रुवं न तु ध्यातेन ध्यात्वा तादात्म्यं चिंतेद्विजोत्तमाः न चाभिमन्यते योगी ज्ञानं स्यात् तेन संमतः न जानाति न स्पृशोत्यवली
नः स्वात्मनियः स्वयं न च स्पर्शं विजानाति सर्वैः समरसः स्मृतः पार्थिवे पटले ब्रह्मा वारिते तु स्थितो हरिः स्वयं वाह्नेयकालरु
द्रो वायुतत्त्वे महेश्वरः खे सदाशिवः सादाख्यमादेवं चिंतयेत् क्षितौ शर्वः स्मृतो देवो ह्यपां भव इति स्मृतः रुद्रः प
वत्पावके ह्युग्रो वायुः पवने स्थितः भीमः खे चैवमासैशो भास्करो मंडले स्थित ईशानः सोमबिंबे च महादेव इति स्मृतः पु
रुषः सूर्यबिंबे च ... व्यवस्थितः ... सर्वं पार्थिवं परिगीयते आप्यं च वामिति प्रोक्तं वर्णाख्यं वह्निरूप्यते
यत्स्वं वहति तद्वायुः खशिरं वद्विजोत्तमाः यदाकाशं च विज्ञानं तत्सहजं व्योमसन्निभं तथैव विप्रा विज्ञानं स्पर्शाख्यं वायुसं
भवं रूपं वाह्नेयमित्युक्तं माप्यं रसमयं द्विजाः गंधाख्यं पार्थिवं भूयः चिंतयेदात्मकारं क्रमात् नेत्रे च दक्षिणे वामे सोमं महादि
विभुं द्विजाः आजानुपृथिवी तत्त्वमानाभेर्वारिमंडले आकंठं वह्नितत्त्वं स्याल्ललाटांतं द्विजोत्तमाः वायव्यं चैव ललाटांतं व्यो
माख्यं वा शिरोग्रहं खशिरांतं ततो ब्रह्मव्योमव्योमोर्ध्वं ततः स्वयं आमात्व्योमम ... ध्यायेद्देवं प्राप्य स्वयं स्मरेत् न जीवः
प्रकृतिः सत्वं रजस्तामसितमः परं महानहंकारमिमानश्च तन्मात्राणींद्रियाणि च व्योमादीनि च भूतानि नैव ह परमार्थतः ५८
व्याप्तिः सततोऽभिषं ... इति त्वमिथीयते उदेति सूर्यो भीतश्च पवते वात एव च योगतेजः चंद्रमा वाह्निर्ज्वलत्यापो वहंति च

विभर्त्ति भूमिमाकाशमवकाशं ददाति च तदात्मायतनः सर्वं तस्मात्तच्चिंतयेद्बुधः तेनैवाधिष्ठितं तस्मादेतत्सर्वं द्विजोत्तमाः
तथा सर्वमयः सर्वं इति मत्वा स्मरेद्धि वै संसारविषतप्तानां ज्ञानध्यानामृतेन वै प्रतीकारैः समाख्यातो नान्यथा हि द्विजसत्त
माः ज्ञानं धर्मोद्भवं साक्षाज्ज्ञानाद्वैराग्यसंभवः वैराग्यात्परमं ज्ञानं परमार्थप्रकाशकं ज्ञानवैराग्ययुक्तस्य योगसिद्धिर्द्वि
जोत्तमाः योगसिद्ध्या विमुक्तिः स्यात्सत्वनिष्ठस्य नान्यथा सत्वशक्तिं समास्थाय शिवमभ्यर्च्चयेद्द्विजाः यः सत्वनिष्ठो मद्भ
क्तो मदर्चनपरायणः सर्वतो धर्मनिष्ठात्मा सदोत्साही समाहितः सर्वद्वंद्वसहो धीरः सर्वभूतहिते रतः ऋजुस्वभावः
सततं स्वस्थचित्तो मृदुः सदा अमानी बुद्धिमान् शांतस्त्यक्तस्पर्द्धो द्विजोत्तमाः सदा मुमुक्षुर्धर्मज्ञः स्वात्मलक्षणलक्षितः
ऋणत्रयविनिर्मुक्तः पूर्वजन्मनि पुण्यभाक् जरायुजो द्विजो भूत्वा श्रद्धयाचरणैः क्रमात् अन्यथा वापि शुश्रूषां कृत्वा कृ
तकृत्यो द्वियः? स्वकृतैर्द्विजः स्वर्गलोकमनुप्राप्य भुक्त्वा भोगाननुक्रमात् आसाद्य भारतं वर्षं ब्रह्मविद्भवति द्विजाः संपर्काज्ज्ञानमासाद्य
ज्ञानेनो योगविद्भवेत् क्रमेण मूलभूतं तत्त्वज्ञानं प्राप्नोति द्विजोत्तमाः तस्मादनेन मार्गेण त्यक्तसंगो दृढव्रतः संसारकाल
कूटाख्यान्मुच्यते मुनिपुंगवाः एवं संक्षेपतः प्रोक्तं मया युष्माकमच्युत ज्ञानस्यैवेह माहात्म्यं प्रसंगादेव शोभनं एवं पा
शुपतं प्रोक्तं कथितं गोप्यं रहस्यं वै न देयं यस्य कस्यापि शिवोक्तं मुनिपुंगवाः दातव्यं योगिने नित्यं भक्तिनिष्ठाय सुव्रताः यः
पठेत् शृणुयाद्वापि नरः संसारनाशनं स याति ब्रह्मसायुज्यं नात्र कार्या विचारणा इति श्रीमहापुराणे श्रीलैङ्गे उपरि
भागे संसारविषयकथनं नाम षडशीतितमोध्यायः अथ ऋषयः ऊचुः निशम्यैते महाभागाः कुमाराद्याः पिनाकिनं प्रोचुः
प्रणम्यैव विनीताः प्रसन्नं परमेश्वरं कुमाराद्या ऊचुः एवं वेदनया देव्या हिमवत्या महेश्वर क्रीडसे विविधैर्भावैः कथं वा

लि॰
गपु॰
१२५

क्रमिहार्हसि सूतउवाच एवमुक्तः प्रहस्येशः पिनाकीनीललोहितः प्राहनामंविकांप्रेक्ष्यप्राणीपत्यस्थितान्मुनीन् बंधमो॰
क्षौनवैवक्ष्यसमस्येवःपाशविग्रहः अज्ञानातःपशुर्जीवोविभुर्भोक्ताप्रमाणतः पुमानमायीवमायायाबद्धःकर्मभिर्भुज्यतेतदा:
त्तावंध्यानेनचवंधस्यमोक्षोनात्यात्मनोद्विजाः यएवमपिविद्वानैवतस्यापिनूचसर्वतः एवाविद्यास्यहंवेधः प्रतेषावश्रुतिः
स्मृतिः धृतिरेषातथानिष्टात्तानशक्तिः क्रियातथा इच्छास्यवतथाध्यानंहिविधेवनसंशयः नेत्येषाप्रकृतिर्जीवोविकृ
तिश्चविचारतः विकारैर्नैवयेषासामदसत्याक्तिवर्जिता पुरामातात्मासहयमकान्तमुदितं सत्त्वंविंशात्मकारेणसर्वव्याप्यान
याशिवःतदाप्रभृतिवैमातः प्रकृतिर्द्विजसत्तमाः सूतउवाच एवमुक्तातदापश्यपद्मवानीयरमेश्वरः भवानीवतमालो
कामायामहद्रव्ययातेमायामलविनिर्मुक्तामुनयः प्रेक्षपार्वतीं प्रीताबभूवुर्मुक्ताश्चतस्मादेषापरागतिः उमाशंकरयो
129 र्भेदोनास्त्येवपरमार्थतः द्विधासौरूपमास्थायस्थितईशानसंशयः यदाविद्वानसंगःस्यात्तदात्तापरमेष्ठिनः तदामुक्तिः
कारणादेवनान्यथाकर्मकोटिभिः क्रमोविवर्तितन्दृतविहद्दः परमेष्ठिनः प्रसादेनत्तएणान्मुक्तिः प्रतिज्ञेषानसंशयः गर्भ
स्थोजायमानोवाबालोवातरुणोपिवा वृद्धोवामुच्यतेजंतुःप्रसादात्परमेष्ठिनः अंडजः स्वेदजोवापिचोद्भिदोवाविमुच्यते
प्रसादाद्देवदेवस्यनात्रकार्याविचारणा एषएवजगत्त्राणाबंधमोक्षकरःशिवः भूर्भुवःस्वर्महश्चैवजनःसात्त्वात्तपस्तथा
था सत्यलोकस्तथांडानांकोटिकोटिशतानिच विग्रहंदेवदेवस्यतथांडावरणाष्टकं सप्तद्वीपेषुसर्वेषुपर्वतेषुवनेषुच
समुद्रेषुचसर्वेषुवायुस्कंदेषुसर्वतः तथान्येषुचलोकेषुवसंतिचचराचराः सर्वेभावाश्शजात्तृंनगातिस्त्वेषासएवहि सर्वो
रुद्रोनमस्तस्मैपुरुषायमहात्मने विश्वंभूतंतथाजातंवहुधारुद्रएवसः रुद्रास्तैषास्थितादेवीज्ञानवाक्शक्तिरंबिका इत्य १२५

वैखेचराः सिद्धाः जजन्तुः प्रीतमानसाः यदावलोकिताः सर्वेप्रसादादनयाविया तेदेवाःशिवसायुज्यंप्राप्तास्तेविचरोत्त
माः इतिमहापुराणेश्रीलैंगे उपरिभागेमुनिमोहप्रशंसनंनामचतुरशीतितमोऽध्यायः ८४ ऋषयऊचुः केनयोगेनवैसू
तगुणप्राप्तिस्तस्मात्मिह अणिमादिगुणोयेनाभवंत्येवहियोगिनः तत्सर्वंविस्तरात्सूतवक्तुमर्हसिसांप्रतं सूतउवाच अ
तऊर्ध्वंप्रवक्ष्यामियोगंपरमदुर्लभं पंचधासंस्मरेदादौप्राणायामंविशेषतः सनातनं कल्पयेदासनेपद्मंसोमसूर्याग्निसंयुतं षड्विंश
द्भक्तिसंयुक्तमष्टधावदितोनमाः ततःषोडशधावैवपुनर्दशधाद्विजाः स्मरेत्तनवधामध्येदेवादेवमुमापतिं अष्टश
क्तिसमायुक्तमष्टमूर्तिमजंशिवं नाभिस्थाष्टविधाहृद्वास्तु ततःषष्टिविधाः पुनः शाक्तयश्चतथासर्वागुणाष्टकसमन्विताः
एवंस्मरेत्क्रमेणैवलब्ध्वाज्ञानमनुत्तमं एवंपाशुपतंयोगंमोक्षसिद्धिप्रदायकं तस्यांगानामादयोविप्रानान्यथाकर्मकोटिभिः
तथाष्टगुणमैश्वर्यंयोगिनांसमुदाहृतं तत्सर्वंक्रमयोगेनप्रोच्यमानंनिबोधत अणिमालघिमाचैवमहिमाप्राप्तिरेव
च प्राकाम्यंचैवसर्वत्रईशित्वंचैवसर्वतः वशित्वमथसर्वत्रयत्रकामावसायिता तच्चापित्रिविधंज्ञेयमैश्वर्यंसर्वकामिकं
सावद्यंनिरवद्यंचसूक्ष्मंचैवप्रवर्तते सावद्यंनामयत्तत्रपंचभूतात्मकंस्मृतं इंद्रियाणिमनश्चैवसाहंकारंचतत्स्मृतः त
थासत्वाप्रवृत्तिस्तुपंचभूतात्मिकापुनः इंद्रियाणिमनश्चित्तंबुद्ध्यहंकारसंज्ञितं तथासर्वमयंचैवमात्मस्थाख्यातिरेवच
तयोगपदावैपिवतस्तमेवप्रवर्तते पुनरष्टगुणश्चापिसूक्ष्मेष्वेवविधीयते तस्यरूपंप्रवक्ष्यामियथाहभगवान्प्रभुः
त्रैलोक्येसर्वभूतानांदुष्प्रापंसमुदाहृतं तत्तस्यभवतिप्राप्यंभवितायोगिनांबलं लघुत्वेनप्लवनंलोकेरूपंसम्यक्सदाभवेत्
शीघ्रत्वंसर्वभूतेषुद्वितीयंतत्पदंस्मृतं त्रैलोक्येसर्वभूतानांमहिम्नाचैववंदिता महित्वंचापियोगस्थितिस्तियोयोगउच्यते

त्रैलोक्ये सर्वभूतेषु यथेष्टगमनं स्मृतं प्राकाम्यो विषयान्भुंक्ते यथा प्रतिहतः क्वचित् त्रैलोक्ये सर्वभूतानां सुखदुःखे प्रवर्त
ते ईशो भवति सर्वत्र प्रतिभागेन योगवित् वश्यानि वा स भूतानि त्रैलोक्ये सचराचरे इच्छया तस्य रूपाणि भवंति न भवंति
वै यत्र कामावशायित्वं त्रैलोक्ये सचराचरे शब्दः स्पर्शो रसो गंधो रूपं वैवमनस्तथा प्रवर्तंते स्य चेच्छातो न भवंति यथेच्छ
या न जायते न म्रियते नैच्छिद्यते न च भिद्यते न दह्यते न भग्यते लीयते न च लुप्यते न दीयते न दाह्यते न निर्विद्यते न कदाचन
क्रियते वा न सर्वत्र तथा विक्रियते न च अगंधरसरूपस्त्वस्पर्शः शब्दवर्जितः अवर्णो ह्यवरश्चैव त्वस्वर्णस्तु कर्हिचित्
स भुंक्ते विषयांश्चैव विषयैर्नैव युज्यते अणुत्वादिपरः सूक्ष्मः सूक्ष्मत्वादपवर्गिकः व्यापकस्त्वपवर्गश्च व्यापकः पुरुषः स्मृ
तः पुरुषः सूक्ष्मभावात्तु ऐश्वर्ये परमास्थितः गुणांतरमैश्वर्यं सर्वतः प्रतिमुच्यते ऐश्वर्यं चाप्रतीघातं प्राप्य योगमनुत्तमं
अपवर्गं ततो गच्छेत्सूक्ष्मं तत्परमं पदं एवं पाशुपतो योगो ज्ञातव्यो मुनिपुंगवाः स्वर्गापवर्गफलदः शिवसायुज्यकारणं
अथवा गतविज्ञानो योगी कर्म समारभेत् राजसं तामसं वापि भुक्त्वा तत्रैव मुच्यते तथा सुकृतकर्मा तु फलं स्वर्गे समश्नु
ते तस्मात्स्थानात्पुनर्भ्रष्टो मानुष्यमुपपद्यते तस्माद्ब्रह्म परं सौख्यं ब्रह्म शाश्वतमुत्तमं ब्रह्म चैवेह सेवेत ब्रह्मैव परमं सुखं
विश्वपादं शिरोग्रीवं विश्वेशं विश्वसंभवं विश्वगंधं विशालातं विश्वांबरधरं प्रभुं परिश्रमो हि युक्तानां महतार्थे न वर्तते
भूयो मनस्तु वर्जयति तस्मान्मोक्षः परं सुखं अथवा ध्यानसंयुक्तो ब्रह्मयज्ञपरायणः न तत्प्राप्यते शक्यो मन्वंतरशतैरपि
दृष्ट्वा तु पुरुषं दिव्यं विश्वाख्यं विश्वतोमुखं विश्वपादं शिरोग्रीवं विश्वेशं विश्वरूपिणं विश्वगंधं विश्वमाल्यं विश्वांबरधरं प्र १३०
भुं अहर्दिमहं संपतेते पतत्रिणा नैव भूयो जनयन्नेवमेव कविं पुराणमनुशासितारं सूक्ष्मात्सूक्ष्मं महतो महांतं योगे

नपश्यत्नेवचचक्षुषावृतिर्निंद्रियैर्युरुषंरुक्मवर्णं अलिंगिनं निर्गुणं चेकितारं नित्यं सदा सर्वगं सर्वसारं पश्यंति युक्ता ह्यव
लेप्रकाशं तद्भाविनास्तेजसादीप्यमानाः अपाणिपादोदरपार्श्वजिह्वोत्तींद्रियोवापि सुसूक्ष्म एकः पश्यत्यचक्षुः सश्रु
णोत्यकर्णः नचास्तबुद्धिर्नचर्विनयमस्ति सवेदसर्वं नचतस्यवेत्तास्ति तमाहुरग्र्यं पुरुषं महांतं अचेतनां सर्वगतां सुसूक्ष्मां प्रस
वधर्मिणीं प्रकृतिं सर्वभूतानां युक्ताः पश्यंति योगिनः सर्वतःपाणिपादं तं सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमल्लोके स
र्वमावृत्यतिष्ठति युक्तायोगेनचेशानं सर्वतस्य सनातनं पुरुषं सर्वभूतानां तस्माद्विद्वान्मुच्यते भूतात्मानं परात्मानं प
रमात्मानमव्ययं सर्वात्मानं परंब्रह्मतद्वैध्यात्वानमुच्यते पवनोद्दियघाणप्राणोविचरन्सर्वमूर्तिषु पुरेशेतेपरेचास्तेनतस्मा
त्पुरुषउच्यते अघवेत्वमधर्मैस्तुसमावशेषैः स्वकर्मभिः ततस्तुब्रह्मगर्भेवैशुक्रशोणितसंयुते स्त्रीपुंसोः संप्रयोगेहिजाय
तेसततः प्रभुः ततस्तुगर्भकालेचकललंनामजायते स्त्रीपिंडस्तुयथाचक्रेचक्रावर्तेनपीडिताः हस्ताभ्यांक्रियमाणस्तु
तौचतनमनुगच्छति एवमाध्यात्मिकोयुक्तोवायुनासर्वदेरितः यदियातिप्रभुर्वामितन्मयपर्येमहेश्वरं यावद्दिवेसर्वोवा
युर्जातमात्रेनसंस्पृशेत तावत्कालंमहादेवसर्वयामीतिचिंतयन् जायतेमानुषस्तत्रयथारूपंयथावयः वायुसंभवतेरवा
तेवानाहृवतिवैजलं जलात्संभवतिप्राणः प्राणाच्छुक्रंविवर्धते रक्तभागास्त्वयस्त्रिंशाद्धैतोभागाश्चतुर्दश भागतोर्द्धफलं
कृत्वातातनोगर्भोनिरवस्यते ततस्तुगर्भसंयुक्तः पंचभिर्वायुभिर्हृतः पित्तः शरीरात्प्रत्यंगंरूपमस्योपजायते ततोस्यमातेरा
हारंपीतलीढप्रवेशनात् नाभिदेशेनयेत्प्राणांस्तस्याधाराद्विदेहिनां नवमासान्परिक्लिष्टः संवेष्टितशिरोधरः वेष्टितः स
वगात्रेश्चअपर्याप्तप्रवेशनः नवमासोषितश्चापियोगर्भेदेवास्रवः ततः स्वकर्मभिः पापैर्निरयं संप्रपद्यते असिपत्रवनंचै

लि.
पु.
१२

वशात्सोपि देवदेवं तथा नादतेनं मतां चैव प्रयशोणितमत्तिरां यथाल्पापसंछिन्नाः संश्लेषमुपयांति वै तथाछिन्नाश्च मि
नाश्च यातनास्थानमागता पर्वजीवाश्रितेः पापैस्तप्यमानाः स्वयं कृतैः प्राप्नुयुः कर्मभिः शेषैः स्थावरादि वेतरत् एकेन
वत्तगात्रं सर्वमुत्सृज्य वैजनं एकेनैव न भोक्तव्यं तस्मात्सुकृतमाचरेत् न हि तं प्रस्थितं कश्चित् गच्छंतमनुगच्छति यदेनेन
कृतं कर्म तदेनमनुगच्छति ये निस्तं व्रतविषयेषु संप्रसक्ताः क्रोशंतः सततमनिष्टसंप्रयोगे पुण्ये परिगतवेदनाशरीर
नकौमिः समस्तधर्मयातनाभिः कर्मणा मनसा वाचा यदि तीव्रां निषेवते तदभ्यासो हरत्येनं तस्मात्कल्याणमाचरेत्
भ्रनादिमास्त्र देवः स्यात्सर्वकर्माणि रहितः संसारं तमसा घोरं षड्विधं प्रतिपद्यते मानुष्यात्पशुभावश्च पशुभावान्मृगो
भवेत् मृगत्वात्पक्षिभावश्च तस्माच्चैव सरीसृपः सरीसृपत्वाद्गच्छेत स्थावरत्वं न संशयः स्थावरत्वे महः तुष्ट्वां ते यावदुद्यते
जनः कुलालचक्रवद्भ्रांतस्तत्रैव परिवर्तते इत्येवं हि मनुष्यादिः संसारः स्थावरांतिकः विज्ञेयस्तामसो नाम तत्रैव परिव
र्तते सात्विकश्चापि संसारो ब्रह्मादिपरिकीर्तितः पिशाचांतः स विज्ञेयः सर्वस्थानेषु देहिनां ब्रह्मत्वे केवलं सत्त्वं स्थावरे के
वलं तमः चतुर्दशानां स्थानानां मध्ये तिष्ठति वै रजः सर्वमुद्भिद्यमानेषु वेदनार्त्तस्य देहिनः ततस्तत्परमं ब्रह्म कथं विप्राः
स्मरिष्यति संसारः कर्मधर्मादिभावनाभिः प्रचोदितः मानुष्यं भजते नित्यं तस्माद्ध्यानं समाचरेत् चतुर्दशविधं ह्येतद्बुधः सं
सारमंडलं नित्यं समाचरेद्धर्मं संसारभयपीडितः ततस्तरति संसारं कर्मणा परिवर्जितः तस्माच्च सततं युक्तो ध्यानतत्पर
मुपासकाः ततः संसाभियोगी यथात्मानं स पश्यति यच्च पवं परं ज्योतिरेष देहेतरस्तनमः विहंगो हि षष्ठं भेदाद्भूतानां चैव शा
श्वतः तदेनं परमात्मानमग्निं वै विचक्षणो मुदं सर्वदिस्थं सर्वभूतानामुपासीत महेश्वरं नवधा संस्थितं देवं स्वशक्त्या परिमंडितं १२

१३

अङ्गुष्ठाभ्यांवाङ्गुष्ठाधो वै वनयावाङ्गुष्ठविधेनच तस्यार्थं संस्थितं वह्निं संदीप्य च परिरक्षिते ध्यानाय यावदेवेशं रुद्रं भुवननायकं
कृत्वा पंचाहुतीः सम्यक् स्थितो गतमानसः वैश्वानरं हृदि स्थं च यथावन्नु दक्षपूर्वशः अथ पुनः स्रक्कस्यापपत्सुर्मीकृत्वा स्वपा
दरेत् प्राणायेति तत प्राशेत्स्व घमात्स्वाहुतिः स्वतः अपानाय द्वितीयां च तृतीयां तु व्यानाय वा उदानाय च तस्थौ स्वात्समाना
येति पंचमीं स्वाहाकारैः पृथग्जुह्वान् शेषं भुंजीत कामतः अथः पुनः सकृत्स्यापप आत्मनो हृदयं स्पृशेत् प्राणानां ग्रंथिरस्या
त्मा रुद्रोस्यात्माविवर्तकः रुद्रो वै ह्यात्मनः प्राणायवमाप्यायये त्स्वयं प्राणो निविष्टो वै हृदः तस्मात् प्राणमयस्त्वं प्राणाय वै
वह्निदायजत्स्वात्मस्तत्सुतमम् शिवो विश्वे हमामीश स्वाहा ब्रह्मात्मने स्वयं एवं पंचाहुतीश्चैव आहिकं कीर्तशासनात् पुरः
वा सिपुरेशानेनमंत्रप्रमाणतः आश्रितश्चैव मंत्रइमीशः परमधारणः सर्वस्य जगतश्चैव प्रभुः प्राणोस्मिप्राश्यतः त्वं देवाना
मसि श्रेष्ठो रुद्रस्त्वं च तनोहवः मृडस्त्वमन्नुतस्त्वं च तमेतदविलेयथा इत्येवं कार्थितं सर्वं प्राणाग्निप्रसंगतः योगाचारः स्वयं
तेन ब्रह्मणा कथितः पुरा एवं पाशुपतं ज्ञानं ज्ञानयं च प्रयत्नतः भस्मस्नायी भवेन्नित्यं भस्मशायी सदा भवेत् यः पठेच्छृणु
याद्वापि श्रावयेद्वा द्विजोत्तमान् देवकर्मगणोपि चैव स याति परमां गतिं इति श्रीमहापुराणे श्रीलिंगे उपरिभागे चतुरशीति
तमोध्यायः ८४ सूत उवाच अतऊर्ध्वं प्रवक्ष्यामि शौचाचारस्य लक्षणं यदनुष्ठाय शुद्धात्मा परां गतिमाप्नुयात् ब्रह्मणाक
थितं पूर्वं सर्वभूतहिताय वै संक्षेपात्सर्ववेदांत संचयं ब्रह्मवादिनां उदयार्थं तु शौचानां मुनीनां सुतमं पदं यस्तत्राप्रमत्तः
यनः प्रभुः तस्मादहमुपश्रुत्य युष्माकं प्रवदामि वै सर्वेष्ट एवं तव वचनेन नमस्कृत्य महेश्वरं श्रीसनत्कुमार उवाच कथं पशुपति
देवः पशवः के निरूपिताः कैः पाशैस्ते निबध्यन्ते विमुच्यन्ते च के पुनः शैलादिरुवाच सनत्कुमार वक्ष्यामि सर्वमेतद्यथातथं
रुद्रभक्तस्य शान्तस्य तव कल्याणचेतसः पशवः परिकीर्त्यन्ते समस्ताः पशुवर्तिनः तेषां पतित्वात् भगवान्रुद्रः पशुपतिः स्मृतः अ
नादिनिधनो धाता भगवान्विष्णुरव्ययः मायापाशेन बध्नाति पशुवत्परमेश्वरः स एव मोचकस्तेषां ज्ञानयोगेन सेवितः अवि
द्यापशुबद्धानां नान्यो मोचक इष्यते तमृते परमात्मानं शंकरं परमेश्वरं चतुर्विंशतितत्त्वानि पाशा वै परमेष्ठिनः तैः पाशैर्मोच
यत्येकः शिवजीवानुपाश्रितः निबध्नाति पशूनेकः चतुर्विंशतिपाशकैः स एव भगवान्रुद्रो मोचयत्यपि सेवितः दशेंद्रिय
मयैः पाशैरंतःकरणसंभवैः भूततन्मात्रपाशैश्च पशून्मोचयति प्रभुः इंद्रियार्थमयैः पाशैर्बध्वा विषयिणः प्रभुः पाशामु
क्तो भवेत्सेव परमेश्वरसेवया भजत्येष यथा तैर्वै सेवा या परिकीर्तिता तस्मात्सेवा बुधैः प्रोक्ता भक्तिशब्देन भूयसी ब्रह्मादिस्त
म्बपर्यंतं पशुबद्ध्वा महेश्वरः त्रिभिर्गुणमयैः पाशैः कार्यं कारयति स्वयं दृढेन भक्तियोगेन पशुभिः पर्युपासितः मोचयत्येव ता
सयः शंकरः परमेश्वरः भजनं भक्तिरित्युक्ता वाङ्मनःकायकर्मभिः सर्वकार्येणहेतुना पाशच्छेदपटीयसी सत्यः सर्वग इत्यादि

लि.
गपु.
७७

१७७

शिवस्य गुणाचिंतनं रूपोपादानचिंतां च मानसं भजनं विदुः वाचिकं भजनं धीराः प्रणामादिजपं विदुः कायिकं भजनं सद्भिः प्रा
णायामादिकथ्यते धर्माधर्ममयैः पाशैर्बंधको देहिनामयं मोचकः शिवएवैको भगवान्परमेश्वरः चतुर्विंशतितत्वानि मायाक
र्मगुणा इति कीर्त्यंते विषयः पाशाः एतैर्जीवनिबंधनाः तैर्बद्धाः शिवभक्तो वमुक्तास्ते सर्वदेहिनः पंचक्लेशमयैः पाशैः पशून्बध्ना
ति शंकरः सएव मोचकस्तेषां भक्त्या सम्यगुपासितः अविद्यामस्मितां रागं द्वेषं च द्विपदां वरः वदंत्यभिनिवेशं च क्लेशान्पाशुत्व
मागतान् तमो मोहो महामोहस्तामिस्र इति पंडिताः अंधतामिस्रमित्याहुरविद्यां पंचधास्थितां तान्सर्वान्मुनिशार्दूल सर्वान्श्चैवा
पविद्यया शिवो मोचयति श्रीमान्नान्यः कश्चिद्विमोचकः अविद्यां तम इत्याहुरस्मितां मोह इत्यपि महामोह इति प्राज्ञा रागं योगपरा
यणाः द्वेषं तामिस्रमित्याहुरंधतामिस्रमित्यपि तथैवाभिनिवेशं च मिथ्याज्ञानं विवेकिनः तमसोष्टविधा भेदा मोहश्चाष्टविधः
स्मृताः महामोहप्रभेदाश्च बुधैर्दशविधाः स्मृताः अष्टादशविधं प्राहुस्तामिस्रं च विचक्षणाः अंधतामिस्रभेदाश्च तथाष्टादशधाः स्मृ
ताः अविद्यास्य संबंधो नातीतो नाप्यनागतः भवेद्रागेण देवस्य शंभोरागोनिवासिनः नैवास्य यथा संधिस्तस्य देवस्य नापि च
कालत्रयेपि संबंधस्तस्य द्वेषेण नो भवेत् मयातीतस्य देवस्य स्थाणोः पशुपतेर्विभोः तथैवाभिनिवेशेन संबंधेन कदाचन शंकर
स्य शरण्यस्य शिवस्य परमात्मनः कुशलाकुशलैस्तस्य संबंधो नैव कर्मभिः भवेत्कालत्रये शंभोरविद्यामतिवर्तिनः विपाकैः क
र्मणां वापि न भवेद्देवसंगतः कालेषु त्रिषु सर्वज्ञशिवस्य शिवदायिनः सुखदुःखैरसंस्पृष्टः कालत्रितयवर्तिभिः ज्ञानैर्विनश्व
रैर्भावैर्ध्यापनादात्मकः परस्परामयैरपरामृष्टकालत्रितयगोचरैः धियां पतिः स्वयंभूरेष महादेवो महेश्वरः अस्पृष्टः कर्मसंस्का ७७
रैः कालत्रितयवर्तिभिः तथैव भोगसंस्कारैर्भगवानंतकांतकः सविशेषः परो देवो भगवान्परमेश्वरः चेतनाचेतनायुक्तो प्र

पंवाद्याविलान्पर: लोकेशातिशयत्वेनजनै: सूर्यविलोकितै: शिवेनातिशयत्वेननत्वंप्राज्ञमनीषिणा: प्रतिसर्गप्रसूतानांब्र
ह्मणाशास्त्रविस्तरं उपदेष्टासपवादौकालावच्छेदवर्तिनां कालावच्छेदयुक्तानांगुरूणामप्यसौगुरु: सर्वेषामेवसर्वेश: काला
वच्छेदवर्जित: अनादिरेवसंबंधोविज्ञानातिशय:पर: स्थितास्त्रेनीदृश: सर्वपरिशुद्ध: स्वभावत: आत्मप्रयोजनाभावेपरानुग्र
हएवहि प्रयोजनंसमस्तानांकार्याणांपरमेष्ठिन: प्रणवोवाचकस्तस्यशिवस्यपरमात्मन: शिवरुद्रादिशब्दानांप्रणवोपिपर:
स्मृत: शंभो: प्रणववाच्यस्यभावनाभजनादपि यासिद्धि: सापराप्राप्याभवत्येवनसंशय: तानन्तंप्रयत्नेनयोगंपाशुपतं
परं उक्तंवेदेवेदेवैनसर्वेषामनुकंपया सहोवाच अस्थूलमनंतंह्रस्वञ्चस्वदीर्घमलोहितमम्नं वर्कसंस्पर्शसवत्तषकमशोकम
वागमम्लनमसंगसंगधमरसमतेजस्कमप्रमाणमसखमनामगोत्रमनगणमनायसप्यमरूपपारयोसर्वातीतमपूर्वमस्तमस
मेहतमपूर्वमनपरमनंतनसर्वोन्मुक्तदभौतिकस्त्रनएनकालत्रयेतानापरंपशुपतिंप्रभुं योगेपाशुपतेवास्मिन्नर्थमर्थकिलो
तमे लवाकारंप्रदीपंस्यागायगरहपतिंस्मरतनान्मंतरस्य संयमद्दारवासंपवनपट्टनरंनायकंचेंद्रियाणां वागजालैकसहेतोविन
टस्मितिमवृंदएपतेनैवकिंचि देहस्थंपाशुशंमुग्रमसिकिमपरंशास्त्रजालांधकारे एवंसम्यग्बुध्वात्मा.... मुनीनाम
मयंचात्मनियोजयेत् इतिश्रीलिंगपुराणेउपरिभागेदशोत्तरशततमोध्याय: ॥ सनत्कुमारउवाच भूयएवममाचक्ष्वमाहिमान
मुपायते: भवभक्तमहाप्राज्ञभगवन्नंदिकेश्वर शैलादिरुवाच सनत्कुमारसंक्षेपात्वक्ष्याम्यशेषत: महिमानंमहेशस्यभव
स्यपरमेष्ठिन: नास्यप्रकृतिबंधोभूयापिबंधोनकश्चन जिह्वाबंधोनतस्यास्तित्राणबंधोनकश्चन पादबंध: पाणिबंधोवाग्बंध:
शैवमस्नत: उपस्थेंद्रियबंधश्चभूततन्मात्रबंधने नित्यशुद्ध:स्वभावेननबंधनंनिसर्गत: नित्यमुक्तइतिप्रोक्तोमुनिभिस्तत्ववेदिभि:

लिं॰
पु॰
१२८

अनादिमध्यनिधनस्यशिवस्यपरमेष्ठिनः बुद्धिंसूतेनियोगेनप्रकृतिःपुरुषोविना अहंकारंप्रसूतेसाबुद्धिस्तस्यनियोगतः
अंतर्यामीनिविष्टेषुप्रसिद्धस्यस्वभावतः इंद्रियाणिदशैकंचतन्मात्राणिवशाघते अहंकारोपिसंसूतेशिवस्यपरमेष्ठिनः
तन्मात्राणिनियोगेनतस्यसंसृजतेप्रभोः महाभूतान्यशेषेणमहादेवस्यधीमतः ब्रह्मादीनांचभूतानांतृणांतानांहिदेहिनां
महाभूतान्यशेषाणिजनयंतिशिवाज्ञया अव्ययस्यातिसर्वाद्याबुद्धिस्तस्याज्ञयाविभोः स्वभावसिद्धमैश्वर्यंस्वभावादेवभूतयः
तस्याज्ञयासमस्तार्थानहंकारोपिमन्यते चित्तंचेतयतेचापिमनःसंकल्पइत्यपि श्रोत्रंशृणोतितच्छब्दान्शास्तृस्पर्शादिकंचन प्र
भोराज्ञाबलेनैवभवस्यपरमेष्ठिनः वदनंकुरुतेवाकंनमौनादिकदाचन शरीरिणामशेषाणांतस्यदेवस्यशासनात् करोति
पाणिरादानंगमनादिकदाचन सर्वेषामेवजंतूनांनियमादेववेधसः विहारंकुरुतेपादोनोत्सर्गादिकदाचन समस्तदेहि
नांशिवस्यैवनियोगतः उत्सर्गंकुरुतेपायुर्नबंधनंकदाचन जंतोर्जातस्यसर्वस्यपरमेश्वरशासनात् आनंदंकुरुतेपस्थ
नपस्थोवचनाद्विभोः सर्वेषामेवभूतानामीश्वरस्यैवशासनात् अवकाशाद्विशेषाणांभूतानांसंप्रयच्छति आकाशःसर्वदा
तस्यपरमस्यैवशासनात् निदेशेनशिवस्यैवभेदैःस्वैरावहादिभिः विभर्तिसर्वभूतानांशरीराणिप्रभंजनः निदेशाद्देवदेवस्य
समस्तंधगतोमरुत् लोकयात्रांवहत्येवभेदैस्तैरावहादिभिः नागाद्यैःपंचभिर्भेदैःशरीरेषुप्रवर्तते उपदेशेनदेवस्यपरमस्य
समीरणः हव्यंवहतिदेवानांकव्यंकव्याशिनामपि पाकंचकुरुतेवह्निःशंकरस्यैवशासनात् भुक्तमाहारजातंयत्पचते
देहिनांतथा उदरस्थःसदावह्निर्विश्वेश्वरनियोगतः संजीवयत्यशेषाणिभूतान्यापस्तदाज्ञया अनुलंघ्याहिसर्वेषामाज्ञात १२८
स्यगरीयसी चराचराणिभूतानिबिभर्त्येवतदाज्ञया आज्ञयातस्यदेवस्यसर्वदेवैरलंघ्यया विश्वंभरासदाकालेलोकैःसर्वैरलं

178

ज्ञया देवामान्यस्माद्दंति त्रैलोक्यमभिरक्षति आज्ञया देवदेवस्य देवदेवः पुरंदरः अधार्मिकानां वै नाशं करोति शिवशासना
त् आज्ञया देवदेवस्य पाशैर्बध्नाति शाश्वतं धनदानं रूपं सर्वेषां प्राणिनां च प्रयच्छति विघ्नं विघ्नेश्वरस्तस्य शासनात्परमेष्ठिनः पुष्टा
त्योषधिजातानि प्रह्लादयति सर्वतः अमृतांशुः कलाधारः कालः कालस्य शासनात् आदित्या वसवो रुद्रा अश्विनौ मरुतस्तथा
अन्याश्च देवताः सर्वाः तच्छासनविनिर्मिताः गंधर्वदेवसिद्धाश्च सिद्धाः साध्याश्च चारणाः यक्षरक्षःपिशाचाश्च स्थिताः शासने वेध
सः ग्रहनक्षत्रताराश्च यज्ञा वेदास्तपांसि च ऋषीणां च गणाः सर्वे शासनात्तस्य धिष्ठिताः कन्याशिनां गणाः सप्त समुद्रा गिरिसिंधवः
शासने तस्य वर्त्तंते काननानि सरांसि च कलाकाष्ठामुहूर्ताश्च निमेषा दिवसाः क्षणाः ऋत्वब्दपक्षमासाश्च नियोगात्तस्य धिष्ठिताः
युगमन्वंतराण्यस्य शंभोस्तिष्ठंति शासनात् पराश्चैव परार्धाश्च कालभेदास्तथापरे वर्त्तंते सर्वभूताये समेतानि समंततः अतीतान्य
प्यसंख्यानि ब्रह्मांडानि तदाज्ञया देवानां जातयश्चाष्टौ तिरश्चां पंच जातयः मनुष्याश्च प्रवर्त्तंते तस्य शाश्वतशासितुः चतुर्विधानि भू
तानि स्थावराणि चराणि च युगमन्वंतराण्यस्य देवदेवस्य धीमतः जातानि भूतवृंदानि चतुर्दशसु योनिषु सर्वलोकनिषण्णानि
न्यथा स्थावराणि च ब्रह्मांडान्यपरिशेषाणि तिष्ठंत्यस्यैव शासनात् वर्त्तमानानि सर्वाणि ब्रह्मांडानि तदाज्ञया प्रवृत्तानि पदार्थौघैः
सहितानि समंततः ब्रह्मांडानि भविष्यंति सह वस्तुभिरात्मकैः करिष्यंति शिवस्याज्ञां सर्वे सावरणाः सह इति श्रीलिंगपुराणे उपरिभा
गे एकादशशततमोऽध्यायः ॥२ सनत्कुमार उवाच विभूतिं शिवयोर्मह्यमाचक्ष्व गणाधिप परापरविदां श्रेष्ठ परमेश्वरभावित नं
दिकेश्वर उवाच हंत ते कथयिष्यामि विभूतिं शिवयोरहं सनत्कुमार योगींद्र ब्रह्मणस्तनयोत्तम परमात्मा शिवः प्रोक्तः शिवा सा च प्र
कीर्त्तिता शिवमेवेश्वरं प्राहुर्मायां गौरीं विदुर्बुधाः पुरुषं शंकरं प्राहुर्गौरीं च प्रकृतिं द्विजाः अर्थः शंभुः शिवा वाणी दिवसोजः शिवा

लि
गपु०
१२५

179

विशा समस्तंतन्महादेवोरुद्राणी रुदितास्मृता आकाशः शंकरोदेवः पृथिवीशंकरप्रिया समुद्रोभगवान्रुद्रोवेलाशैलेंद्रकन्य
का वृक्षःशूलायुधोदेवः शूलपाणिःप्रियालता ब्रह्माहरोपिसावित्रीशंकरार्धशरीरिणी विष्णुर्महेश्वरोलक्ष्मीभवानीपरमेश्वरी
वज्रपाणिर्महादेवः शचीशैलेंद्रकन्यका जातवेदाःस्वयंरुद्रःस्वाहासर्वार्थदायिनी यमस्त्रियंबकोदेवस्तत्प्रियागिरिकन्यका व
रुणोभगवान्रुद्रोगौरीसर्वार्थदायिनी बालेंदुशेखरोवायुःशिवाशिवमनोरमा चंद्रार्द्धमौलिर्यक्षेंद्रःस्वयंऋद्धिस्तथास्मृता चंद्रा
र्धशेखरःसूर्योरोहिणीरुद्रवल्लभा सप्तसप्तिःशिवाकोनाउमादेवीसुवर्चसा षण्मुखोस्मिपुरंध्रःसौरदेवसेनाहरप्रिया उमाप्रसूति
वैयज्ञोदेवदेवोमहेश्वरः पुरुषाख्योमनुःशंभुः शतरूपाशिवप्रिया विडर्भवानीपुरुषःसानविंवरमेश्वरः भृगुर्भगाक्षिहादेवः
ख्यातिस्त्रिनयनप्रिया मरीचिर्भगवान्रुद्रः संभूतिर्वल्लभाविभोः गंगाधरोंगिराज्ञेयः स्मृतिःसाक्षादुमास्मृता पुलस्त्यःशशभृ
मौलिःप्रीतिःकांतापिनाकिनः पुलहस्त्रिपुरध्वंसीसन्नतिर्दयिताविभोः त्रिनेत्रोत्रिरुमासाक्षादनसूयास्मृताबुधैः ऊर्जामाक्रु
मांहुहाः वसिष्ठश्चमहेश्वरं शंकरःपुरुषःसर्वेस्त्रियःसर्वामहेश्वरी पुल्लिंगशब्दवाच्यायेतेचरुद्राःप्रकीर्तिताः स्त्रीलिंगशब्दवा
च्यायाःसर्वागौर्याविभूतयः सर्वेस्त्रीपुरुषाःप्रोक्ताःतयोरेवविभूतयः यस्ययस्यपदार्थस्ययायाशक्तिरुदाहृता सासाविश्वेश्व
रीदेवीसदासर्वोमहेश्वरः शक्तिमंतःपदार्थायेतेवैशर्वविभूतयः पदार्थशक्तयोयायाःतागौरीतिविदुर्बुधाः अष्टौप्रकृतयो
देव्यामूर्तयःपरिकीर्तिताः तथाष्टप्रकृतयस्तस्यादेहबद्धविभूतयः विस्फुलिंगायथातावदग्नेर्बहुविधाःस्मृताः जीवाःसर्वेतथा
शर्वेहंहसत्वमुपागताः गौरिरूपाणिसर्वाणिशरीराणिशरीरिणां शरीरिणास्तथासर्वेशंकरांशाव्यवस्थिताः श्रावंसर्वमुमारूपं
श्रोतादेवोमहेश्वरः विषयत्वेविभूर्ष्यंतेविषयात्मकतामुमा द्रष्टव्यंदृष्टजातेनयत्नेशंकरवल्लभा द्रष्टासएवविश्वात्माबालचंद्रार्द्धशे १२५

त्वेः इत्थं वसुप्रजारूपं बिभर्ति भुवनेश्वरी स्रष्टा विश्वेश्वरो देवः शक्तिः कुंडशिवो मतः यजमानस्वरूपं श्रेयोजातं तव सर्वशः
देवो सविता नाभोक्ता त्राता च भुवनेश्वरी मंतव्यवस्तु तापनेन महादेवो महेश्वरी मंता देवः स विश्वात्मा महादेवो महेश्वरः बोद्धव्यव
स्तुरूपं च बिभर्ति भववल्लभा देवः सर्वस्य भगवान्बोद्धा बालेंदुशेखरः पीठाकृतिरुमा देवी लिंगरूपश्च शंकरः प्रतिष्ठाप्य महादे
वीशं जयंति सुरासुराः ये ये पदार्था लिंगांकास्ते ते शर्वविभूतयः अर्था भगांकिता ये ये ते ते गौर्या विभूतयः सर्गपानात्तु लोका
नाब्रह्मांडावरणाष्टके तेषां सर्वस्वरूपत्वात् देवो महेश्वरः बिभर्ति देवतां देवी त्रिपुरांतकवल्लभा तेन गात्रमजो येन भगवान्
नंतकांतकः सर्वाकारौ स्थितावेतौ नरैः श्रेयोर्थिभिः शिवौ पूजनीयौ नमस्कार्यौ चिंतनीयौ च सर्वदा शिवलिंगं परित्यज्य यज
ते वान्यदेवताः स रूपः सहदेशो वै रौरवं नरकं व्रजेत् शिवभक्तो न यो राजा भक्तोन्येषु सुरेषु यः स्वपतिं युवतिस्त्यक्त्वा यथा जारे
षु रज्यते ब्रह्मादयः सुराः सर्वे राजानश्च महर्द्धिकाः मानवा मुनयश्चैव सर्वे लिंगं जयंति च विष्णुनारायणाद्दिवा समेसं ब्रह्म
णाः सतं स्थापितं विधिवद्भक्त्या लिंगं तोरेनदीपतेः कृत्वा पापसहस्राणि हत्वा विप्रशतं तथा भवत्समाश्रितो हृद्यमुक्तेनात्र सं
शयः सर्वे लिंगमया लोकाः सर्वे लिंगे प्रतिष्ठिताः तस्मात्सर्वं ये हि लिंगं यदीच्छेच्छाश्वतं पदं तेन स्तेनमवाप्नोति भगवानंतकः प्रभुः
सर्वाकारौ स्थितावेतौ नरैः श्रेयोर्थिभिः शिवौ पूजनीयौ नमस्कार्यौ चिंतनीयौ च सर्वदा इति श्रीलिंगपुराणे उपरिभागे नाम द्वा
दशोनरपात्रमोध्यायः ॥१२ सनत्कुमार उवाच मूर्तयोष्टौ ममाचक्ष्व शंकरस्य महात्मनः विश्वरूपस्य देवस्य गोश्वरस्य महेश्वरं नंदिके
श्वर उवाच हंत ते कथयिष्यामि महिमानमुमापतेः विश्वरूपस्य देवस्य समरोजभवसंभवः भूम्यापोग्निर्मरुद्व्योम भास्करो दीक्षितः
शशी भवस्य मूर्तयः प्रोक्ताः शिवस्य परमेष्ठिनः स्वात्मेडस्मर्यं च न्यं भीमरायापावकरस्त्वपि तस्मादष्टमूर्तयः प्रोक्ताः शिवस्य परमेष्ठि

लिं॰
गपु॰
१८०

नः अग्निहोत्रेर्पितेतेन सूर्यात्मनि महात्मनि तद्विभूतितया सर्वे देवाः संर्पंति सर्वदा वृक्षस्य मूलसेकेन यथा शाखोपशाखिनां त
थात्तस्य जनाद्देवस्तस्माः सर्वे विभूतयः तस्य द्वादशधा भिन्नं रूपं सर्वात्मकं प्रभोः सर्वदेवात्मके याज्यं यजंति मुनिपुंगवः अमृताख्या
कलास्तस्य सर्वस्यादित्यरूपिणः भूतसंजीवनी दृष्टा लोकेस्मिन्प्यायनेतथा चंद्राख्याः किरणास्तस्य धूर्जटेर्भास्करात्मनः दिवाक
रात्मनस्तस्य हरिकेशाः द्वयः करः नक्षत्रबोधकश्चैव प्रसिद्धः परमेष्ठिनः यमो वसारिनिख्यातोयः सर्वस्मिन्विस्फुलिनः लोहितां
गप्रपुष्णाति सर्वदा परमात्मनः विश्ववावारतिख्याताः किरणास्तस्य शूलिनः उक्राः पोषकभावेन प्रख्याताः सूर्यरूपिणः गर्जित
स्य समाख्यातः शिवस्याष्टशनेश्वरः हरिदश्वात्मनस्तस्य प्रपुष्णाति दिवानिशं औषधीनां विवृद्ध्यर्थं हिमवृष्टिं वितनवते शुक्राख्या
रश्मयस्तस्य शंभोर्मार्तंडरूपिणः धर्मं वितनवते लोकेस्य च पाकादिकारणं सूर्यात्मकस्य देवस्य विश्वयोनेरुमापतेः सुषुम्नाख्या
स दारश्मिः पुष्णाति शिशिरं सोद्युतिं दिवाकरात्मनस्तस्य प्रपुष्णाति दिवानिशं सर्वेषामेव भूतानामात्मन्येव व्यवस्थितः सूर्यात्मको
महादेवो देवस्यातिरुमापतेः सौम्यानां तत्र जातानां प्रकृतित्वमुपागतः तस्य सौम्याह्वया मूर्तिः शंकरस्य जगद्गुरोः तस्य सौम्या
त्मकं रूपं शुक्रेनेव व्यवस्थितं शरीरभाजां सर्वेषां देवस्यांतकशासिनः शरीरभाजां सर्वेषां देवस्यांतकशासिनः शरीरभाजां स
र्वेषां मनस्येव व्यवस्थितः वपुः सोमात्मकं शंभोः तस्य सर्वजगद्गुरोः शंभोः षोडशधा भिन्नाः स्मृतामृतकलात्मनः सर्वभूतशरी
रेषु सौम्याख्यो मूर्तिरुत्तमा देवान्पितॄश्च पुष्णाति स्वधया स्मृतया सदा मूर्तिः सोमाह्वया तस्य देवदेवस्य शासिनः पुष्णात्योषधिजा
तानि पातिर्भौवैनर्विस्फुरतः सोमात्मके वपुस्तस्य शंभोर्भगवतः प्रभोः देवाहिरण्मयः सृष्टापरस्य सर्वविवेकिनः कारणानमशेषाणां १८०
देवतानां निराकृतिः जीवदेवनास्थितेतास्मिन्नाप्यैव सोमात्मके प्रभोः नगुरा विलयं यांति सर्वलोकैकरक्षणो यजमानाह्वया मूर्तिः

शैवीदद्युरहर्निशं पुष्णातिदेवताः सर्वाः कव्यैः पितृगणानपि यजमानाह्वयातस्मात्तनुस्वाहेतिवात्तया हस्याभावयतिस्पष्टं
सर्वमेवपराऽपरं अन्तस्थंचबहिस्थंचब्रह्माण्डानांस्थितंजले भूतानांचशरीरस्थंशंभोर्मूर्तिर्गरीयसी नदीनामम्बुतंमातान्नदानाम
पिसर्वदा समुद्राणांचसर्वेषांयापीसर्वमुमापतेः संजीवनीसमस्तानांभूतानामेवपावनी अग्न्यिकाप्राणसंस्थायमूर्तिरम्बुमयी
परा अन्तस्थाचबहिस्थाचब्रह्माण्डानांवभूवसः धारीस्थाचभूतानांश्रेयसीमूर्तिरैश्वरी मूर्तिःपावकसंस्थायाशंभोरत्तंतपूजि
ता भेदासकोनपंचाशद्दृदविद्धिरुदाहृताः हव्यंवहतिभूतानांशंभोराजात्मकोविभुः कव्यंपितृगणानांचहूयमानेद्विजा॥
तिभिः सर्वदेवमयंशंभोः अष्टमस्यात्मकंवपुः विविधंवेदपाःस्तुत्यायजंतिचयथाविधि अन्तस्थाजगदंडानांबहिस्थ्याशरीरि
णः शरीरस्थ्यभूतानांशैवीमूर्तिःपरीयसी प्राणापानादिनागकूर्मादयाश्चावहायाश्चवायवः ईशानमूर्तेरेकसभेदाःसर्वेप्रकीर्तिताः
अन्तस्थाजगदंडानांबहिस्थंचवियद्विभोः शरीरस्थंचभूतानांशंभोर्मूर्तिर्गरीयसी शंभोर्विश्वंभरामूर्तिःसर्वब्रह्मादिदेवताः चरा
चराणांभूतानांसर्वेषांधारणीयता आत्मातत्साष्टमीमूर्तिर्यजमानाह्वयापरा चराचराणांभूतानांशरीराणीतिविद्धुधा; पंचकेना
ष्टमूर्तीनांसमाख्यानिसर्वथा पंचभूतानिचंद्रार्कावात्मेतिमुनिपुंगवाः मूर्तयोष्टौशिवस्योक्तादेवदेवस्यधीमतः आत्मातस्याष्ट
मीमूर्तिर्यजमानाह्वयापरा चराचरशरीरेषुसर्वेष्वेवस्थितासदा दीक्षितंब्राह्मणंप्राहुरात्मानंचमुनीश्वराः मूर्तयोष्टौशिवस्या
ष्टात्मानंचमुनीश्वराः यजमानाह्वयामूर्तिः शिवस्याशिवदायिनः मूर्तयोष्टौशिवस्यैनावंदनीयाःप्रयत्नतः श्रेयोर्थिभिर्नरैर्नि
त्यंश्रेयसामेकहेतवः इतिश्रीलिंगपुराणेउपरिभागेनामत्रयोदशोनरणात्मोध्यायः ॥१४ सनत्कुमारउवाच भूयोपिवदमेनंदिन्महि
मानमुमापतेः अष्टमूर्तेर्जगद्याप्यस्थितस्यपरमेष्ठिनः नंदिकेश्वरउवाच वक्ष्यामितेमहेशस्यमहिमानमुमापतेः अष्टमूर्तेर्जगद्या

लिं पाश्रितस्य परमेष्ठिनः चराचराणां भूतानां धाता विश्वंभरात्मकः सर्व इत्युच्यते देवः सर्वशास्त्रार्थपारगैः विश्वंभरात्मनस्तस्य
पु. शिवस्य परमेष्ठिनः विकेशी कथ्यते पत्नी तनयोंगारकः स्मृतिः भव ईशा हि देवेशो भगवान्देववादिभिः संजीवनस्य लोकानां भ
१८८ वस्य परमात्मनः उमा संकीर्तिता देवी सुतः शुक्रस्य सूरिभिः सप्तलोकांडकव्यापि बुधैः पुत्र उदाहृतः सप्तलोकांडकव्यापी सर्वलो
कैकरक्षिता वह्न्यात्मा भगवान्देवः स्मृतः पशुपतिर्बुधैः स्वाहा वह्न्यात्मनस्तस्य प्रोक्ता पशुपतेः प्रिया षण्मुखो भगवान्देवो बुधैः पु
त्र उदाहृतः समस्तभुवनव्यापी भर्ता सर्वशरीरिणां पवनात्मा बुधैर्देव ईशान इति कीर्तितो ईशानस्य जगत्कर्तुर्देवस्य परमात्मनः
181 शिवा देवी बुधैरुक्ता पुत्रश्चास्य पुरोजवः चराचराणां देवानां सर्वेषामेव व्यापकः व्योमात्मा भगवान्देवो भीम इत्युच्यते बुधैः महा
महिम्नो देवस्य मान्यस्य जगदात्मनः दिशो दश स्मृता देव्यः सुतः स्वर्गश्च सूरिभिः सूर्यात्मा भगवान्देवः सर्वेषां च विभूतिदः रुद्र इ
त्युच्यते देवैर्भगवान्भुक्तिमुक्तिदः सूर्यात्मकस्य रुद्रस्य भक्तानां भद्रदायिनः सुवर्चसा स्मृता देवी पुत्रस्तस्याः शनैश्चरः समस्तसौ
म्यवस्तूनां प्रकृतित्वेन विश्रुतः सोमात्मको महादेवो बुधैर्देव इति स्मृतः सोमात्मकस्य देवस्य महादेवस्य धीमतः दयिता रोहिणी प्रो
क्ता बुधश्चैव शरीरजः हव्यकव्यास्थितिं कुर्वन्हव्यकव्याशिनां सदा यजमानात्मको देवो महादेवो बुधैः प्रभुः उग्र इत्युच्यते सद्भिरीशा
न इति चापरैः उग्राह्वयस्य देवस्य यजमानात्मनः प्रभोः दाक्षायणी बुधैरुक्ता संतानाख्यः सुतस्तदा शरीरिणां शरीरेषु काठिन्यं को
कठिनादिव पार्थिवं तनवपुस्तैर्यं सर्वतनवबुधैस्तभिः देहो देवेशदेवस्य देहभाजां यदव्ययः वस्तुद्व्यात्मकं यस्य भवस्य परमात्मनः ज्ञेय
श्रुतिविद्वद्भिः सर्ववेदार्थपारगैः आग्नेयः परिणामो यो विग्रहेषु शरीरिणां भीमस्य सा तनुर्ज्ञेया तनुवित्तानकोविदैः चतुरादि १८८
गतं तेजो यच्छरीरस्य संगिनां रुद्रस्य सा तनुर्ज्ञेया परमात्मभवुत्सभिः जातानां सर्वभूतानां चतुर्दशसु योनिषु अष्टमूर्तेरनन्यं ते वदा

त्तिपरमर्थयः सप्तमूर्तिमयान्याहुरीशस्यांगानि देहिनां आत्मा तस्याष्टमी मूर्तिः सर्वभूतशरीरिणां अष्टमूर्तिमयं देवं सर्वलोका
त्मकं विभुं भजस्व सर्वभावेन श्रेयः प्राप्तुं यदीच्छसि प्राणिनो यस्य कस्यापि क्रियते यदनुग्रहः अष्टमूर्तेर्महेशस्य कृतमाराधनं भवे
त् विग्रहः स्वीकृतो लोके देहिनो यस्य कस्यचित् अष्टमूर्तेर्महेशस्य स एव विहितो भवेत् यथवत्ता कृता लोके यस्य कस्यचिदंगिनः अष्ट
मूर्तेर्महेशस्य विहिता सा भवेद्विभोः आराधनं महेशस्य अष्टमूर्तेर्न संशयः आराधनं तु देवस्य अष्टमूर्तेर्भवेद्विभोः आराधनं तु जी
वस्य क्रियते न यत्र संशयः सर्वोपकारकरणं सर्वानुग्रह एव च तदर्चनं परं प्राहुरष्टमूर्तेर्न संशयः अनुग्रहणमन्येषां विधातव्यं
त्वयोगिनां सर्वाभयप्रदानं च शिवाराधनमिच्छता इति श्रीलिंगपुराणे उपरिभागे नाम पंचदशशततमोध्यायः १५ सनत्कुमा
र उवाच पंचब्रह्माणि मे नंदिन् वक्तुमर्हसि सत्तम श्रेयःकराणि भूतानि पवित्राणि शरीरिणां नंदिकेश्वर उवाच शिवस्यैव स्वरूपाणि
पंचब्रह्माह्वयानि ते कथयामि यथातत्त्वं पद्मयोनिसुतोत्तम सर्वलोकैकसंहर्ता सर्वलोकैकरक्षिता सर्वलोकैकनिर्माता पंच
ब्रह्मात्मकः शिवः सर्वेषामेव लोकानां यदुपादानकारणं निमित्तकारणं चाहुः स शिवः पंचधा स्मृतः मूर्तयः पंच विख्याताः पं
चब्रह्माह्वयाः पराः सर्वलोकशरण्यस्य शिवस्य परमात्मनः ईशानः परमा मूर्तिः शिवस्य परमेष्ठिनः भोक्तारं प्रकृतिवर्गस्य भोग्यस्य
क्षेत्रज्ञसंस्थितः स्थाणोः तत्पुरुषाख्या च द्वितीया मूर्तिरुच्यते प्रकृतिः सा हि विज्ञेया परमात्मा गुणात्मिका अघोराख्या तृतीया या वपुः
शंभोर्मूर्तिर्गरीयसी बुद्धेः सा मूर्तिरित्युक्ता धर्माद्यष्टांगसंयुता चतुर्थी वामदेवाख्या मूर्तिः शंभोर्गरीयसी अहंकारात्मकत्वेन व्याप्य सर्वं
व्यवस्थिता सद्योजाताह्वया शंभोः पंचमी मूर्तिरुच्यते मनस्तत्त्वात्मकत्वेन स्थिता सर्वशरीरिषु ईशानः परमो देवः परमेष्ठी सनातनः
श्रोत्रेंद्रियात्मकत्वेन सर्वभूतेष्ववस्थितः स्थितः तत्पुरुषो देवः शरीरेषु शरीरिणां त्वगिंद्रियात्मकत्वेन तत्त्वविद्भिरुदाहृता अघोरो

लि॰ विमहादेवस्तत्त्वात्मतयाबुधैः कीर्तितः सर्वभूतानांशरीरेषुव्यवस्थितः जिह्वेंद्रियात्मकत्वेनवामदेवोपिविश्रुतः सर्वभूतानि
गपु॰ कायानांकायेषुमुनिभिः स्मृता उपस्थात्मतयादेवः सद्योजातःस्थितः प्रभुः उक्तेनेवदशास्तैर्देहेषुप्राणधारिणां ईशानंप्राणिनां
१८८ देवंशब्दतन्मात्ररूपिणं आकाशजनकंप्राहुर्मुनिहेंद्राःकामनधा प्राहुस्तत्पुरुषंदेवंस्पर्शतन्मात्रकात्मकं समीरजनकंप्राहुः भग
वंतंमुनीश्वराः रूपतन्मात्रकंदेवमघोरमपिघोरकंप्राहुर्वेदविदोमुख्याजनकंजातवेदसः रसतन्मात्ररूपत्वात्प्रथितंतत्त्ववादिनः
वामदेवमयंप्राहुर्जनकत्वेनसंस्थितं सद्योजातंमहादेवंगंधतन्मात्ररूपिणं भूतात्मानंप्रशंसंतिसर्वतत्त्वार्थवेदिनः आकाशा
182 त्मानमीशानमादिदेवंमुनीश्वराः परमेणमहत्वेनसंभूतंप्राहुरद्भुतं प्रभुत्वेपुरुषंदेवंपवनंपावकात्मकं समस्तलोकव्यापित्वा
त्स्थितंतहृदयाविदः आत्मजितनयाख्यातमघोरंदहनात्मकं कामयंतिमहात्मानोदेववाक्यार्थवेदिनः तोयात्मकंमहादेवंवामदे
वंमनोरमं जगत्संजीवनत्वेनकथितंमुनयोविदः पंचब्रह्मात्मकंसर्वजगत्स्थावरजंगमं विश्वंभवात्मकंदेवंसद्योजातंजगद्गुरुं
वपावदेककर्तारंपरंकविदुर्विदुः शिवानंदंतमित्याहुर्मुनयस्तत्त्वदर्शिनः पंचविंशतितत्त्वात्माप्रपंचेयः प्रदर्शने पंचब्रह्मात्म
कत्वेनसशिवोनान्यतोगतः पंचविंशतितत्त्वात्मापंचब्रह्मात्मकः शिवः श्रेयोर्थिभिरतोनित्यंचिंतनीयः प्रयत्नतः इतिश्रीलिं
गपुराणेउपरिभागेपंचब्रह्मात्मककथनंनामपंचदशोत्तरशततमोध्यायः ॥८ सनत्कुमारउवाच भूयोपिशिवमाहात्म्यंसमावद
महामते सर्वज्ञोसित्वंभूतानामपिनाथमहागुणाः शैलादिनाशिवमाहात्म्यमनमेवमहामते शैलादिरुवाच शिवमाहात्म्यमे
कस्यंसूत्रणवक्ष्यामितेमुने बहुधावेदशास्त्रेषुकीर्तितंमुनिसत्तमैः सदसद्रूपवित्तिभिः सदसद्युक्तिचिंतकैः उभेरूपेशिवस्यैवहिशि
वाद्व्यक्तेविद्यते तयोः पतितत्राशिवः सदसत्पतिरुच्यते तराततरात्मकंप्राहुः तरातरपरंतथाशिवंमहेश्वरंकेचिन्मुनयः त १८८

वविंनका: उक्तमतरमव्यक्तंव्यक्तंतरमुदाहृतं रूपेणैनशंकरस्यैवतस्मात्तस्यमुच्यते तयोः परःशिवःशांतः तराक्षरपरोवुधैः
उच्यतेपरमार्थेनमहादेवोमहेश्वरः समस्तव्यक्तिरूपंतुसमष्टिव्यष्टिकारणं वदंतिकेचिदाचार्याः शिवंपरमकारणं समस्त
व्यष्टिरूपंततः स्मृतायउच्यते तयोः परःशिवःशांतः तराक्षरपरोवुधैः समस्तव्यष्टिरूपंतंसमष्टिव्यष्टिकारणं वदंतिकेचि
दाचार्याः शिवंपरमकारणं समष्टिव्यष्टिरूपंतविडव्यक्तंमुनीश्वराः रूपेणैनगदितेशंभोर्नायद्धर्मेततसंभवः तयोः कारणभा
वेनशिवोहिपरमेश्वरः उच्यतेयोगशास्त्रैः समष्टिव्यष्टिकारणं क्षेत्रंक्षेत्रज्ञरूपीचशिवः तयोः कारणभावेनशिवोहिपर
मेश्वरः उच्यतेयोगशास्त्रैः समष्टिव्यष्टिकारणं क्षेत्रंक्षेत्रज्ञरूपीचशिवः केचिदुदाहृतः परमात्मापरंज्योतिर्भगवान्परमे
श्वरः वतुर्विंशतितत्वानिक्षेत्रशब्देनसूरयः प्राहुः क्षेत्रज्ञशब्देनभोक्तारंपुरुषंतथा क्षेत्रक्षेत्रज्ञभेदेनरूपंतस्यस्वयंभुवः नांके
चिद्विदिशिवादन्यदितिप्राहुर्मनीषिणः अपरंब्रह्मरूपंतुपरब्रह्मात्मकंशिवं केचिदाहुर्महादेवमनादिनिधनंविभुं भूतेंद्रियां
तःकरणंप्रधानंविषयात्मकं अपरंब्रह्मनिर्दिष्टंपरंब्रह्मचिदात्मकं ब्रह्माणीनेमहेशस्यशिवस्यास्यस्वयंभुवः भ्रांतिर्विद्याप
रंचेतिशिवरूपमनुत्तमं अवाधुर्मु तयोर्योगाःकेचिदागमवेदिनः अर्थेषुवहुरूपेषुविज्ञानंभ्रांतिरुच्यते आत्माकारेणसंवि
त्तिर्बुधैर्विद्येतिकीर्त्यते विकल्परहितंतत्वंपरमित्यभिधीयते तृतीयरूपमीशस्यनान्यत्किंचनसर्वतः व्यक्ताव्यक्तज्ञरूपादि
शिवः कश्चिन्निगद्यते विधातासर्वलोकानांधाताचपरमेश्वरः त्रयोविंशतितत्वानिव्यक्तशब्देनसूरयः वदंतिव्यक्तशब्देनप्र
कृतिंचपरांतथा कथयंतिज्ञशब्देनपुरुषंगुणभोगिनं तत्त्रयंशंकरंरूपंनान्यत्किंचिदशंकरं इतिश्रीलिंगपुराणेउपरि
भागेषोडशोत्तरशततमोध्यायः ११७ सनत्कुमारउवाच पुनरेवमहाबुद्धेश्रोतुमिच्छामितत्वतः शिवरूपाणिसर्वाणिममा

वक्तवि शेषतः नंदिकेश्वर उवाच पुनः पुनः प्रवक्ष्यामि शिवरूपाणि ते मुने बहुभिर्बहुधा शब्दैः शब्दितानि मुनीश्वरैः क्षेत्रज्ञः
प्रकृतिर्व्यक्तं कालात्मेति मुनीश्वरैः उच्यते कैश्चिदाचार्यैर्नामानि शिवपारगैः क्षेत्रज्ञं पुरुषं प्राहुः प्रधानं प्रकृतिं तथा विकार
जातं निःशेषं प्रकृतेर्व्यक्तमित्यपि प्रधानव्यक्तयोः कालः परिणामैककारणं तत्वचतुष्टयमीशस्य रूपाणां हि चतुष्टयं हिरण्यग
र्भं पुरुषं प्रधानं व्यक्तरूपिणं कथयन्ति शिवं केचिदाचार्याः परमेश्वरं हिरण्यगर्भः कर्तास्य भोक्ता विश्वस्य रूपिणः विकारजा
तं व्यक्ताख्यं प्रधानं कारणं परं तेषां चतुष्टयं बुधैः शिवरूपं चतुष्टयं प्रोच्यते शंकरादन्यदखिलं चलनं किंचन पिंडजातिस्वरूपी
ति कथ्यते कैश्चिदीश्वरः चराचरशरीराणि पिंडाख्यान्यखिलान्यपि सामान्यानि समस्तानि महासामान्यमित्यपि कथ्यते जातिश
ब्देन तानि रूपाणि धीमतः विराड्ढिरण्यगर्भस्य कैश्चिदीशो निगद्यते हिरण्यगर्भो लोकानां हेतुर्लोकात्मको विराट् सूत्रव्याकृत
रूपं ते शिवं प्राहुस्तेन केचन अव्याकृतं प्रधानं हि तद्रूपं परमेष्ठिनः लोकायेनैव तिष्ठंति सूत्रे मणिगणा इव तत्सूत्रमिति विज्ञेयं रूप
मद्भुतविक्रमं अंतर्यामीश्वरः कश्चिदीशः सूत्रेति कीर्त्यते स्वयंज्योतिः स्वयंवेद्यः शिवः शंभुर्महेश्वरः प्राज्ञस्तैजसविश्वाख्यं तस्य
रूपत्रयं विदुः सुषुप्तिः स्वप्नजाग्रत्त्वमवस्थात्रयमेव तत् विराड्ढिरण्यगर्भाख्यमव्याकृतं यदाह्वयं तुरीयस्य शिवस्यास्य त्र्यवस्था
त्रयगामिनः हिरण्यगर्भः पुरुषः काल इत्यस्य कीर्तितः तिस्रोवस्था जगत्सृष्टिस्थितिसंहारहेतवः भवविष्णुविरिंचाख्यमवस्थात्र
यमीशितुः आराध्य भक्त्या मुक्तिं च प्राप्नुवंति शरीरिणः कर्ता क्रिया च कार्यं च करणं चेति सूरिभिः शंभोश्चत्वारि रूपाणि कीर्त्यंते पर
मेष्ठिनः प्रमाता च प्रमाणं च प्रमेयं प्रमितिस्तथा चत्वार्येतानि रूपाणि शिवस्यैव मनीषिणः ईश्वराव्याकृतप्राणा विराड्भूतेंद्रिया
त्मकं शिवस्यैव विकारोयं समुद्रस्येव वीचयः ईश्वरं जगतामाहुर्निमित्तं कारणं तथा अव्याकृतं प्रधानं हि नटकं वेदवादिभिः १८३

183

हिरण्यगर्भः प्राणात्मा विराट् लोकात्मकः स्मृतः महाभूतानि पंचैव कारणानींद्रियाणि च शिवेसैतानि रूपाणि शंसंति मुनिसत्त
माः परमात्मा शिवाद्देवो नान्योऽस्तीति कवयो विदुः शिवज्जातानि तत्वानि पंचविंशन्मनीषिभिः उक्तानि चतुर्दशार्थानि सलिलाद्भूमिर्हे
देवत् पंचविंशात्पदार्थेभ्यः शिवतत्वं परं विदुः तानि तस्मादनन्यानि सुवर्णकनकादिवत् सदाशिवेश्वराद्यानि तत्वानि शिवतत्व
तः जातानि तदनन्यानि मृत्तिकाकुंभभेदवत् मायाविद्याक्रियाशक्तिर्ज्ञानशक्तिः क्रियामया जाताः शिवात्तदनन्याः कीरणा इव सू
र्यतः सर्वात्मकं शिवं चैव सर्वाश्रयविधायिनं भज स्व सर्वभावेन श्रेयश्चेत्प्राप्तुमर्हसि इति श्रीलिंगपुराणोपरिभागो नाम त्र
योदशाशत्तमोऽध्यायः ।१९ सनत्कुमार उवाच भूयो गुणविदां श्रेष्ठ शिवमाहात्म्यमुत्तमं श्रावितो नास्ति मे तृप्तिस्तद्वाक्यामृतमुत्तमं
कथं शरीरी भगवान्कस्माद्रुद्रः प्रतापवान् सर्वात्मा च कथं शंभुः कथं पाशुपतं व्रतं कथं वा देवमुख्यैश्च स्तुतो दृष्टश्च शंकरः शै
लादुवाच प्रथमकल्पादभवत्स्थाणुः शिवः परमकारणं स सर्वकारणोपेतन्नाधिविद्याधिकः प्रभुः देवानां प्रथमं देवं जायमान
मुखांबुजे ददर्श चाग्रे ब्रह्माणं वात्स्यान दैवतन दृष्टो रुद्रो देवेशः ससर्ज सकलं च सः वर्णाश्रमव्यवस्थाश्च कारयामास देववि
राट् सोमं ससर्ज यज्ञार्थं सोमाय समजायत धरा च वह्निर्यज्ञश्च यज्ञपाणिः शचीपतिः विष्णुर्नारायणः श्रीमान्सर्वे सोममयं ज
गत् रुद्राध्यायवने देवा रुद्रं तुष्टुवुरीश्वरं प्रसन्नवदनस्तस्थौ देवानामग्रतः प्रभुः अपहृत्य च विज्ञानमेषामेव महेश्वरः देवाश्च
दृष्ट्वा स्तं देवं को भवानिति शंकरं अब्रवीद्भगवान्रुद्रो ह्यहमेकः पुरातनः आसं प्रथममेवाहं वर्तामि च सुरोत्तमाः भविष्या
मि च लोकेऽस्मिन्मत्तो नान्यः कथंचन व्यतिरिक्तं न मत्तोऽस्ति नान्यत्किंचित्सुरोत्तमाः नित्योऽहमनघो ब्रह्म ब्रह्मणो ब्रह्मणस्पतिः दिशा
श्च विदिशश्चाहं प्रकृतिश्च पुमानहं त्रिष्टुब्जगत्यनुष्टुप्च छंदो मंत्रमयः शिवः सत्योऽहं सर्वगः शान्तस्त्रेताग्निर्गौरजोऽनलः गोपहं शंक

लि
गपु॰
१८४

रक्ष्याहं ज्येष्ठोहं सर्वगस्त्वहं वरिष्ठः सर्वतत्वानां वरिष्ठोहमपांपतिः आपोहं भगवानीशः तेजोहं वेदिरप्यहं ऋग्वेदोहं यजुर्वेदः
सामवेदो महात्मभूः अथर्वणोहं मंत्रोहं तथा वांगिरसो वरः इतिहासपुराणानि कल्पोहं कल्पनाप्यहं अक्षरं चाक्षरं वाहं क्षांतिः
शांतिरहं क्षमा गुह्योहं सर्ववेदेषु वरेण्योहमजोप्यहं पुष्करं च पवित्रं च मध्यं वाहं ततः परं बहिश्चाहं तथा चांतः पुरस्तादहमव्ययः
ज्योतिश्चाहं तमश्चाहं ब्रह्माविष्णुर्महेश्वरः बुद्धिश्चाहमहंकारः ब्राह्मणोहं हवींषि च आयुस्तथा च सत्यं सत्येन स्वरसनमाः धर्मो
धर्मेण सर्वांश्च तर्पयामि स्वतेजसा इत्यादि भगवान् रुद्रस्तत्रैवांतरधीयत नापश्यंश्च ततो देवा रुद्रं परमकारणं ते देवाः परमात्मा
नं रुद्रं ध्यायंति शंकरं इति श्रीलिंगपुराणे उपरिभागे अष्टादशोत्तरशततमोऽध्यायः ॥१८ देवा ऊचुः स एष भगवान् रुद्रो ब्रह्माविष्णुर्महे
श्वरः भूतं च यच्च भविष्यच्च वर्तमानं महेश्वरः विश्वं कृत्स्नं जगत्सर्वं सत्यं तस्मै नमो नमः उमादौ च तथा भूतं तेभ्यो भुवः स्वस्तथैव च अंते
च विश्वरूपोसि शीर्षं तु जगतः सदा ब्रह्मैकस्त्वं द्विधा त्रिधार्थमधश्च त्वं सुरेश्वरः शांतिश्च त्वं तथा पुष्टिस्तुष्टिश्चाप्यहुतं हुतं विश्वं चा
प्यदेवं तथा दत्तमदत्तं सर्वमीश्वरं कृतं चाप्यकृतं देवं परमप्यपरं ध्रुवं परायणं सतां चैवमसतामपि शंकरं अपाम सोममृता अभू
माऽगम ज्योतिरविदाम देवान् किं नूनमस्मान् कृणवदराति किमु धूर्तिरमृत मर्त्यस्य एतद्धि साधितं दिव्यमक्षरं सूक्ष्ममव्ययं प्राजा
पत्यं पवित्रं च सौम्यमग्राह्यमप्रियं अग्राह्येणापि वाग्राह्यं वायव्येन समीरितं सौम्येन सौम्यं ग्रसितं तेजसा स्वेन लीलया तस्मै नमोप
संहर्त्रे महाग्रासाय शूलिने हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः हृदि त्वमसि यो नित्यं तिस्रो मात्रा परस्तु सः शिव
श्चोत्तरतश्चैव पादो दक्षिणतस्तथा यो वै वाचोत्तरं शिवं तस्मा ओंकारः स सनातनः ओंकारोयं स एवेह प्राणो वा व्याप्य तिष्ठति अनंतं तारं १८४
रं तत्त्वं शुक्लं वैद्युतमेव च परं ब्रह्म स ईशान एको रुद्रः स एव च भवान्महेश्वरः साक्षान्महादेवो न संशयः ऊर्ध्वमन्नामयत्येव सः

184

ॐकारः प्रकीर्त्तितः प्राणान्प्रणयति यस्मात्तस्मात्प्रणवः परिकीर्त्तितः सर्वं व्याप्नोति यस्मात्तस्मात्सर्वव्यापी सनातनः ब्रह्मा हरिश्च भगवा-
नाद्यंतं नोपलब्धवान् तथान्यो विद्यते नांतो रुद्रः परमकारणं यस्मात्तारयते संसारात्तारस्तस्मादभिधीयते सूक्ष्मो भूत्वा शरीराणि सर्व
दा ह्यधितिष्ठति तस्मात्सूक्ष्मः समाख्यातो भगवान्नीललोहितः नीलश्च लोहितश्चैव प्रधानपुरुषान्वयात् स्कंदतेस्य यतः शु
क्रं तथा शुक्लमयीति च विद्योतयति यस्माद्वैद्युतः परिगीयते बृहन्माद्बृहत्वाद्ब्रह्मात्वं बृहते च परस्परं तस्माद्बृहंति यस्मात्त
द्ब्रह्मेति कीर्त्यते अद्वितीयो हि भगवानिति तस्मादिति चाज्ञया आत्मज्ञानं महादेवान्नरीयं च महेश्वरः ईशानमस्य जगत ईशानं
तमीश्वरं ईशानमिंद्रं तस्थुषां सर्वेषामपि सर्वदा ईशानः सर्वविद्यानां यत्तदीशान उच्यते यदीक्षते भगवान् योगगामयति स्व
यं भगवानुच्यते देवो देवदेवो महेश्वरः विजित्यैवाह देवोसौ वामयत्यपि लीलया एषो ह देवः प्रदिशोनु सर्वाः पूर्वो ह जातः स उ
गर्भे अंतः स एव जातः स जनिष्यमाणः प्रत्यङ्गनातिष्ठति सर्वतोमुखः प्रतिक्रमातिष्ठति याश्चितनं प्रयत्नेन तदेतत्सेंद्रियं प्रिय
यतो वाचो निवर्तंते अप्राप्य मनसा सह तदग्रहणमेवैश्वर्यं यदा ग्रहणं तियत्नतः अपरं चापरं चेति परायणमिति स्वयं वदंति वाचः
सर्वं तं शंकरं नीललोहितं एष सर्वो नमस्तस्मै पुरुषः पिंगलः शिवः स एष स महारुद्रो विश्वं भूतं भविष्यति भुवनं बहुधा जातं
जायमानमिति तत्त्वतः हिरण्यबाहुर्भगवान् हिरण्यपतिरीश्वरः अंबिकापतिरीशानो हेमरेता वृषध्वजः उमापतिर्विरूपाक्षो
विश्वेशः शिववाहनः ब्रह्माणं विदधे योसौ पुत्रमग्रे सनातनं प्रहिणोति तमस्तस्मै तस्यैवात्मप्रकाशनं तमेकरुद्रं पुरुषं पुराणं
पुरुहूतं पुरातनं बालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं वह्निरूपं वरेण्यं तमात्मस्थं ये पश्यंति धीरास्तेषां शांतिः शाश्वती नेतरेषां
महतोपि महीयांसं अणोरण्यतरोऽव्ययः गुहायां निहितस्त्वात्मा जंतोरस्य महेश्वरः वसंभतस्य विश्वस्यैकमलं स्वल्विदं स्वयं गह्वरे

लिं॰ पु॰ १८५

186

गहनेनत्वननश्चार्धनतश्चथः तत्रापिसूक्ष्मगगनंगंकारंपरमेश्वरं बालाग्रमात्रंतन्मध्ये ऋतंपरमकारणं सत्यंब्रह्ममहादेवःपु
रुषः कृष्णपिंगलः ऊर्ध्वरेतसमीशानंविरूपाक्षमजोद्भवं अधितिष्ठतियोनिंयोनिंचैवसर्वेश्वरः देहंपंच विधंयेन तमीशानंपुरा
तनं प्राणेष्वंतर्मनसोलिंगमाहुः यस्मिन्क्रोधोयाचतृष्णाक्षमाच तृष्णांछित्वाहेतुजालस्यमूलंबुद्ध्याचित्तंस्थापयध्वंचरुद्रे एक
तमाहुर्वैरुद्रंशाश्वतंपरमेश्वरं परात्परतरंचापिपरात्परतरंध्रुवं ब्रह्मणोजनकंविष्णोर्वह्नेर्वायोःसदाशिवं ध्यानाग्निनाचशो
ध्यानंविशोध्यचस्थकरयक पंचभूतानिसंयम्यमात्राविधिगुणाश्रमात् एतद्व्रतंपाशुपतंमात्राहाद्विस्तुतः परं एकमात्रस-
मात्रोहंद्वारेणांतेध्यवासितं सिताभस्माप्रमतोभूत्वाव्रतंपाशुपतंचरेत् एतद्व्रतंपाशुपतंवक्ष्यामिसमासतः अग्निमाधायवि
धिवत्प्रज्ञः सामसंभवैः उपोषितः शुचिःस्नातः शुक्लांबरधरःस्वयं शुक्लयज्ञोपवीतीचशुक्लमाल्यानुलेपनः जुहुयाद्विरजानि
विहाविरजाश्चभविष्यति वायवःपंचशुध्यंतांवाङ्मनश्चरणादयः श्रोत्रंजिह्वातथाघ्राणंमनोबुद्धिस्तथैवच शिरःपाणिस्तथापा
र्श्वपृष्ठोदरमनुत्तमं जंघेशिश्नमुपस्थंचपायुर्मेढ्रंतथैवच त्वक्चर्ममांसरुधिरमेदोस्थीनितथैवच भूतानिचैवशुध्यंतांजाग्रत्स्व
मादयस्तथा शब्दंप्राणामनोतान्वेशुध्यंतांवैशब्दधा कृतान्येनममाद्रिरूपंगावयथाक्रमं उपसंहृत्याग्निरग्निहोत्राभस्म
एततः अग्निरित्यादिनाधीमान्विमृज्यांगानिसंस्पृशेत् एतत्पाशुपतंदिव्यंव्रतंपशुविमोचनं ब्राह्मणानांव्रतंप्रोक्तंक्षत्रियाणां
तथैवच वैश्यानामपियोग्यानांयतीनांचविशेषतः वानप्रस्थाश्रमस्थानांगृहस्थाश्रमिणामपि विमुक्तिर्विधिनानेनदृष्टाचैवब्र
ह्मचारिणां अग्निरित्यादिनासम्यग्गृहीत्वाग्निहोत्रजं सोपिपाशुपतोविप्रोविमृज्यांगानिसंस्पृशेत् भस्माच्छन्नोद्विजोविद्वान्म १८५
हापातकसंभवैः पापैर्विमुच्यतेसत्यंमुच्यतेचनसंशयः वीर्यमग्नेर्यतोभस्मवीर्यतोभस्मवीर्यवत् भस्मस्नानरतोविप्रोभस्मशायी

जितेंद्रियः सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् तस्मात्सर्वप्रयत्नेन भक्त्या गां पूजयेद्बुधः ऐरकारीन कर्तव्यः तत्र कारस्तथै
व च तत्तमंत्रैर्हि देवेशा ब्रह्मवाकेशवो पि वा मम पुत्रा भस्मधारी न संदेहो वरानने नैवायः कुरुते द्रुतं तेस याति नरकार्णवे गृह
स्थो ब्रह्मचारी वा त्रिपुंड्रं धारयेन्नरः पूजाकर्मक्रिया तस्य दानं स्नानं तथैव च निष्फलं जायते सर्वं यथा भस्मनि वै हुतं तस्मा
त्सर्वेषु कार्येषु त्रिपुंड्रं धारयेद्बुधः इत्युक्त्वा विरमद्ब्रह्मा स्तुतो देवैः समं प्रभुं अथ तेषां प्रसादार्थं पशूनां पतिरीश्वरः सगणाम
स्तवयामासार्थं मात्विय्यमकरोद्विभुः अथ सन्निहितं रुद्रं तुष्टुवुः सुरपुंगवाः रुद्राध्यायेन सर्वेशं देवदेवमुमापतिं देवोपि देवानाम
नालोक्य घृणया वृषभध्वजः तुष्टोस्मीत्याह देवेभ्यो वरं दत्वा समारिहा इति श्रीलिंगपुराणे उपरिभागे विंशतितमोध्यायः २०
शैलादिरुवाच ततः प्रभुं प्रीतमनसः प्रणिपत्य वृषध्वजं अपृच्छन्मुनयो देवाः प्रीतिकंटकितत्वचः देवा ऊचुः भगवन्केन मार्गे
ण पूजनीयो द्विजातिभिः कुत्र वा केन रूपेण वक्तुमर्हसि शंकर कस्याधिकारः पूजायां ब्राह्मणस्य कथं प्रभो क्षत्रियाणां कथं
देवदेवेश पूजनीयो वृषभध्वज स्त्रीशूद्राणां कथं वापि कुंडगोलकिनां तथा हिताय जगतां सर्वमस्माकं वक्तुमर्हसि तेषां भावं समालो
क्य मुनीनां नीललोहितः प्राह गंभीरया वाचा मंडलस्थः सदाशिवः मंडले चाग्रतस्तस्य देवदेवः सहोमया देवाश्च मुनयः सर्वे
विद्युत्कोटिसमप्रभं अष्टबाहुं चतुर्वक्त्रं द्वादशाक्षं महाभुजं अर्धनारीश्वरं देवं जटामुकुटधारिणं सर्वाभरणसंयुक्तं रक्तमाल्यानु
लेपनं रक्तांबरधरं सृष्टिस्थितिसंहारकारिणं तस्य पूर्वमुखं पीतं प्रसन्नं पुरुषात्मकं अघोरं दक्षिणं वक्त्रं नीलांजनचयोपमं दंष्ट्रा
करालमत्युग्रं ज्वालामालासमावृतं रक्तश्मश्रुजटायुक्तं चोत्तमं विद्रुमप्रभं प्रसन्नं वामदेवाख्यं वरदं वृषभध्वजं पश्चिमं वदनं तस्य
गोक्षीरधवलं शुभं मुक्ताफलमयैर्हारैर्भूषितं तिलकोज्ज्वलं सद्योजातं मुखं दिव्यं भास्कररूपानुकारिणं आदित्यमग्रतस्तस्य पूर्व

लि गपु° १९८ वक्त्रमाननं विमलाणामंडले पूर्वमुत्तरे दक्षिणास्थितं भास्करं पुरतो देवं वर्तवेक्रं चपूर्ववत् भानुं दक्षिणतो देवं चतुर्वक्त्रं चपूर्ववत्
रविमुत्तरतो देवं पूर्ववक्त्राननं वोधिनीं पश्चिमे भागे मंडलस्य प्रपूजयेत् आप्यायनीं चकौवेर्यामेकवक्त्रां चतुर्भुजां सर्वाभरणां
सेपद्मा: शान्कय: सर्वेसमना: ब्रह्माणं दक्षिणे भागे विस्नवामे जनार्दनं अग्रपद्म: साममार्गेणा मूर्तित्रयमयं शिवं ईशानं वरदं देव
मीश्वरं परमेश्वरं पद्मासनस्य वरदं यमंत्रानामनोपरि वैराग्यैश्वर्यसंयुक्तो प्रभाते विमलेन तथा स्मरेत्सर्वेश्वरं देवमाराध्य परमेश्वरा
वि सितपंकजमध्यस्थं दीमाद्यैरभिसंवृतं दीप्तादीस्तु शिवोकाणं भद्रां कनकसप्रभां विभूतिं विद्रुमप्रख्यां विमलां पद्मसन्निभां
अमोघां कर्णिकारां विद्युतं विश्ववर्णिनीं चतुर्वक्त्रां चतुर्वर्णां देवीं वैसर्वतोमुखीं सोमं मंगारकं देवं बुधं बुद्धिमतां वरं बृहस्पतिं
हृहद्वद्धिं भार्गवं तेजसां निधिं मंदं सदगतिं सर्वे समंतात्स्यतेसदा सूर्य: शिवो जगन्नाथ: सोम: साक्षादुमास्वयं पंचभूतानि
शेषाणि तन्मयं च चराचरं दृष्टैवं मुनय: सर्वे देवदेवमुमापतिं कृतांजलिपुटा: सर्वे मुनयो देवता: तथा अस्तुवन्नामभिर्दिव्याभि
वैरदं नीललोहितं अथयजु: ॐ नम: शिवाय रुद्राय कद्रुद्राय प्रचेतसे मीढुष्टमाय शर्वाय शिपिविष्टाय रंहसे प्रभूते विमले
स्फारे आराध्य परमेश्वरं नवशक्त्यावृतं देवं पद्मस्थं भास्करं प्रभुं दीप्तां सूक्ष्मां जयां भद्रां विभूतिं विमलां शुभां अमोघां विद्युतं देवं देवेथ
सर्वतोमुखीं आदित्यं भास्करं भानुं रविं देवं दिवाकरं तथा प्रभातं तथा प्रज्ञां संध्यां सावित्रमेव च विस्तरां सप्तुभां देवीं वोधनीं प्रणा
माम्यहं आप्यायणीं च वरदां ब्रह्माणं केशवं परं सोमादिग्रहं देवं चयथाक्रमेण संपूज्य मंत्रैर्विहितक्रमेण स्मरामि देवं रविमंडलस्थं स
दाशिवं शंकरमादिदेवं इंद्रादिदेवांश्चतथेश्वराणां नारायणं च यजमादिदेवं प्रणामयेऽर्घंच यथाक्रमेण यज्ञामि पद्मं वत्तथास्मरा १८९
मि सिंदूरवर्णोपममंडलाय सुवर्णवज्राभरणाय तस्मै पद्माभनेत्राय सपंकजाय ब्रह्मेंद्रनारायणकारणाय रक्षांवमंत्रोमहणांचर

वेणुं तथा सप्तविधं क्रमेण॥ प्रलंबबाहुं च विशालगात्रं स्मरामि मंदेहगणं तथैव कृतानि लोके विविधैस्तथाग्रे पुनः स
मोप्यवृतं तथैव सर्वं उल्कासहस्रं कजमध्यसंस्थं स्मरामि बिंबं सह देवदेवं स्मरामि दिव्यानि यथाक्रमेण॥ रक्तानि पद्मानि मलोच।
नानि पद्ये च सव्ये वरदे च वामे करे तथा भूषितभूषणानि दंष्ट्राकरालं न व दिव्यवक्त्रं विद्युत्प्रभं देवमयं करं च स्मरामि रक्ताभि
रतेहिजानां मंदेहरत्नो गणाभक्तीनेच सोमं सितं भूमिजमग्निवर्णं चामीकराभं बुधमिंदुसूनुं बृहस्पतिं कांचनसन्निकाशं
शुक्रं सितं कृष्णतरं च मंदं स्मरामि सप्तमभवं वामसूनुं सर्वेषामेव पर्यंते महादेवं च भास्करं शुक्लांडवर्णीन च मागधेन प्रसंस्थ।
ननोयेन शुभेन पूर्णं पात्रेऽर्घ्यं तामपमयं च कल्पं दास्येन वार्घ्यं भगवन्प्रसीद नमः शिवाय देवाय ईश्वराय कपर्दिने रुद्राय वि
ष्णवे तुभ्यं ब्रह्मणे सूर्यमूर्तये सूत उवाच यः शिवं मंडले देवं संपूज्यैवं समाहितः प्रातर्मध्याह्नसायाह्ने पठेत्स्तवमनुत्तमं इष्टं
गोवेन सायुज्यं लभते नात्र संशयः इति श्रीलिंगपुराणे उपरिभागे नाम एकविंशतितमोऽध्यायः॥ २१॥ सूत उवाच अथ रुद्रो म
हादेवो मंडलस्थ उवाच ह पूजां हं ब्राह्मणानां च क्षत्रियाणां विशेषतः वैश्यानां चैव शूद्राणां शुश्रूषाशूजकस्य च स्त्रीणां नैवाधि
कारोस्ति पूजादिषु न संशयः स्त्रीशूद्राणां द्विजेंद्रैश्च पूजया तत्फलं लभेत् नृपाणां उपकारार्थं ब्राह्मणाद्यैर्विशेषतः एवं सं
जप्येदेवं ब्राह्मणायाः सदाशिवं इत्युक्ता भगवान्रुद्रः तत्रैवांतरधीयत ते देवा मुनयः सर्वे बिंबमुद्दिश्य शंकरं प्रणम्य च महात्मा
नो रुद्राध्यायेन विह्वलाः जग्मुर्यथागतं देवा मुनयश्च तपोधनाः तस्मादभ्यर्चयेल्लिंगमादित्यं शिवरूपिणं धर्मकामार्थमुक्त्य
र्थं कर्मणा मनसा गिरा ऋषय ऊचुः रोमहर्षण सर्वज्ञ सर्वशास्त्रभृतां वर आसीत् शिष्य महाभाग वाक्यं वद सांप्रतं शिवेन देवदे
वेन भक्तानां हितकाम्यया वेदात्षडंगादुद्धृत्य सांख्ययोगाच्च सर्वशः तपश्च विपुलं तप्त्वा देवदानवदुर्जयं अर्थार्थं सार्थं संयुक्तं

लि
गपु
१८०

187

गूढमप्रातनिर्मितं वर्णाश्रमहितैर्धर्मैर्विपरीतं क्वचित्समं शिवेन कथितं शास्त्रं धर्मकामार्थमुक्तये शतकोटिप्रमाणेन तत्र
लोकद्वये विभो ज्ञानयोगादयो वापि श्रोतं कोटि हलेहि न: सूत उवाच पुरा सनत्कुमारेण मेरुपृष्ठे सुशोभने पृष्टो नंदीश्वरो देव:
शैलादि: शिवसंमत: पृष्टोयं प्रणिपत्यैवं मुनिभिर्योगिभिस्तथा सर्वत: तस्मै सनत्कुमाराय नंदिना कुलनंदिना कथितं यच्छिवज्ञानं श्रोत
तमुनिपुंगवा: शैवं संतिष्ठवेदोक्तं शिवेन परिभाषितं श्रुतिनिंदादिरहितं समय: प्रत्ययकारकं गुरुप्रसादजं दिव्यमनायासेन मु
क्तिदं सनत्कुमार उवाच भगवन्सर्वभूतेश नंदीश्वर महेश्वर कथं पूज्योपि याशंभुर्धर्मकामार्थमुक्तये वक्तुमर्हसि शैलादे वित
येनागतायमे सूत उवाच संप्रेक्ष्य भगवान्नंदी निसम्य वचनं पुन: कालवेलाधिकार्थं मवदद्वचनोवर: शैलादिरुवाच गुह्यत:
शृणुष्वतस्त्रैवमधिकारं प्रवीम्यहं गौरवादेवसंसेषा शिवाचार्यस्तनामघा स्वयमाचरते यस्तु आचारे स्थापयत्यपि आचिनोति च
शास्त्रार्थमाचार्यस्तेन कथ्यते तस्मादेदार्थतत्त्वज्ञमाचार्यं भस्मशायिनं गुरुमेवं वयेद्भक्त: सुभगं प्रियदर्शनं प्रतिपन्नं जनानं
दं श्रुतिस्मृतिपथानुगं विद्याभयदातारं लौल्यचापल्यवर्जितं आचारपालकं धीरं समयेषु कृतास्पदं तेन दृष्टास्तु सर्वभावेन पूज
येत्तां शिववद्गुरुं आत्मना च धनेनैव श्रद्धया वित्तानुसारत: तावदाराधयेच्छिष्यो प्रसन्नोसौ यथा भवेत् सुप्रसन्ने महाभागे सद्य:
पाशात्ययो भवेत् प्राणद्रव्यप्रभावेन आदेशो लब्धनलघा उत्तमो नाथ: मायज्ञोनीवोनानमवल्लभ आक्रुष्टास्ताडिता वापि ये
विषादं न यांति वै तेयोग्या: शिवधर्मिष्ठा: शिवध्यानपरायणा: संयुता धर्मसंपन्ना: श्रुतिस्मृतिपथानुगा: सर्वद्वंद्वसहा धीरा नि
त्यमुद्युक्तचेतस: परोपकारनिरता गुरुशुश्रूषणेरता: आर्जवा मार्जवा भक्ता अनुकूला: प्रियंवदा: अमानिनो बुद्धिमंतस्त्यक्त १८०
स्पर्धा गतस्पृहा: शौचाचारगुणोपेता दंभमात्सर्यवर्जिता: योग्या एवं द्विजा: सर्वे शिवभक्तिपरायणा: एवं वृत्तसमो येनावाज्ञन:

कायकर्मभिः सोध्यायएवंविधानेन तत्वजातिविशुद्धये शुद्धोविनयसंपन्नो मिथ्याकंडकवर्जिताः गुर्वाज्ञापालकश्चैवशिष्योनुग्र
हमर्हति गुरुस्तच्छास्त्रविद्वान्तत्त्वपश्चोजनवत्सलः लोकाचाररतोनित्यंतन्त्रविन्मोक्षदःस्मृतः सर्वलक्षणसंपन्नः सर्वशास्त्रविशा
रदः सर्वोपायविधानज्ञः तत्वहीनस्तुनिष्फलः असंवेद्यपरेतत्वेनिश्चयोयस्यनास्तिति आत्मनोनुग्रहोनास्तिपरस्यानुग्रहः क
थं प्रबुद्धस्तुद्विजोयःस्यात्सशुद्धः सोथयत्नापि तत्वहीनेकृतोबोधः कृतोत्यात्मपरिग्रहः परिग्रहविनिर्मुक्ताः तेसर्वेपशवो
मताः पशुभिःप्रेरितायेत्वेतेसर्वेपशवःस्मृताः तस्मात्तत्वविदोयेनमुक्तास्तेमोचयंत्यपि संवित्तिजननंतत्त्वंपरानंदसमुद्भवं
तत्त्वंतत्त्वविदितंयेन सएवानंददर्शकः नपुनर्नाममात्रेणसंवित्तिरहितस्त्वयः अन्योन्यंतारयेन्नावाकिंशिलातारयेच्छिलां ते
षांतुनाममात्रेणमुक्तिर्वैनाममात्रिका योगिनांदर्शनाद्वापिस्पर्शनाच्छ्रवणादपि सद्यःसंजायतेसंज्ञापाशोपक्षयकारिणी अथ्य
वायोगमार्गेणशिष्यदेहेनविद्यते बोधोपदेशयोगेनसर्वतत्त्वानिशोध्यच सम्यक्स्वशुद्धिर्विहिताज्ञानयोगेनयोगिना शिष्यपरी
त्वयधर्मंसंधायनैकंवेदपारगो ब्राह्मणातत्क्रियंवैएवबद्धदोषविवर्जितं ज्ञानेनज्ञेयमालोक्यकर्णाकर्णगतोभवेत् वीर्याद्वीर्यंय
थाज्ञानंसंचरेद्दृष्टिवद्गुरोः भुवनेषुपदेष्वेववर्णेष्वमंत्रमुत्तमं कालाध्वानेमहाभागाःतत्वाध्वेसर्वसंस्मरते भिद्यतेसर्वसामर्थ्या
माज्ञामात्रेणसर्वतः तस्मात्सिद्धिश्चमुक्तिश्चगुरुकारुण्यसंभवा पृथिव्यादीनिभूतानिआविशंतिचभावने शब्दस्पर्शःतथा
रूपंरसोगंधस्वभावतः पदार्थास्त्वंविप्रबुद्धींद्रियविकल्पनं कर्मेंद्रियानिमात्राणिमनोबुद्धिरतःपरं अहंकारमयाव्यक्तंक
लाध्वनामितिस्मृतं पुरुषादिनिवृत्त्यर्थंमुन्मन्यंतेपरात्परं तत्वाध्वरमितिप्रोक्तंसर्वतत्वार्थबोधकं अयोगीनैवजानातितत्वसि
द्धिशिवात्मिकां इतिश्रीलिंगपुराणउपरिभागेएकविंशोत्तरशततमोध्यायः १२१ सूतउवाच परीक्ष्यभूमिंविधिवत्गंधवर्णरसा

लि॰
गपु॰
१८८

रादिभिः अव्लेहृत्यविनानावैरीगणरावाहनतमं पकहस्तप्रमाणेनमंडलंपरिकल्पयेत् आलिखेत्कमलंमध्येपंचरत्नसमन्वितं चूर्णै
श्चदलंहृत्तंसितंवारक्तमेववा पीतवाश्यामसंयुक्तंवज्रशोभासमन्वितं आवाह्यकर्णिकायांतुशिवंपरमकारणं अर्चयेत्सर्वयत्नेन
नैवपुष्पादिभिर्वविस्तरं दलेषुसिद्धयः प्रोक्ताः कर्णिकायांमहामुने वैराग्यज्ञानमालंव्यधर्मकर्मैमनोरमम् वामाज्येष्ठाचरौद्रीचक
लाविकरणीतथा बलाविकरणीदेवबलप्रमथनीक्रमात् सर्वभूतप्रदमनीकेसरेषुवशक्रयः मनोन्मनीमहामायाकर्णिका
यांशिवासने वामदेवादिभिःसार्धंहृदंन्यायेनविन्यसेत् मनोन्मयमहादेवंमनोन्मन्यास्थमध्यतः सूर्यसोमाग्निसंभूतात्मगणवा
त्मशिवात्मकं संकल्पविन्यसेद्वक्त्रं पूर्वपत्रेरविप्रभे अघोरंदक्षिणेपत्रेनीलांजनचयोपमं उत्तरेवामदेवाख्यंजपाकुसुमसन्निभं
सद्यः पश्चिमपत्रेतुगोक्षीरधवलंन्यसेत् ईशानंकर्णिकायांतुशुद्धस्फटिकसन्निभं चंद्रमंडलसंकाशंहृदयायेतिमंत्रतः वाक्ष
यद्ध्यादिभागेशिरसेधूम्रवर्चसे शिखायैवनमस्त्वेतिरक्ताभंनैऋतेदले कवचायांजनाभायइतिवायुदलेन्यसेत् अस्त्रायाग्नि
शिखाभायइतिदिक्षुप्रविन्यसेत् नेत्रंमध्येचैशान्यांपिंगलाभंप्रविन्यसेत् शिवंसदाशिवंदेवंमहेश्वरमतःपरं रुद्रविष्णुविरिंचि
वल्लाहित्यासेनभावयेत् शिवायरुद्ररूपायशान्त्यतीतायशंभवे शांतायशांतिदेवायनमस्त्वद्रसमेस्वयं विद्यायैविद्यामामाय
वायवेवह्निवर्चसे कलायैचप्रतिष्ठायैनारकायांतकायच निवृत्त्यैभुविदेवायधारायैधारणायच मंत्रैरेतैर्महाभूतविग्रहंचस
दाशिवं ईशानमुकुटंदेवंपुरुषाख्यंपुरातनं अघोरहृदयंवामदेवगुह्यंमहेश्वरं सद्योमूर्तिस्मरेद्देवंसदसद्व्यक्तिकारणं पंचव
क्त्रंदशभुजमष्टत्रिंशत्कलामयं वामंत्रयोदशविधंविभिन्नपवित्रतनप्रभं अघोरमष्टधाक्तनाकलारूपेणसंस्थितं पुरुषंचचतुर्धा १८८
वैविभिन्नपंचकलामयं ईशानंपंचधाक्षतायंचम्रस्तोम्यवाक्षितं हंसहंसेतिहंसेतिशिवभक्त्यासमन्वितं ओंकारमात्रमोंकारमका

रमकारं समरूपिणं श्रायर्घं च यथा श्रेवानुक्रमेणात्मरूपिणं प्रधानमहितं देवं प्रलयोत्पत्तिवर्जितं अघोरणीयांसमजं महतोपि
महत्तमं ऊर्ध्वरेतसमीशानं विरूपाक्षमुमापतिं सहस्रशिरसं देवं सहस्रांतं पुरातनं सहस्रहस्तचरणं नादांतं नादविग्रहं खद्योत
सदृशाकारं चंद्ररेखाकृतिं विभुं द्वादशांते भ्रुवोर्मध्ये तालुमध्ये गले क्रमात् हृद्देशे चास्थितं देवं स्वानंदममृतं शिवं विद्युद्वलयसं
काशं विद्युत्कोटिसमप्रभं श्यामरक्तकलाकारं शक्तित्रयकृतासनं सदाशिवं स्मरेद्देवं तत्त्वत्रयसमन्वितं विद्यामूर्तिमयं देवं पूजये
त्तु यथाक्रमात् लोकपालांस्तथास्त्राणां पूर्वाद्यान्पूजयेत्पृथक् चरुं च विधिना सिद्धं शिवाय विनिवेदयेत् अर्धं शिवाय तद्दद्याच्छेषा
र्धेन तु होमयेत् अघोरेणाथ शिष्याय दापयेद्भक्तमुत्तमं उपस्पृश्य शुचिर्भूत्वा पुरुषं विधिना जपेत् पंचगव्येन ततः प्राश्य ईशा
नेनाभिमंत्रितं वामदेवेन सर्वांगं भस्मनोद्धूलयेत्क्रमात् कर्णयोश्च जपेद्देवीं गायत्रीं रुद्रदेवतां सम्यक्चैव विधानेन च वस्त्रयुग्मेन वेष्टि
तं भूषितं हेमरत्नाद्यैर्भासितं च हिरण्मयं कलशं विन्यसेत्तत्र ब्रह्मभिर्ब्राह्मणास्ततः होमं च चरुणा कुर्याद्यथाविभवविस्तरं शिष्यं
च वामयेद्दक्षिणे मंडलस्य तु दर्भशय्यासमारूढं शिवध्यानपरायणं अघोरेणाथ यथान्यायं शतमष्टोत्तरं पुनः हुत्वेनं जुहुया
त्स्वप्नप्रभाते शोधयेन्मलं एवं चोपोषितं शिष्यं स्नातं भूषितविग्रहं नववस्त्रांतरीयं च उष्णीषकृतमंडलं दुकूलाद्येन वस्त्रेण नेत्रबं
धं प्रवेशयेत् स्वर्णपुष्पसंमिश्रं यथाविभवविस्तरं ईशानेन च मंत्रेण कुर्यात्पुष्पांजलिं प्रभोः प्रदक्षिणत्रयं कृत्वा रुद्राध्यायेन
वा पुनः केवलं प्रणवेनापि शिवध्यानपरायणः ध्यात्वा तद्देवदेवेशमीशानं संक्षिपेत्स्वयं यस्मिन्पात्रे पतेत्पुष्पं तन्मंत्रं तस्य सिद्ध्य
ति शिवांभसा तु संस्पृश्य अघोरेण च वर्मणा शिष्यमूर्ध्नि निविन्यस्य गंधाद्यैः शिवमर्चयेत् ब्राह्मणं परमं श्रेष्ठं द्वारे वै सार्ववर्णिकं
दीक्षियाणां विशेषेण द्वारे वै पश्चिमे स्मृतं नेत्रावरणमुन्मुच्य मंडलं दर्शयेत्ततः कुशासने तु संस्थाप्य दक्षिणामूर्तिमाश्रितः ततस्तु

लि हिं ततः कुर्यात्संवत्तत्प्रकारतः निहत्याहृदयपर्यंतं मंडलमत्तेजोऽग्रं प्रतिष्ठाप्य तदूर्ध्वं यथाक्रमम् अगोचरं विशेषणं तेनैवं दृया
गपु॰ कारमात्रेणासंवृताः तदूर्ध्वमार्गे मंत्रशोध्य शिवशान्त्याशिवयोजनं समर्पं नायतं तस्य तस्य योगिनीश्वरस्यैव तत्तत्त्रयप्रभेदेन वक्तृभिः
१८५ कलयान्यथा होमयेदंगमात्रेण शान्त्यातीतं सदाशिवं सद्यादिभिस्तेषां तथैव वक्त्रभिः कलयाः पृथक् शान्त्यतीतं तन्निश्चष्टई शानेवा
पिवापुनः प्रत्येकमष्टोत्तरशतेन दिशांहोमं तु कारयेत् ईशान्यां पश्चिमे वायव्य प्रधानं परिगीयते समिदाज्यचरुं लाजा सर्षपांश्च य
वान्नतिलान् द्रव्याणि च प्रहोतव्यं स्वाहान्तं प्रणवादिकं तेषां स्वरूपं निर्दिष्टं ईशानेन विधीयते जपादिसिद्धपर्यंतं मग्निकार्यक्र
189 मेण तु गुणसंख्याप्रकारेण प्रधानं च तत् प्रयोजयेत् भूतानि ब्रह्माभिर्वापि योनिबीजादिभिस्तथा अन्यत्प्रधानमात्रेण प्राणापाने
नियम्य च बद्धेन भेदयेदात्मा प्रणवान्तं कुलाकुलं अन्योन्यमुपसंहृत्य ब्रह्माणं केशवं हरिं हृदि रुद्रमीशानं शिवं देवं महेश्वरं तस्मा
त्स्थिष्टप्रकारेण भावयेद्धवनाशनं स्थाप्यात्मानं मन्त्रजीवं ताडयेद्धारदर्शने दीपनं ग्रहणं चैव कारयेद्विधिपूर्वकं षट्पद्मं मध्यमंयु
क्तं तोयेन समन्वितं षडंतमाकृतिः प्रोक्ता एवं भूतप्रकारतः संख्यानं षष्टसहितं संघातं संपुटं तके नादितं कथितं चोरं तत्नाना
मपियोगिनः प्रधानं संपुटीकृत्य तत्तीयेन च दीपनं आद्येन संपुटीकृत्य आद्येन संपुटीकृत्य प्रधानं ग्रहणं स्मृतं प्रधानं प्रथमे
नैव संपुटीकृत्य पूर्ववत् वेधनं परिपूर्णेन स्रावनं स्रावनेन च शान्त्यतीतात्ततः शान्तिर्विद्या नाम कला मला प्रतिष्ठा च निवृत्तिश्च
कलासंक्रमणं स्मृतं तत्तद्वर्णाकलायुक्तं भुवनेन यथाक्रमं मंत्रैः पदैस्तथा कुर्यात् विशोध्य च यथाविधि अन्त्येन योनिबीजेन कल्प
यित्वा च पूर्ववत् प्रजा संप्रेक्षणं विद्धिताडनं हरणं तथा संहृतस्य च संयोगं वितेपं च यथाक्रमं अर्चनं वत्र्यागर्भधारणं जननं पु १८५
नः अधिकारो भवेद्भोगे जपश्चैव विशेषतः उत्तमाद्येन योगेन योनिबीजेन संवृताः उद्धारश्रोत्तरणं चैव नाडनेन महात्मने अघोरेण

हतं तेन संस्थितोस्य विशेषतः प्रतिनन्नं क्रमो ह्येष योगमार्गेण सुव्रताः मुष्टिना चैव यावत्तु तावत्कालं नयेत्क्रमात् विषयेन तु सं-
योगीन्द्रहृत्स्थादि शिवान्तिकात् एकत्वं समतां याति नान्यथा तत्त्वदृष्टयः स्वयं नासाग्रे द्वादशान्ते च षष्ठेन सह योगिनां ज्ञानयामि
ति विप्रेन्द्रा देवदेवस्य शासने हेमराजतताम्राद्यैर्विधिना कल्पितेन च सत्कूर्चेन तु कुंभेन तन्तुनावेष्टितेन च तीर्थाम्बुपूरितेनैव रत्न
गर्भेण सुव्रताः संहितामंत्रितेनैव रुद्राध्यायायुतेन च सेवयेत्तु ततः शिष्यं शिवभक्तं च धार्मिकं वह्निदीक्षार्थं कुर्वीत दीक्षि
तं स्वयं यथाक्रमं वरं प्राणायामान्यागाः छेदनं शिरसो पि वा नतनम्भस्मेंजीयाद्रगवं तं सदाशिवं एवं दीक्षा प्रकर्तव्या दृष्टेनयेत्परमे
श्वरं शुश्रिहे वाश्च वेदाश्च यज्ञाश्च बहुदक्षिणाः शिवलिंगार्चनस्यैते कलां षोडशीं नार्हन्ति नाघमाः सदा यजन्ति यज्ञेन सदा दानं प्रयच्छ
न्ति सदा चैवायुभत्पश्च समक्रयोगोभ्यर्चयेच्छिवं एककालं द्विकालं वा त्रिकालं नित्यमेव हि अर्चयंति महादेवं ते रुद्रा नात्र संशयः नारुद्र
स्त्वस्पृशेद्रुद्रं नारुद्रो रुद्रमाप्नुयात् एवं संक्षेपतः प्रोक्तमपि कार्यं यथाक्रमं शिवं समर्चयेद्धर्मार्थकाममोक्षफलप्रदं इति श्रीलिंगपु
राणे उपरिभागे दीक्षाविधिर्नाम द्वाविंशोत्तरशततमोऽध्यायः सूत उवाच स्नानयोगोपचारं च वक्ष्ये वै भास्करस्य च शिवस्नानं त
तः कुर्यात् स्नानं शिवार्चनं षष्ठेन मृदमादाय षष्ठं भूमौ न्यसेत्तटे द्वितीयेन तदाभ्युक्ष्य तृतीयेन च शोधयेत् चतुर्थेनैव विभजेन्मल
मेकेन शोधयेत् स्नाना षष्ठेन तच्छेषां स्वदेहं लेपयेत्पुनः त्रिधा विभज्य सर्वं च वचनं भिषव्यमेत्पुनः षष्ठेन सप्तवाराणि सिक्त्वा मूलेन वाल
येत् दशवारं च षष्ठेन दिशां बंधः प्रकीर्तितः वामेन तीर्थं संस्पृश्य तेन शरीरमनुलिप्य च स्नानाचारेण स्वस्था त्वमभिषेकं समाचरेत् शृं
गेण पर्णपुटकैः पलाशेन दलेन वा सौवर्णै राजतैस्ताम्रैर्विविधैः सर्वसिद्धिकरैः शुभैः सौराणि च प्रवक्ष्यामि वाष्कलायानि सुव्रताः श्रो
गानि सर्ववेदेषु साराणि तानि सुव्रताः ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं ओं ऋतं तत्सद्ब्रह्म नवान्तरमयं मंत्रं वा

लि
पु.
१८०

190

फलं परिकीर्तितं नहरं तीति तिलोकानिष्टतमतः समुच्यते सत्यमंतरमिन्यक्तं प्रणवादि नमोंतकं ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भ
र्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ नमः सूर्याय खखोल्काय नमः मूलमंत्रमिदं प्रोक्तं भास्करस्य महात्मनः नवाक्षरेण
दीप्ताद्यं मूलमंत्रेण भास्करं पूजयेदंगमंत्राणि कथयामि यथाक्रमं देवादिभिः प्रयुक्ताय प्रणवेनाचमध्यमं ॐ भूः ब्रह्महृद
याय नमः ॐ भुवः विष्णुशिरसे ॐ स्वः रुद्रशिखायै ॐ भूर्भुवः स्वः ज्वालामालिनी शिखायै ॐ जनः शिवायै नेत्रेभ्यः ॐ तपः ता
पनाय अस्त्राय मंत्राणि कथितान्येवमेतानि विविधानि च पतैः सांगादिभिर्वाक्यैः स्नात्वा नु मामभिषिंचयेत् ताम्रकुंभेन वै विप्रः
दत्त्वा वै पुष्पवच्च सकुशेन समुद्घृत्य मंत्रैः सर्वैः समाहितः रक्तवर्णपरीधानश्चाचमेद्धि पूर्वकं सूर्यश्चेति दिवा रात्रौ अग्नि
श्चेति द्विजोत्तमाः आपः पुनंतु मध्याह्ने मंत्रावमन मुच्यते षष्ठेन शुद्धिं कृत्वैवं जपेदायमतंतमं करशाखा तथांगुष्ठ मध्यमानामिका
न्यसेत् तलेनतर्जन्यंगुष्ठेनांगुष्ठेनांगानि विन्यसेत् नवाक्षरमयं देहं कृत्वा चैवं पापिनं सूर्योहमिति संचिंत्य मंत्रैरेतैर्यथाक्रमं वा
महस्तगतेनाथ अंगैः सिद्धार्थकान्वितैः कुशपुष्पैस्तथा भूत्वा मलाग्रे रक्षार्थामितः आपोहिष्ठाभिरिद्धि वेष्टयेत्समावास्येजलं वाम
नासापुटेनैव नदेहं भावयेद्धितं ग्रंथिं मारयेद् ह्रस्वस्य नासापुटेन च कल्मषं ज्ञानवान्तं भावयेच्च शिलागतं तर्पयेत्सर्वदेवेभ्यश्च
षिभ्यश्च विशेषतः भूतेभ्यश्च पितृभ्यश्च विधिनार्घ्यं च दापयेत् आपिनी चप्रातर्ज्योत्स्नां संध्यां सम्यगुपासयेत् प्रातर्मध्याह्नसाया
ह्नेष्वर्घ्यं वै वानिवेदयेत् रक्तचंदनतोयेन हस्तमात्रेण मंडलं सुवृत्तं कल्पयेद्भूमौ प्रघर्षेण द्विजोत्तमाः प्राङ्मुखः ताम्रपात्रं च संगंधं
प्रस्थपूरितं पूरयेद्गंधतोयेन रक्तचंदनकेन च रक्तपुष्पैः तिलैश्चैव कुशाक्षतसमन्वितैः दूर्वापामार्गगव्येन केवलेन घृतेन च जा १८०
नुभ्यां धरणीं गत्वा देवदेवं नमस्य च कृत्वा शिरसि तत्पात्रमर्घ्यं मूलेन दापयेत् ग्रस्थमेथावुतं कृत्वा यत्फलं परिकीर्तितं अर्घ्यस्य

साधनं चैव सम्मं तान्परिकीर्तितं बद्धा पद्मासनं योगी प्राणायामं समभ्यसेत् रक्तपुष्पाणि संगृह्य कमलायां विभावयेत् आ
त्मनो दक्षिणे भागे स्थाप्य जलभांडं च वामतः ताम्रपात्राणि सौराणि सर्वकामार्थसिद्धये अर्घ्यपात्रं समादाय प्रस्थार्धं च यथाविधि
पूर्वोक्तेनांबुना सार्धं जलभांडस्थितेन च अस्त्रोदकेन चैवार्घ्यमर्घ्यद्रव्यसमन्वितं संहितामंत्रितं कृत्वा संस्पृश्य प्रथमेन च तृतीये
नावगुंठ्यैव स्थापयेद्दासनोपरि पाद्यमाचमनीयं च गंधपुष्पसमन्वितं संहितामंत्रितं कृत्वा संस्पृश्य प्रथमेन च अंभसा शोधिते
पात्रे स्थापयेत्पूर्ववत्पृथक् संहितां चैव विन्यस्य कवचेनावगुंठ्य च अर्घ्यांबुना समभ्युक्ष्य द्रव्याणि च विशेषतः आदित्यं च जपे
द्देवं सर्वदेवनमस्कृतं आदित्यो वै तेज ऊर्जो बलं यशो विवर्धति इत्यादिना नमस्कृत्य कल्पयेदासनं प्रभोः प्रभूतं विमलं सारमा
